एवं चतुर्धा संभिन्ना मूर्तयः पुरुषादिकाः ॥ ६ ॥

पञ्चानां स्थापनं नित्यं शान्तिपुष्टिसुखप्रदम् ।
वर्षदं सर्वलोकानां चातुर्वर्ण्यसमृद्धिदम् ॥ ७ ॥

चतुराश्रमिणां चापि सिद्धिदं चेति कीर्तितम् ।
पञ्चाग्नीनां यथाधानं पञ्चमूर्तिक्रमस्तथा ॥ ८ ॥

नलीनके तथाष्टाङ्गे नन्द्यावर्ते चतुर्मुखे ।
सर्वतोभद्रके वाथ श्रीप्रतिष्ठितके तथा ॥ ९ ॥

बृहद्वृत्तविमाने वा यजमानसमीप्सिते ।
स्थापयेद्देवदेवं तु पञ्चमूर्तिविधानतः ॥ १० ॥

शिल्पशास्त्रोक्तमार्गेण विमानं परिकल्पयेत् ।
आदौ भूखननं कुर्याद्विमानस्य तु मध्यमम् ॥ ११ ॥

प्राच्यां पुरुषमूर्तिस्तु सत्यमूर्तिस्तु दक्षिणे ।
पश्चिमेऽच्युतमूर्तिः स्यादनिरुद्धस्तथोत्तरे ॥ १२ ॥

पुरुषादीनां चतुर्दिक्षु चतुर्गर्भगृहाणि च ।
मध्ये तले द्वितीये तु विष्णोर्गर्भालयं भवेत् ॥ १३ ॥

तृतीये तु तले तत्र शयानस्य हरेर्भवेत् ।
तलेऽथवा द्वितीये तु नारसिंहं प्रकल्पयेत् ॥ १४ ॥

तृतीये तु तले विष्णुमादिमूर्तिं प्रकल्पयेत् ।
एवं तत्तितलैर्युक्तं कुर्यात्सोपानसंयुतम् ॥ १५ ॥

चतुर्दिङ्मुखसंयुक्तं षड्गर्भालयसंयुतम् ।
मुखमण्डपसंयुक्तं चतुर्दिक्षु तथैव च ॥ १६ ॥

शिल्पशास्त्रविधानेन विमानं कारयेद्बुधः ।
तत्रासीनान् स्थितान् वाथ देवानेतांश्च कारयेत् ॥ १७ ॥

प्राच्यां पुरुषमूर्तिं च श्वेताभं च यथाविधि ।
तस्य दक्षिणतो देवीं श्रियं रक्तां सुलोचनाम् ॥ १८ ॥

वामे च हरिणीं देवीं श्यामवर्णां च कारयेत् ।
प्रवाळाभं भृगुं तद्वत्पुराणं चार्चकं सितम् ॥ १९ ॥

व्याजिनीं च सुरां रक्तां सुन्दरीं कनकप्रभाम् ।
श्वेतं शङ्खनिधिं कुर्याद्दक्षिणे द्वारपालकम् ॥ २० ॥

तथा पद्मनिधिं चापि रक्ताभं वामभागतः ।
सावित्रीं चैव गायत्रीं कल्पयेद्भित्तिपार्श्वयोः ॥ २१ ॥

दक्षिणे त्वञ्जनाभं च सत्यं वै दक्षिणामुखम् ।
तस्य दक्षिणतो देवीं पवित्रीं रक्तसन्निभाम् ॥ २२ ॥

पौष्णीं श्यामां तथा देवीं कारयेद्वामतः क्रमात् ।
धातृनाथं सुवर्णाभं श्यामं तद्वच्चिरायुषम् ॥ २३ ॥

व्याजिनीं च जयां श्यामां रक्तां भद्रां च कारयेत् ।
द्वारस्य दक्षिणे शङ्खं शङ्खाभं शङ्खचूळिनम् ॥ २४ ॥

वामभागे च चक्रं च रक्ताभं चक्रचूळिनम् ।
पश्चिमे च सुवर्णाभमच्युतं पश्चिमामुखम् ॥ २५ ॥

तस्य दक्षिणतो देवीं पवित्रीं रुक्मसन्निभाम् ।
वामे क्षोणीं च शुक्लाभां श्यामां वै पूरकारिणीम् ॥ २६ ॥

श्वेतं पुण्यं मुनिं चैव व्याजिनीं विजयां तथा ।
रक्तां विन्दां तथा श्यामां पूजनीं कारयेद्बुधः ॥ २७ ॥

तत्र शङ्खनिधिं कुर्यात्पूर्ववत् द्वारदक्षिणे ।
तथा पद्मनिधिं वामे द्वारपालं च कारयेत् ॥ २८ ॥

उत्तरे तु प्रवालाग्निसन्निभं चानिरुद्धकम् ।
अनन्तोत्सङ्ग आसीनं वीरासनविधानतः ॥ २९ ॥

उत्तराभिमुखं नागफणैः संछन्नमौलिनम् ।
कारयेत्तदनन्तस्य फणाः सप्ताऽथ पञ्च वा ॥ ३० ॥

प्रमोदाधायिनीं देवीं प्रवालाभां च दक्षिणे ।
श्यमां वामे महीं देवीं भृगुं कनकसन्निभम् ॥ ३१ ॥

श्वेताभमसितं चापि व्याजिनीं च कुमुद्वतीम् ।
तथैवोत्पलकं चैव कारयेत विधानतः ॥ ३२ ॥

पूर्ववच्छङ्खचूलिं च चक्रचूलिं यथाक्रमम् ।
द्वारस्य दक्षिणे वामे द्वारपालानिमानपि ॥ ३३ ॥

मध्ये तले द्वितीये तु तथा सिंहासनोपरि ।
श्रीभूमिभ्यां सुखासीनं श्यामवर्णं चतुर्भुजम् ॥ ३४ ॥

शङ्खचक्रधरं चैव सर्वाभरणभूषितम् ।
कारयित्वा विधानेन पूजनीं श्यामसन्निभाम् ॥ ३५ ॥

मायां रक्तनिभामेव तथा संह्लादिनीमपि ।
मार्कण्डेयं भृगुं चैव पूर्ववत्कारयेद्बुधः ॥ ३६ ॥

बलिदं द्वारपालं च श्यामवर्णं गदायुधम् ।
उद्देश्यकरमुद्रं च दक्षिणे नागचूलिनम् ॥ ३७ ॥

तुहुणं च तथा वामे रुक्माभं दण्डपाणिनम् ।
उद्देश्यकरसंयुक्तं कारयेद् द्वारपालकम् ॥ ३८ ॥

सर्वेषां द्वारपालानां तत्तद्द्वारे यथाक्रमम् ।
भित्त्याश्रयं च तद्बिम्बमाभासं वाथ कारयेत् ॥ ३९ ॥

ऊर्ध्वे तले तृतीये तु पूर्वोक्तेन विधानतः ।
अनन्तशयनं देवं शयानं संप्रकल्पयेत् ॥ ४० ॥

तलेऽथवा द्वितीये तु तथा सिंहासनोर्ध्वतः ।
श्रीभूमिभ्यां सहासीनं शान्तवेषसमन्वितम् ॥ ४१ ॥

सिंहवच्च मुखं कुर्याद्दंष्ट्रैरपि नखैर्युतम् ।
श्वेताभं रक्तवस्त्रं च शङ्खचक्रधरं परम् ॥ ४२ ॥

दक्षिणे तु श्रियं वामे क्षोणीमपि च पूर्ववत् ।
सिंहासनस्य चाधस्तादाग्नेय्यां देवपार्श्वतः ॥ ४३ ॥

ब्रह्माणं च प्रवालाभं देवमुद्वीक्ष्य सुस्थितम् ।
उपसंहर कोपं त्वमिति तत्र सुवादिनम् ॥ ४४ ॥

शङ्करं च तथैशान्ये तिष्ठन्तं श्वेतसन्निभम् ।
देवमुद्वीक्ष्य वन्दन्तं कारयेत यथाक्रमम् ॥ ४५ ॥

भृगुं प्रवालवर्णं च पुराणं रक्तमेव च ।
द्वितीये तु तले कृत्वा तृतीये तु तले पुनः ॥ ४६ ॥

आदिमूर्तिं तथा विष्णुं पूर्ववत्संप्रकल्पयेत् ।
एवमिष्टविमाने च ध्रुवबेराणि कारयेत् ॥ ४७ ॥

बालालयात्समानीय विमाने विधिवत्कृते ।
प्रतिष्ठोक्तविधानेन प्रतिष्ठां कारयेद्बुधः ॥ ४८ ॥

एवं कर्तुमशक्तश्चेत्कूटागारं प्रकल्प्य च ।
कूटागारात्समानीय पूर्वोक्तेन विधानतः ॥ ४९ ॥

सालीन्द्रं च सगर्भं च युक्तं हस्तप्रमाणतः ।
यथा स्यात्सुदृढं हृद्यं शिलयेष्टक्याऽथवा ॥ ५० ॥

कारयित्वैवं तन्मध्ये विष्णुमूर्तिं तु पूर्ववत् ।
ऊर्ध्वं तलं च संकल्प्य पश्चिमे सोन्नतं तथा ॥ ५१ ॥

कृत्वा तत्र च पैशाचं हित्वैव स्थापनोच्यते ।
परितस्त्वन्यमूर्तीनां स्थापनं च विधीयते ॥ ५२ ॥

ध्रुववेरं विना तत्र तत्तन्मूर्तिपदेषु तु ।
पीठे रत्नानि विन्यस्य सर्वेषां च यथाविधि ॥ ५३ ॥

लोहजाः प्रतिमाश्चापि कौतुकाद्याश्च शक्तितः ।
स्थापयेदर्चयेत्सम्यग्ग्राममध्ये हरिं परम् ॥ ५४ ॥

शक्तो नलिनकाद्येषु यथोक्तं पुनरीप्सितम् ।
विमानं विधिना सम्यक्कारयित्वैव तत्र च ॥ ५५ ॥

ध्रुववेराणि चोक्तानि पूर्ववत्संप्रकल्प्य च ।
कूटागारात्समानीय पूर्वोक्तेन विधानतः ॥ ५६ ॥

प्रतिष्ठां कारयेत्तत्र विमाने भक्तिसंयुतः ।
एकमूर्तिविमानं चेत्कूटागारेऽपि पूर्ववत् ॥ ५७ ॥

ध्रुवकौतुकसंयुक्तं स्थापयेदिति केचन ।
परिवारान् प्रवक्ष्यामि चतुर्दिक्षु यथाक्रमम् ॥ ५८ ॥

गरुडं चेन्द्रमग्निं च दुर्गां स्कन्दं यमं तथा ।
निर्ऋतिं च बुधं चैव वरुणं जवनं तथा ॥ ५९ ॥

ब्रह्माणं च कुबेरं च विष्वक्सेनं क्रमेण वै ।
ईशानं भास्करं चैव विघ्नेशं नागराजकम् ॥ ६० ॥

चक्रं ध्वजं च शङ्खं च भूतनायकसंयुतम् ।
प्रथमावरणे देवान् परिवारान् प्रकल्प्य च ॥ ६१ ॥

गोपुरात्पुरतो बाह्ये भूतपीठं प्रकल्पयेत् ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे पञ्चमूर्तिविधिर्नाम

सप्तत्रिंशोऽध्यायः ॥

अष्टत्रिंशोऽध्यायः

पञ्चमूर्तिप्रतिष्ठायां विशेषं शृणुत द्विजाः !
यथोक्तेषु दिनेष्वेकं शुभं श्रेष्ठं प्रगृह्य च ॥ १ ॥

तस्मात्तद् दिवसात्पूर्वमङ्कुरानर्पयेत्ततः ।
षड्गर्भाल्यमुद्दिश्य षडाचार्यांश्च पूर्ववत् ॥ २ ॥

स्थापकानृत्विजश्चापि यथोक्तान् वरयेत्पृथक् ।
पूर्वोक्तविधिना सर्वान् संभारांश्च समाहरेत् ॥ ३ ॥

प्रमुखे विष्णुमूर्तेस्तु यागशालां च पूर्ववत् ।
तत्पार्श्वयां पुरुषस्यापि कारयित्वा यथोदितम् ॥ ४ ॥

ऊर्ध्वं तलं समुद्दिश्य तत्पार्श्वयामेव कारयेत् ।
दक्षिणे सत्यमूर्तेस्तु तद्द्वाराभिमुखे क्रमात् ॥ ५ ॥

प्राग्द्रव्यैरनुद्रव्यैश्च तथा चैव चतुर्गुणैः ।
शताष्टभिर्विशेषेण कलशैश्च चतुर्गुणैः ॥ ३५ ॥

द्वात्रिंशत्कलशैर्युक्तैश्चतुर्भिश्च शतैरपि ।
पूर्वोक्तविधिना सर्वैः सम्पूर्णं स्नापयेद्विभुम् ॥ ३६ ॥

एतत्तु स्नपनं प्रोक्तं मध्यमादुत्तमं बुधाः ।
तथैव षड्गुणैर्युक्तैः प्राग्द्रव्यैश्च तथैव च ॥ ३७ ॥

षड्गुणैरप्यनुद्रव्यैः कलशैरपि षड्गुणैः ।
चत्वारिंशद्भिरष्टाभिः सहितैः षट्छतैरपि ॥ ३८ ॥

पूर्वोक्तेन विधानेन स्नपनं चोत्तमाधमम् ।
प्राग्द्रव्यैरनुद्रव्यैस्तु तथैवाष्टगुणैरपि ॥ ३९ ॥

तथैवाष्टशतैस्तद्वच्चतुषष्टिसमायुतैः ।
कलशैः स्नपनं चैतदुत्तमान्मध्यमं स्मृतम् ॥ ४० ॥

शताष्टकैः दैशगुणैः प्राग्द्रव्यैरपि सर्वशः ।
दशगुणैरनुद्रव्यैः कलशैश्च तथैव च ॥ ४१ ॥

दशगुणैः प्रधानैश्च सोपस्नानसमन्वितैः ।
पूर्वोक्तेन विधानेन सर्वैर्दशगुणैरपि ॥ ४२ ॥

अशीतिभिः सहस्रैस्तु कलशैश्च प्रयत्नतः ।
स्नापयेद्देवदेवं तं भक्त्या च परया मुदा ॥ ४३ ॥

उत्तमोत्तममेतत्तु स्नपनं परमं विदुः ।
स्नपनं कारयेद्यस्तु देवदेवस्य भक्तितः ॥ ४४ ॥

काम्यं सर्वं च लब्ध्वैव विष्णुलोकं स गच्छति ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे नवविधस्नपनं नाम द्विपञ्चाशोऽध्यायः ॥

त्रिपञ्चाशोऽध्यायः

अथोत्सवार्थं चक्रस्य लक्षणं संप्रवक्ष्यते ।
सुवर्णेनाथ रूप्येण ताम्रेणैवायसाथवा ॥ १ ॥

गजदन्तेन वृक्षेण कुर्याच्चक्रं स्वशक्तितः ।
महाबेरस्य हस्तेन चतुर्विंशतिकाङ्गुलम् ॥ २ ॥

आयतं विस्तृतं चैव समं तस्येति संस्मृतम् ।
प्रमाणमेतद्वृत्तं स्याद्दारूणां च षडङ्गुलम् ॥ ३ ॥

वृत्तं षट्टस्य विस्तारं त्रिकाङ्गुलमिति स्मृतम् ।
तन्मध्ये चारकूटं स्यात्तस्यायामं त्रिकाङ्गुलम् ॥ ४ ॥

कूटमध्ये च सिंहस्य कुर्याद्वामकाननम् ।
शताष्टारयुतं श्रेष्ठं पञ्चाशद्भिरैर्युतम् ॥ ५ ॥

मध्यमं तु चतुर्विंशत्यैर्युक्तं कनिष्ठिकम् ।
मध्यं तत्पृष्ठपार्श्वस्य कार्यं संकुलपद्मवत् ॥ ६ ॥

पार्श्वयोरुभयोर्मूर्ध्नीत्यग्रानलशिखायुतम् ।
अधस्तात्फलकायुक्तं तद्बन्धं चतुरङ्गुलम् ॥ ७ ॥

पार्श्वयोः फलकास्याभ्यां सिंहाभ्यां च समुद्धृतम् ।
अधस्तात्फलकायास्तु कुम्भाभं वा तटित्प्रभम् ॥ ८ ॥

अष्टाङ्गुलप्रमाणेन कृत्वा तत्रैव योजयेत् ।
खादिरेण तु दण्डेन दण्डाधोऽग्रे च मध्यमे ॥ ९ ॥

पट्टैर्बध्वा च तत्पट्टविस्तारं च लिकाङ्गुलम् ।
दण्डायामं च चक्रस्य त्रिगुणं परिपठ्यते ॥ १० ॥

पादं पीठं च दण्डाधो बन्धं भागोन्नतं तथा ।
अंत ऊर्ध्वं प्रवक्ष्यामि चक्रस्य स्थापनाक्रमम् ॥ ११ ॥

प्रमुखे मण्टपे वाथ लब्धभागोन्नतं तथा ।
चक्रायामाधिकायामां शय्यावेदिं च कारयेत् ॥ १२ ॥

प्राक्पश्चिमायतां वेदिमर्धविस्तारसंयुताम् ।
औपासनोक्तविधिना कुण्डं कुर्याच्च दक्षिणे ॥ १३ ॥

प्रतिष्ठादिवसात्पूर्वं चतुर्थेऽहनि पूर्ववत् ।
अधिवासं च कृत्वैव प्रतिष्ठादिवसात्पुरा ॥ १४ ॥

वास्तुहोमं च कृत्वैव कुम्भपूजां समाचरेत् ।
औपासनक्रमेणाग्नावाधारं जुहुयात्पुनः ॥ १५ ॥

कुम्भे चक्रं विधानेन ध्यायेत्सम्यक्समाहितः ।
संस्नाप्य कलशैश्चक्रं बध्वा प्रतिसरां ततः ॥ १६ ॥

शयने शाययित्वा वै हौत्रं तत्र प्रशंसयेत् ।
चक्रं मूर्तिभिरावाह्य निरूप्याज्याहुतीर्यजेत् ॥ १७ ॥

अग्नौ चक्रस्य मन्त्राभ्यां शतमष्टोत्तरं यजेत् ।
स्थानमुक्तं च चक्रस्य यमाग्न्योर्मध्यमं पुरा ॥ १८ ॥

प्रातः स्नात्वा विशुद्धात्मा शुभे राशावनिन्दिते ।
चक्रं कुम्भं समानीय चक्रस्य स्थानमत्वरः ॥ १९ ॥

तत्र रत्नं सुवर्णं वा तत्तन्मन्त्रेण विन्यसेत् ।
बीजाक्षरं च विन्यस्य चक्रमन्त्रौ जपंस्तथा ॥ २० ॥

ध्यायन् कुम्भगतां शक्तिं कूर्चेनादाय तज्जलम् ।
चक्रमूर्धनि संस्नाप्य मन्त्रेणावाहयेत्क्रमात् ॥ २१ ॥

आवाह्यैव विधानेन पुण्याहं वाचयेत्ततः ।
आसनाद्युपचारैश्च क्रमेणैवार्चयेत्पुनः ॥ २२ ॥

हवींषि च यथाशक्त्या तच्चक्राय निवेदयेत् ।
गुरवेऽध्वर्यवे चैव दक्षिणां च ददेत्तदा ॥ २३ ॥

एवं यः कुरुते भक्त्या तस्य शुलुक्षयो भवेत् ।
अन्यस्मादपि सर्वस्माद्भयं तस्य विनश्यति ॥ २४ ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे चक्रप्रतिष्ठाविधिर्नाम त्रिपञ्चाशोऽध्यायः ॥

पञ्चपञ्चाशोऽध्यायः ॥

अतः परं तु वक्ष्येऽहमुत्सवारम्भमुत्तमम् ।
देवदेवस्य विष्णोर्हि सर्वलोकशुभप्रदम् ॥ १ ॥

उत्सवं सर्वलोकानां शान्तिपुष्टिकरं विदुः ।
स यो यज्ञस्समाख्यातस्सर्वयज्ञविशेषतः ॥ २ ॥

उत्कृष्टोऽयं यतस्तस्मादुत्सवस्विति कीर्त्यते ।
कालोत्सवः श्रद्धोत्सवस्तथा नैमित्तिकोत्सवः ॥ ३ ॥

इत्येवं त्रिविधं प्राहुरुत्सवं शार्ङ्गधन्वनः ।
मासे तु यस्मिन् कस्मिंश्चिदब्दमब्दं प्रति प्रति ॥ ४ ॥

शिष्टतोयेन तच्चक्रं स्नापयेत्तदनुक्रमात् ।
तच्चक्रं च पुनस्तीर्थे मज्जयेद्देवसन्निधौ ॥ १७ ॥
तीर्थे सर्वे जनास्तत्र मज्जेयुर्देवसंनिधौ ।
पश्चाद्देवं तथा नीत्वा मन्दिरं संप्रवेशयेत् ॥ १८ ॥
कलशैः स्नापयेद्देवं शुद्धोदैर्वाऽभिषेचयेत् ।
अर्चयित्वा यथाशक्ति हवींष्यपि निवेदयेत् ॥ १९ ॥
एतत्तीर्थोत्सवं प्रोक्तं सर्वपापप्रणाशनम् ।
तीर्थोत्सवं तु मध्याह्ने कारयेत प्रयत्नतः ॥ २० ॥
शान्त्युत्सवं तु कुर्याच्चेत्तद्धोमं च तथैव च ।
प्रभूतं च बलिं दत्त्वा वस्त्राद्यैरपि भूषणैः ॥ २१ ॥
अलङ्कृत्य च देवेशं यानमारोप्य पूर्ववत् ।
सर्वालङ्कारसंयुक्तं ग्रामं कुर्यात्प्रदक्षिणम् ॥ २२ ॥
अलङ्कृत्य च तच्चक्रं देवस्य पुरतो नयेत् ।
प्रदक्षिणं तथा कृत्वा ततो गत्वा जलाशयम् ॥ २३ ॥
स्नपनं मज्जनं तद्वत्कृत्वाऽऽलयमुपाव्रजेत् ।
एवमेव कृतो यस्तु शान्तिकोत्सव उच्यते ॥ २४ ॥
शान्तिकोत्सवमेवं तु पूर्वाह्णे कारयेद्बुधः ।
भक्त्युत्सवं च कुर्याच्चेद्भक्त्या देवं प्रणम्य च ॥ २५ ॥
चक्रेणैव विना देवमर्चयित्वा हवींषि च ।
निवेद्यैव विशेषेण वस्त्रमाल्यादिभूषणैः ॥ २६ ॥
अलङ्कृत्य च देवेशं यानमारोप्य पूर्ववत् ।
ग्रामं प्रदक्षिणं कुर्यात्सर्वालङ्कारसंयुतम् ॥ २७ ॥

पश्चादालयमाविश्य स्नापयित्वा निवेदयेत् ।
ध्वजारोहणहीने च हीने मृद्गृहणेऽपि च ॥ २८ ॥
होमे चक्रे विहीने च हीने भूतबलौ तथा ।
भक्तोत्सवे कृते तस्मिन् दोषो नास्तीति गीयते ॥ २९ ॥
भक्त्युत्सवं तु कुर्याच्चेदपराह्णे तु कारयेत् ।
विधिनैव हरेर्भक्त्या विष्णोरुत्सवमाचरेत् ॥ ३० ॥
उत्सवं कारयेद्यस्तु सर्वान् कामानवाप्नुयात् ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे एकाहिकोत्सवविधिर्नाम सप्तपञ्चाशोऽध्यायः ॥

अष्टपञ्चाशोऽध्यायः ॥

अतःपरं प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः ।
अवतारप्रतिष्ठां च तेषामभ्यर्चनाक्रमान् ॥ १ ॥
मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः ।
रामो रामश्च रामश्च कृष्णः कल्कीति ते दश ॥ २ ॥
पूर्वान् पञ्च वरान् प्राहुराविर्भावानिति क्रमात् ।
अपरांस्तेषु पञ्चैव प्रादुर्भावान् वदन्ति च ॥ ३ ॥
आदिमूर्तेस्तु भेदेन बहुधा रूपविस्तरम् ।
पृथक् पृथक् प्रवक्ष्यामि यथा देवश्चकार सः ॥ ४ ॥

पुरा चादियुगे देवो देवनिर्णयतत्परः ।
अनेकयुगपर्यन्तमुद्धृते प्रलये पृथक् ॥ ५ ॥

निममे तु जगत्यस्मिन् तोयं संहर्तुमुद्यतः ।
महामत्स्यमभूत्सर्वमुपसंहृतवान् जलम् ॥ ६ ॥

वेदानपि समुद्धर्तुं मत्स्यरूपोऽभवत्तथा ।
आदाण्डमभूद्यत्तद्धेमरूपं महत्तरम् ॥ ७ ॥

सहस्रयुगपर्यन्तमेकमण्डं व्यवस्थितम् ।
तदण्डचलनं दृष्ट्वाऽचिन्तयद्भगवान् हरिः ॥ ८ ॥

तदण्डभरणार्थाय कूर्मरूपोऽभवत्पुरा ।
एतयोश्च द्वयो रूपं कारयित्वाऽर्चयेत्क्रमात् ॥ ९ ॥

अर्चनाच्चावताराणामादिमूर्त्यर्चनं भवेत् ।
ग्रामे वा नगरे वाऽपि पत्तने खर्वटेऽपि वा ॥ १० ॥

नदीतीरेऽथवा कुर्यात्पर्वते वा वनेऽथवा ।
सेनामुखे च कुटिके तीरे वाऽब्धेस्तथैव च ॥ ११ ॥

एतेषां स्थापनं कुर्यात्प्रशस्ते रमणीयकम् ।
कुम्भाकारे त्रिकूटे वा हस्तिपृष्ठेऽथवा पुनः ॥ १२ ॥

नन्द्यावर्तविमाने वा मण्टपे वाऽथ कारयेत् ।
कर्षणादीनि कर्माणि पूर्वोक्तानि समाचरेत् ॥ १३ ॥

ध्रुववेरं तु मत्स्यं च कूर्मरूपं च कारयेत् ।
विष्णुं पूर्ववदासीनं स्थितं वाऽपि विधानतः ॥ १४ ॥

नवभेदेष्वथैकेन कौतुकं कारयेद्बुधः ।
मत्स्यं च कूर्मरूपं च कौतुकं न समाचरेत् ॥ १५ ॥

औत्सवं स्नापनं चैव बिम्बं कुर्याच्चतुर्भुजम् ।
एषां च स्थापनामार्गं पूर्ववत्सम्यगाचरेत् ॥ १६ ॥

विशेषं तु प्रवक्ष्यामि तच्छृणुध्वं समाहिताः ।
मत्स्यस्य स्थापनं कुर्याद्विशेषः पद्मकुण्डके ॥ १७ ॥

हौत्रं तत्र प्रशस्यैव मूर्त्याबाहनमाचरेत् ।
मत्स्यं विष्णुं तथा भद्रं क्रीडात्मकमिति क्रमात् ॥ १८ ॥

आवाह्य विधिना विद्वान्निरूप्याज्याहुतीर्यजेत् ।
यत्स्वयंसृष्टमित्युक्त्वा शतमष्टोत्तरं यजेत् ॥ १९ ॥

अर्चनं चोत्सवं चैव स्नपनं बलिमेव च ।
पूर्वोक्तेनैव कृत्वा तु तत्तन्मूर्तिभिरर्चयेत् ॥ २० ॥

कूर्मस्य गार्हपत्याग्नौ हौत्रशंसनमाचरेत् ।
अकूपारं च कूर्मं च विष्णुं च वसुधाधरम् ॥ २१ ॥

इत्येवमुक्त्वा चावाह्य निरुप्याज्याहुतीर्यजेत् ।
रायामीशेति मन्त्रेण शतमष्टोत्तरं यजेत् ॥ २२ ॥

अर्चनादीनि कर्माणि पूर्ववत्सम्यगाचरेत् ।
मत्स्यः कूर्मो भवेद्विष्णुस्तस्माद्विष्णोरिव द्वयोः ॥ २३ ॥

प्रतिष्ठां चार्चनं चैव स्नपनं चोत्सवं तथा ।
पूर्वोक्तेन विधानेन तत्सर्वं सम्यगाचरेत् ॥ २४ ॥

वराहस्त्रिविधः प्रोक्तो देवस्याविर्भवः क्रमात् ।
तथैवादिवराहश्च वराहः प्रलयात्मकः ॥ २५ ॥

यज्ञवराह इत्येवं त्रिविधः परिकीर्तितः ।
देवमानुषतिर्यग्भिः स्थावरं जङ्गमानि च ॥ २६ ॥

पुरा सृष्टा यथा सर्वे चत्वारो भेदतः क्रमात् ।
जरायुजाण्डजाश्चैवोद्भिज्जजाः स्वेदजादयः ॥ २७ ॥

एवं प्रवर्तमाने तु महिरत्यन्तपीडिता ।
मग्ना रसाख्यं साक्षाद्धरिध्यानेन सङ्गता ॥ २८ ॥

रसातलगतां स्मृत्वा तत्समुद्धारणाय च ।
महावराहरूपेण महीमुद्धृतवान् हरिः ॥ २९ ॥

दशतालेन मानेन देवं तत्क्रोडरूपिणम् ।
मुखं वराहरूपं तु किरीटमकुटान्वितम् ॥ ३० ॥

सर्वाभरणसंयुक्तं चतुर्भुजसमायुतम् ।
शङ्खचक्रधरं देवं नीलाम्बुदघनच्छविम् ॥ ३१ ॥

वामं पादं समाकुञ्च्य महीमुद्वाह्य वेगतः ।
दक्षिणं च स्थितं कुर्यान्महीमूर्ध्नौ समाचरेत् ॥ ३२ ॥

हरेर्दक्षिणहस्ते तु देवीपादौ धृतौ यथा ।
तस्याः कण्ठबहिःपार्श्वे सव्यमाधारवच्चरेत् ॥ ३३ ॥

मुखेन मूर्ध्नि जिघ्रन्तं वराहं तत्र कारयेत् ।
महीं च श्यामवर्णाभां पद्मतालविधानतः ॥ ३४ ॥

पुष्पाम्बरसमायुक्तां सर्वाभरणभूषिताम् ।
प्राञ्जलीकृतहस्ताभ्यां कुर्वन्तीं वन्दनं हरेः ॥ ३५ ॥

संप्रसारितपादां च महीं तत्र समाचरेत् ।
एवमादिवराहं तु कारयेल्लक्षणान्वितम् ॥ ३६ ॥

अवतारमनुप्राप्तं कल्पान्तप्रलयं विदुः ।
तत्तोयमुपसंहर्तुं वाराहं रूपमास्थितम् ॥ ३७ ॥

वदन्ति तस्मात्प्रलयवराहं तु पुरातनाः ।
कारयेत्पीतवर्णं तु तोयं येनोपसंहृतम् ॥ ३८ ॥

शङ्खचक्रधरं सम्यक् चतुर्भुजधरं हरिम् ।
दक्षिणं चाभयं हस्तं वामं कट्यवलम्बितम् ॥ ३९ ॥

महीं च दक्षिणे कुर्यात्सव्यहस्ते च दक्षिणे ।
वामकट्यवलम्बं च सस्यश्यामनिभं तथा ॥ ४० ॥

नीलाम्बरधरं देवं पुष्पाम्बरधरां महीम् ।
सुखासनक्रमेणैवमासीनौ तौ च कारयेत् ॥ ४१ ॥

वामभागे स्थितं कुर्यान्नारदं नवतालतः ।
नारदं रक्तवर्णाभं वीणाहस्तं तु कारयेत् ॥ ४२ ॥

मार्कण्डेयं भृगुं चैव पूजकौ तौ समाहरेत् ।
पुष्यं पीतनिभं कुर्याद्भृगुमग्निनिभं चरेत् ॥ ४३ ॥

एवं प्रलयवाराहो वक्ष्ये यज्ञवराहकम् ।
हिरण्याक्षोऽथ दैत्येन्द्रो बलवान् बलिनां वरः ॥ ४४ ॥

वरेण दर्पो दुर्बुद्धिर्यज्ञविद्वेषकोऽभवत् ।
तद्वधं कृतवान्विष्णुर्नरसूकरमूर्तिमान् ॥ ४५ ॥

हत्वा तु सबलं दैत्यं पश्चाद्यज्ञं व्यवर्धयत् ।
तस्माद्यज्ञवराहस्तु तं च कुर्याद्विधानतः ॥ ४६ ॥

श्वेतं यज्ञवराहं तु दशतालेन मानतः ।
श्रीभूमीसहितं कुर्यात्तद्वर्णैस्तद्विभूषणैः ॥ ४७ ॥

सुखासने समासीनं यज्ञवाराहमव्ययम् ।
यज्ञतीर्थावितिख्यातौ ऋषी तत्र च पूजकौ ॥ ४८ ॥

यज्ञमग्निनिभं कुर्यात्तीर्थं श्वेतनिभं तथा ।
तत्तद्रूपं प्रकुर्वीत कौतुकं लक्षणान्वितम् ॥ ४९ ॥

त्रयाणां च वराहाणां स्थापनाभेद उच्यते ।
पूर्वोक्तेनैव मार्गेण सर्वं कृत्वा यथाविधि ॥ ५० ॥

सभ्यकुण्डे तथा कुर्यादाधारं वैश्वदैविकम् ।
हौत्रं तत्र प्रशंस्यैव मूर्त्याबाहनमाचरेत् ॥ ५१ ॥

वराहं वरदं विष्णुमुर्वीसन्धारणं तथा ।
वज्रदंष्ट्रिणमित्युक्त्वा देवमादिवराहकम् ॥ ५२ ॥

महीं गां पृथिवीमुर्वीमिति देवीं महीमपि ।
आवाहयेद्यथाऽन्यांस्तु देवान् पूर्ववदाह्वयेत् ॥ ५३ ॥

वराहं प्रलयहणं भूमीशं विष्णुमित्यपि ।
जगत्त्रायकमित्युक्त्वा वाराहं प्रलयात्मकम् ॥ ५४ ॥

वाराहं देवरूपं च यज्ञेशं यज्ञवर्धनम् ।
विष्णुं चेति तथा यज्ञं देवं वाराहमाह्वयेत् ॥ ५५ ॥

यज्ञं क्रतुधरं मुख्यं यज्ञाङ्गमिति यज्ञकम् ।
तीर्थं पापहरं चेति वरदं कामरूपिणम् ॥ ५६ ॥

इति तीर्थं समावाह्य देव्यादीनपि पूर्ववत् ।
आवाहनादीन् सर्वांश्च पूर्ववत्कारयेद्बुधः ॥ ५७ ॥

क्ष्मामेकामिति मन्त्रेण यजेदष्टशतं बुधः ।
अर्चनादीनि सर्वाणि पूर्ववत्कारयेत्क्रमात् ॥ ५८ ॥

एवं त्रिविधरूपं तु स्थापयित्वा समर्चयेत् ।
हरिरेव वराहोऽभूत्तस्मात्सर्वं हरेरिव ॥ ५९ ॥

प्रतिष्ठामर्चनं चापि स्नपनं चोत्सवं तथा ।
त्रिविधस्य वराहस्य सर्वं पूर्ववदाचरेत् ॥ ६० ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे मत्स्यकूर्मवराहाणां स्थापनाविधिर्नामाष्टपञ्चाशोऽध्यायः ॥

एकोनषष्टितमोऽध्यायः ॥

नारसिंहो द्विधा प्रोक्तो गिरिजः स्थूणजस्तथा ।
वरेण गर्वितो दैत्यो हिरण्यकशिपुस्तथा ॥ १ ॥

देवैर्वा मानुषैर्वाऽपि मृगैर्जीवैरजीवकैः ।
दिवा रात्रौ च कुत्रापि वधो नैव ममेति च ॥ २ ॥

एवं वरेण गर्वन्तं दैत्यं देवविरोधिनम् ।
वधं कर्तुं कृतोद्योगश्चिन्तयित्वा हरिः प्रभुः ॥ ३ ॥

तच्छोणितपुराद्ह्वाह्वे पर्वते शृङ्गकोपरि ।
तद्बाधापीडितैर्देवैर्वन्द्यवेदि च हरिः स्वयम् ॥ ४ ॥

नारसिंहवपुः कृत्वा दिवारात्रं व्यपोह्य च ।
सन्ध्यायां च वधं कुर्याद्धुवङ्गे च नखाङ्कुरैः ॥ ५ ॥

बाह्यमाभ्यन्तरं हित्वा जीवाजीवैर्नखैश्शुभैः ।
एवं दैत्यवधं कृत्वा पर्वते पुनरास्थितः ॥ ६ ॥

ब्रह्मेशाद्यैर्यथा देवैः स्तुतिभिश्शान्तिमागतः ।
हरिर्देवैःस्तवैस्तत्र तदेवं रूपमर्च्यताम् ॥ ७ ॥

इति देवैर्वृतो देवो वरमेतं तु दत्तवान् ।
ततस्तमर्चयेद्भक्त्या विजयश्रीविवृद्धये ॥ ८ ॥

पर्वताकृतिके वाऽपि श्रीप्रतिष्ठितकेऽपि वा ।
नारसिंहं प्रकुर्वीत दशतालेन मानतः ॥ ९ ॥

सिंहासने सुखासीनं श्रीभूमिसहितं हरिम् ।
श्वेतवर्णं हरिं कुर्याच्छ्रियं कनकसन्निभाम् ॥ १० ॥

मेदिनीं श्यामवर्णां च सर्वाभरणभूषिताम् ।
नारसिंहं चतुर्बाहुं शङ्खचक्रधरं परम् ॥ ११ ॥

सव्यं दानकरं कुर्याद्वाममूरुप्रतिष्ठितम् ।
अथवा वामपादं तु प्रसार्यैवासनादधः ॥ १२ ॥

दक्षिणं पादमाकुञ्च्य न्यस्य सिंहासनोर्ध्वतः ।
हस्तं च दक्षिणं जानौ दक्षिणे संप्रसाय च ॥ १३ ॥

संन्यस्य वामं बाहोरौ संन्यस्यासीनमेव वा ।
पादौ द्वौ च समाकुञ्च्य न्यस्य सिंहासनोर्ध्वतः ॥ १४ ॥

प्रसार्य हस्तौ द्वौ जान्वोस्तयोरूर्ध्वे निधाय च ।
वस्त्रेण चोरुमाबध्य चासीनं वाऽथ कारयेत् ॥ १५ ॥

भृगुपुण्यौ च पूजार्थं पूजकस्थानमाश्रितौ ।
भृगुश्च रक्तवर्णाभः श्वेताभः पुण्य उच्यते ॥ १६ ॥

ब्रह्मेशावपि वन्दन्तौ दक्षिणोत्तरयोः क्रमात् ।
चतुर्भुजसमायुक्तं नवतालक्रमेण वै ॥ १७ ॥

तत्तद्वर्णसमायुक्तं तत्तच्चिह्नयुतं तथा ।
वाहनं सामवेदं च प्रमुखे संप्रकल्पयेत् ॥ १८ ॥

साम श्यामनिभं कुर्यात्सर्वाभरणभूषितम् ।
भूतीशं नाम गन्धर्वं शेषकास्थानमाश्रितम् ॥ १९ ॥

कारयेद्रक्तवर्णाभं सर्वाभरणभूषितम् ।
श्रीभूमिभ्यां युतं वाऽपि विना वा कारयेद्वरम् ॥ २० ॥

स्थितं वाऽपि समासीनं नारसिंहं समर्चयेत् ।
एवं गिरिज उद्दिष्टः स्थूणजस्संप्रवक्ष्यते ॥ २१ ॥

ततः काले प्रयाते तु हिरण्याख्योऽसुरः पुरा ।
निर्दैवत्यवरादेव हिरण्यारव्यस्तु दानवः ॥ २२ ॥

देवानृषीन्मनुष्यांश्च सदा सर्वानपीडयत् ।
तद्दैत्यस्य वधं कर्तुं क्रोधाविष्टो महाबलः ॥ २३ ॥

स्थूणान्तरप्रविष्टस्सन्नारसिंहवपुर्बभूत् ।
स्थूणजं नारसिंहं च स्थापयेज्जयसिद्धये ॥ २४ ॥

सर्वभीत्यशुभानां च रोगाणां नाशनाय च ।
महापद्मविमाने वा स्वस्तिके भद्रकेऽथवा ॥ २५ ॥

दशतालेन मानेन समासीनं च कारयेत् ।
वामपादं समाकुञ्च्य दक्षिणं संप्रसार्य च ॥ २६ ॥

चतुर्भुजधरं देवं शङ्खचक्रधरं वरम् ।
हस्तं तु दक्षिणं पूर्वं कुर्याद्दानकरं तथा ॥ २७ ॥

वामहस्तं प्रसार्यैव तदूरौ च सुसंन्यसेत् ।
सटास्कन्दनसंयुक्तं तीक्ष्णदंष्ट्रं भयानकम् ॥ २८ ॥

शङ्खकुन्देन्दुधवले सर्वाभरणभूषितम् ।
सिंहासने समासीनमुपधानसमायुते ॥ २९ ॥

ब्रह्मेशौ कोपशान्त्यर्थं वन्दन्तौ तौ चतुर्भुजौ ।
कुर्यान्नवार्धतालेन प्राञ्जलीकृत्य सुस्थितौ ॥ ३० ॥

कुण्डिकामक्षमालां च धरन्तं च पितामहम् ।
मृगं च परशुं पाणौ धरन्तं शङ्करं तथा ॥ ३१ ॥

दक्षिणोत्तरयोर्द्वौ च कारयेत विधानतः ।
यज्ञतीर्थौ समाख्यातौ पूजकौ तु समाचरेत् ॥ ३२ ॥

प्रह्लादं दक्षिणे कुर्यात्प्राञ्जलीकृत्य सुस्थितम् ।
उत्तरे लोकपालांश्च भितौ देवप्रणामकान् ॥ ३३ ॥

नारसिंहमिदं रूपं पश्चात्स्थापनमुच्यते ।
यद्यद् ध्रुवस्य रूपं तु तत्तद्रूपं तु कौतुकम् ॥ ३४ ॥

सर्वं कृत्वा विधानेन प्रतिष्ठां सम्यगाचरेत् ।
नारसिंहप्रतिष्ठायामग्नावाहवर्नायके ॥ ३५ ॥

हौत्रं तत्र प्रशस्यैव मूर्त्यावाहनमाचरेत् ।
नारसिंहं तपोनाथं हरिं विष्णुं महाबलम् ॥ ३६ ॥

भक्तवत्सलमित्युक्त्वा नारसिंहं समाह्वयेत् ।
श्रियं महीं च पूर्वोक्तौ भृगुपुण्यौ तथैव च ॥ ३७ ॥

ब्रह्मेशानौ समावाह्य धात्रादीन् द्वारपालकान् ।
समं शान्तं सुखं चेति गुरुं सर्वमुदारधीः ॥ ३८ ॥

भूतेशं दिव्यराजानं विष्णुभक्तं महाबलम् ।
इत्येवमुक्त्वा चावाह्य निरूप्याज्याहुतीर्यजेत् ॥ ३९ ॥

यो वा नृसिंह इत्युक्त्वा शतमष्टाधिकं यजेत् ।
अर्चनं च तथा मन्त्रैरुक्तेषु पूर्ववदाचरेत ॥ ४० ॥

नारसिंहो हरिर्यम्मार्प्रतिष्ठामर्चनादिकम् ।
स्नपनं चोत्सवं चापि सर्वं पूर्ववदाचरेत् ॥ ४१ ॥

वैरोचनसुतोऽत्युग्रो बली च बलिनां वरः ।
सर्वान्देवांश्च जित्वैव देवलोकमुपाव्रजत् ॥ ४२ ॥

देवानिन्द्रादिकांश्चैव निर्वार्यानकरोद्बलात् ।
तद्बलस्यापहारार्थं जातोऽयं कश्यपस्य तु ॥ ४३ ॥

हरिर्वामनरूपेण छत्री दण्डी च वेदवित् ।
वर्तमाने महायज्ञे बलेर्वैरोचनस्य वै ॥ ४४ ॥

तद्यागशालां संप्राप्य वटुरूपस्सुरेश्वरः ।
कुं देहि त्रिपदं मह्यमित्युक्त्वा तमयाचत ॥ ४५ ॥

बलिश्च तस्मै त्रिपदं प्रादात्तोयेन वै ततः ।
हस्ते तोये पतत्याशु भद्ररूपमवाप्य सः ॥ ४६ ॥

त्रिलोके त्रिपदन्यासात्सर्वलोकानुपादधे ।
देवैस्त्रिविक्रमं रूपं सर्वलोकेषु संदधे ॥ ४७ ॥

त्रिविक्रमस्त्रिधा प्रोक्तः प्रथमश्च द्वितीयकः ।
तृतीयश्चेति तद्रूपं यथेष्टं कारयेद्बुधः ॥ ४८ ॥

सोमच्छन्दविमाने वा दीर्घशालाविमानके ।
कूटे वा गोपुराकारे स्थापनं सम्यगाचरेत् ॥ ४९ ॥

दशतालेन मानेन चाष्टहस्तसमन्वितम् ।
चतुर्भुजं वा देवेशं श्यामलाङ्गं च कारयेत् ॥ ५० ॥

गदाचक्रासिशक्तीश्च शरं शङ्खं च शार्ङ्गकम् ।
हस्तैर्धारयमाणं तु महारूपधरं हरिम् ॥ ५१ ॥

वामपादं प्रसार्यैव दक्षिणेन च सुस्थितम् ।
सर्वाभरणसंयुक्तं हर्षवेगसमन्वितम् ॥ ५२ ॥

एवमष्टभुजं कुर्यादथ वक्ष्ये चतुर्भुजम् ।
चतुर्भुजं वा हस्ताभ्यां शङ्खचक्रधरं परम् ॥ ५३ ॥

हस्तं दक्षिणमादानपरं चान्यं प्रसारितम् ।
स्थितं च दक्षिणं पादं वाममूर्ध्वं प्रसारितम् ॥ ५४ ॥

तत्प्रसारितपादोर्ध्वं हस्तं सम्यक्प्रसारितम् ।
इन्द्रं छत्रधरं सम्यगाकाशे तु प्रकल्पयेत् ॥ ५५ ॥

पार्श्वयोश्च यमं चापि वरुणं पूजकौ तथा ।
जानुमात्रोद्धृते पादे प्रथमस्त्वभिधीयते ॥ ५६ ॥

नाभिमात्रोद्धृते पादे द्वितीयं परिचक्षते ।
पादे ललाटमात्रे तु तृतीयं तु त्रिविक्रमम् ॥ ५७ ॥

उक्तेष्वेतेषु रूपेषु रूपमिष्टं प्रकल्पयेत् ।
त्रिविक्रमस्य ब्रह्माणमूर्ध्वपादं प्रगृह्य च ॥ ५८ ॥

प्रक्षालनपरं कुर्यात् स्रोतोगङ्गां विहायसि ।
प्राञ्जलीकृतहस्तं च नाभेरूर्ध्वशरीरगम् ॥ ५९ ॥

तस्य पादोर्ध्वतः कुर्यान्नमुचिं भ्रममाणकम् ।
स्थितपादं तु वामे च शुक्रं विघ्नकरं तथा ॥ ६० ॥

तदूर्ध्वे गरुडं कुर्याच्छुकं मुष्टिप्रहारकम् ।
दक्षिणे तु स्थितं कुर्याद्वटुरूपं तु वामनम् ॥ ६१ ॥

छत्रदण्डधरं पुण्यं शिखाकौपीनवाससम् ।
पार्श्वे बलिं च दातारमञ्जलिभ्यां घटोदकम् ॥ ६२ ॥

सर्वाभरणसंयुक्तं हर्षयुक्तं समाचरेत् ।
नीलाभं जाम्बवन्तं च कारयेद्वानराकृतिम् ॥ ६३ ॥

इन्द्रं श्यामनिभं कुर्याद्यममञ्जनसन्निभम् ।
वरुणं श्यामवर्णं तमादित्यं चाग्निसन्निभम् ॥ ६४ ॥

श्वेतं निशाकरं कुर्याद्ब्रह्माणं पीतवर्णकम् ।
गङ्गां तु श्वेतवर्णाभां नमुचिं श्याममाचरेत् ॥ ६५ ॥

शुक्रं शुक्रनिभं कुर्याद्गरुडं पञ्चवर्णकम् ।
वामनं च तथा श्यामं बलिं कनकसन्निभम् ॥ ६६ ॥

एवं त्रिविधरूपं तु स्वेच्छया कारयेद्बुधः ।
त्रिविक्रमप्रतिष्ठायामन्वाहार्याग्निकुण्डके ॥ ६७ ॥

हौत्रे प्रशस्य तत्काले मूर्त्यावाहनमाचरेत् ।
त्रिविक्रमं त्रिलोकेशं विष्णुं सर्वधरं त्विति ॥ ६८ ॥

वैकुण्ठं चेति चावाह्य निरूप्याज्याहुतीर्यजेत् ।
वामनं वरदं विष्णुं काश्यपं चादितिप्रियम् ॥ ६९ ॥

अन्येषामपि देवानां तन्मूर्त्यावाहनं चरेत् ।
तथाऽऽकाशस्थदेवानां तत्तद्देवाननुस्मरन् ॥ ७० ॥

तत्तद्देशे तथा पीठे तदुद्दिश्य समर्चयेत् ।
यो वा त्रिमूर्तिरित्युक्त्वा शतमष्टाधिकं यजेत ॥ ७१ ॥

स्थापनादीनि सर्वाणि विष्णुसूक्तेन कारयेत् ।
अनुक्तमत्र सर्वं तु पूर्वोक्तेन विधानतः ॥ ७२ ॥

प्रतिष्ठामर्चनादीनि स्नपनं चोत्सवं तथा ।
कारयेद्भक्तितः सर्वं हरेस्त्रैविक्रमस्य तु ॥ ७३ ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे नारसिंहत्रिविक्रम-
प्रतिष्ठाविधिर्नामैकोनषष्टितमोऽध्यायः ॥

षष्टितमोऽध्यायः ॥

ततः कालेऽप्यतीते तु भूमिर्भारावपीडिता ।
दुरात्मभिश्च बहुभी राजभिर्धरणीश्वरैः ॥ १ ॥

तद्वधाय कृतोद्योगो जमदग्निसुतो हरिः ।
भूत्वाऽवतीर्णो लोकेऽस्मिन् भारनिर्हरणाय वै ॥ २ ॥

परशुं च गृहीत्वैव नृपान् सर्वान् प्रगृह्य च ।
जघान किल सर्वांश्च रामो भीमपराक्रमः ॥ ३ ॥

देवं परशुरामं तं स्थापयेच्छत्रुनाशनम् ।
मालाकारविमाने वाऽप्यङ्गनाकृतिकेऽपि वा ॥ ४ ॥

दशतालेन तं रामं भुजद्वयसमायुतम् ।
दक्षिणे परशुं हस्ते वाममुद्देश्यकं तथा ॥ ५ ॥

रक्तवर्णं प्रकुर्वीत जटामकुटभूषितम् ।
नीलाम्बरधरं देवमेकवीरक्रमेण च ॥ ६ ॥

आसीनं वा स्थितं वाऽपि कारयेत् विधानतः ।
तद्रूपं कौतुकं कुर्याद्दृषी तत्परितो लिखेत् ॥ ७ ॥

अन्वाहार्ये प्रधानाग्नौ तन्मूर्त्याविाहनं चरेत् ।
राम ऋषिसुत इति विष्णुं परशुपाणिनम् ॥ ८ ॥

इत्येवमुक्त्वा चावाह्य निरूप्याज्याहुतीर्यजेत् ।
विष्णुरेरिष्ट इत्युक्त्वा सप्तत्येकोत्तरं यजेत ॥ ९ ॥

शिष्टानि सर्वकर्माणि पूर्ववत्सर्वमाचरेत् ।
प्रतिष्ठामर्चनादीनि स्नपनं चोत्सवं तथा ॥ १० ॥

पूर्वोक्तेन विधानेन सर्वमन्यच्च कारयेत् ।
अथवा प्रादुर्भावेषु रामादिषु च पञ्चसु ॥ ११ ॥

सभ्याग्निं पौण्डरीकाग्निं विनाऽन्यांश्चतुरः क्रमात् ।
अग्नीनाहवनीयादीन् कल्पयेदिति केचन ॥ १२ ॥

राक्षसैर्बहुभिर्मुख्यै रावणादिमहाबलैः ।
देवाः संपीडितास्सर्वे मुनयश्चाखिलास्तथा ॥ १३ ॥

त्रिदिवैर्मुनिभिस्सर्वैः संस्तुतो हरिरव्ययः ।
तद्वधाय कृतोद्योगो मानुषं रूपमास्थितः ॥ १४ ॥

दशरथस्य सुतो भूत्वा सोऽवधीत्तांस्तु राक्षसान् ।
हत्वा दाशरथी रामस्सर्वलोकमपालयत ॥ १५ ॥

आलये मण्डपे वाऽपि कूटे वाऽपि तथैव च ।
देवं रामं च रक्षार्थं स्थापयेच्च विधानतः ॥ १६ ॥

सार्धाष्टतालमानेन रघुरामं प्रकल्पयेत् ।
द्विभुजं श्यामवर्णं च त्रिभङ्गेन च सुस्थितम् ॥ १७ ॥

शरं दक्षिणहस्तेन चापं वामेन धारिणम् ।
सर्वाभरणसंयुक्तं किरीटमकुटान्वितम् ॥ १८ ॥

पीतवर्णां तथा चैव सर्वाभरणभूषिताम् ।
पद्मं वामेन हस्तेन गृहीत्वा दक्षिणं करम् ॥ १९ ॥

प्रसार्यैव स्थितां देवीं सीतां दक्षिणतस्तथा ।
वामे च लक्ष्मणं कुर्यादष्टतालेन मानतः ॥ २० ॥

कारयेत्तं शरं चापं धारयन्तं स्थितं तथा ।
सर्वाभरणसंयुक्तं रुक्मवर्णं च लक्ष्मणम् ॥ २१ ॥

पिङ्गलाभं हनूमन्तं विज्ञापनपरं कपिम् ।
दक्षिणेन करेणास्यं पश्चादन्येन वाससम् ॥ २२ ॥

ऊरुमध्येऽवकुण्ठ्यैव दीनमूर्ध्वाननं स्थितम् ।
दक्षिणे कपिराजं वा कृत्वा तद्रूपमर्चयेत् ॥ २३ ॥

एवं सायुधमार्गं तु वक्ष्ये तत्र निरायुधम् ।
सिंहासने सुखासीनं देवं देवीं यथाविधि ॥ २४ ॥

वामतो लक्ष्मणं कुर्यात्प्राञ्जलीकृत्य सुस्थितम् ।
दक्षिणे कपिराजं तं मार्ताण्डाभं च सुस्थितम् ॥ २५ ॥

स्थितं च कौतुकं कुर्यादासीनं वाऽपि कारयेत् ।
सायुधे सायुधं तद्वत्कौतुकं च समाचरेत् ॥ २६ ॥

अतः परं प्रवक्ष्यामि स्थापनारम्भमुत्तमम् ।
एकस्मिन् काञ्चने कुम्भे त्रयाणां ध्यानमाचरेत् ॥ २७ ॥

तस्य देवस्य देव्याश्च शयनं त्वेकमुच्यते ।
तद्वेद्यां लक्ष्मणस्यापि शयनं तु पृथग्भवेत् ॥ २८ ॥

दक्षिणाग्नौ प्रधाने तु हौलशंसनमाचरेत् ।
रामं दाशरथिं विष्णुं काकुत्स्थमिति चाह्वयेत् ॥ २९ ॥

रामानुजं च सौमित्रिं लक्ष्मणं लक्ष्मीवर्धनम् ।
सीतामयोनिजां चेति लक्ष्मीं वैदेहीमित्यपि ॥ ३० ॥

कपिराजं हनूमन्तं शब्दराशिं महामतिम् ।
इत्यावाह्य विधानेन निरूप्याज्याहुतीर्यजेत् ॥ ३१ ॥

रायामीशेति मन्त्रेण शतमष्टोत्तरं यजेत् ।
शेषाणि सर्वकार्याणि पूर्ववत्कारयेद्बुधः ॥ ३२ ॥

हरिरेव भवेद्रामस्तस्मात्सर्वं हरेरिव ।
प्रतिष्ठामर्चनादीनि स्नपनं चोत्सवं तथा ॥ ३३ ॥

पूर्वोक्तेन विधानेन सर्वमन्यं च कारयेत् ।
एतस्य पौण्डरीकाग्निं सभ्याग्निं च विना क्रमात् ॥ ३४ ॥

अग्नीनाहवनीयादीन् कल्पयेदिति केचन ।
मधुमासे च नक्षत्रे पूर्वपक्षे पुनर्वसौ ॥ ३५ ॥

मध्याह्ने कर्कटे लग्ने जातो रामः स्वयं हरिः ।
सा जयन्तीति विख्याता तस्यां रामस्य भक्तितः ॥ ३६ ॥

सीतालक्ष्मणसंयुक्तं सर्वालङ्कारसंयुतम् ।
यानमारोप्य तद्रामं कारयेत प्रदक्षिणम् ॥ ३७ ॥

देवालयं प्रविश्यैव स्थापयित्वा सहैव तान् ।
महाहविः प्रभूतं वा देवेशाय निवेदयेत् ॥ ३८ ॥

रामस्य देववच्चैव राजवच्च तथैव च ।
उपचारान् विशेषेण कारयेदिति शासनम् ॥ ३९ ॥

सीताया लक्ष्मणस्यापि पृथक् स्यात्स्थापना यदि ।
सीतायाश्च प्रतिष्ठायां लक्ष्मीवत्सर्वमाचरेत् ॥ ४० ॥

लक्ष्मणस्य प्रतिष्ठायां रामवत्सर्वमाचरेत् ।
हरिर्यथैव रामोऽभूत् श्रीश्च सीताऽभवत्तथा ॥ ४१ ॥

पृथक् प्रतिष्ठा श्रीदेव्याः पूर्वं प्रोक्ता तथैव च ।
पृथक् प्रतिष्ठा सीतायास्तथा सर्वं समाचरेत् ॥ ४२ ॥

तस्माद्रामस्य तस्यांशो लक्ष्मणश्चेद्भवेत्ततः ।
हरेरंशांशभागोऽयं लक्ष्मणश्च प्रकीर्तितः ॥ ४३ ॥

विशेषमत्र वक्ष्यामि शयने राघवस्य तु ।
प्राङ्मुख्याश्चैव सीताया ऊरौ (विन्यस्य) मस्तकम् ॥ ४४ ॥

तत्काले लक्ष्मण देवं पाद (संवाहने रतम्) ।
हसन्मुखं राघवस्य पीडयन्तं पदाम्बुजौ ॥ ४५ ॥

नित्ये नैमित्तिके काम्ये स्नपने चोत्सवे तथा ।
शयनं यत्र संप्रोक्तं तत्रैवं विधिरुच्यते ॥ ४६ ॥

मूर्तिमन्त्रो विशेषस्तु सर्वमन्यत्समं भवेत् ।
वायोरंशात्कपिर्मुख्यो हनूमानभवत्ततः ॥ ४७ ॥

हनूमतः प्रतिष्ठां तु वायोरिव समाचरेत् ।
तृतीयं राममप्येवं यदुश्रेष्ठं महाबलम् ॥ ४८ ॥

बलभद्रं विदुः सोऽपि दैत्यानां वधहेतुना ।
भारावतरणार्थाय भुवो रामस्तथैव च ॥ ४९ ॥

कृष्णोऽपि वसुदेवस्य सुतो भूत्वाऽवतीर्य च ।
हत्वा नरकंसादीन् सर्वान् लोकानपालयत् ॥ ५० ॥

एवं हलधरं रामं ततुं संसारसागरम् ।
सोमच्छन्दविमाने तु हस्तिपृष्ठेऽथवा पुनः ॥ ५१ ॥

एकवेरविधानेन कृष्णस्यार्धासने तु वा ।
दशतालेन मानेन श्वेताद्रिशिखरोपमम् ॥ ५२ ॥

द्विभुजं च तथा कुर्यान्मुसलं दक्षिणेन तु ।
हलं वामेन हस्तेन धारयन्तं यथानतम् ॥ ५३ ॥

कुर्यात्सायुधमेवं तु वक्ष्यान्यथ निरायुधम् ।
प्रसार्य दक्षिणं पादं वामं कुञ्चितमाचरेत् ॥ ५४ ॥

सव्यं चाभयहस्तं तु वाममूरौ समाचरेत् ।
तथैव रेवतीं कुर्यान्नीलोत्पलसमप्रभाम् ॥ ५५ ॥

पद्मं दक्षिणहस्तेन गृहीत्वाऽन्यं तथैव च ।
ऊरौ विन्यस्य चासीनां रेवतीं च शुभाननाम् ॥ ५६ ॥

सर्वाभरणसंयुक्तं देवं देवीसमन्वितम् ।
एवं तु कौतुकं कृत्वा स्थापनं सम्यगाचरेत् ॥ ५७ ॥

अग्नावाहवनीये तु हौत्रशंसनमाचरेत् ।
रामं यदुवरं विष्णुं हलायुधमिति क्रमात् ॥ ५८ ॥

रेवतीमिन्दिरां चेति लक्ष्मीं रामप्रियामिति ।
आवाहनादि कृत्वा तु क्षमामेकां तु शतं यजेत् ॥ ५९ ॥

हरेरंशाद्भवेद्रामस्तस्मात्सर्वं हरेरिव ।
प्रतिष्ठामर्चनादीनि स्नपनं चोत्सवं तथा ॥ ६० ॥

पूर्वोक्तेन विधानेन कारयेदिति शासनम् ।
अस्यापि पौण्डरीकाग्निं सभ्याग्निं च विना क्रमात् ॥ ६१ ॥

अग्नीनाहवनीयादीन् कारयेदिति केचन ।
सर्वेकामं यदीच्छेत्तु कृष्णं सम्यक्समाचरेत् ॥ ६२ ॥

कुम्भाकारविमाने वा कूटे वा गोपुराकृतौ ।
नवतालेन मानेन कृष्णं सम्यक्समाचरेत् ॥ ६३ ॥

श्रीधरं श्यामलाङ्गं च द्विभुजं रक्तवाससम् ।
क्रीडायष्टिधरं कुर्याद्दक्षिणेनैव पाणिना ॥ ६४ ॥

वाममुत्क्रीडनं कृत्वा लीलयैव च सुस्थितम् ।
सर्वाभरणसंयुक्तं सुन्दरं सौम्यलोचनम् ॥ ६५ ॥

रुक्मिणीं दक्षिणे देवीं सत्यभामां च वामतः ।
रक्तपीतनिभे देव्यौ कृष्णं पीताम्बरावृतम् ॥ ६६ ॥

सर्वाभरणसंयुक्तं बाहुमानेन कारयेत् ।
दक्षिणे रुक्मिणीं वाऽथ भूमिं कुर्याच्च वामके ॥ ६७ ॥

वामपार्श्वे स्थितं कुर्याद्गरुडं प्राञ्जलीकृतम् ।
ध्रुवबेरानुरूपेण कौतुकं च समाचरेत् ॥ ६८ ॥

सिंहासने सुखासीनं देवीभ्यां च सहासने ।
पूर्वोक्तेन विधानेन सर्वं कृष्णस्य चाचरेत् ॥ ६९ ॥

नवनीतनटं वाऽथ तथा कालियमर्दनम् ।
पार्थसारथिरूपं वा बिम्बं सम्यक्च कारयेत् ॥ ७० ॥

नृत्यन्तं बालरूपं च सर्वाभरणभूषितम् ।
तथाऽम्बराञ्चलेनैव ग्रन्थियुक्तेन संयुतम् ॥ ७१ ॥

कुञ्चितं दक्षिणं पादं किञ्चिदुद्धृत्य वै पुनः ।
किञ्चित्कुञ्चितवामेन स्थित्वा नृत्यन्तमेव तम् ॥ ७२ ॥

अभयं दक्षिणं हस्तं नवनीतयुतं तु वा ।
वामं प्रसार्य चोत्तानं नवनीतनटं तु वा ॥ ७३ ॥

गोपीं च वामतः कुर्यान्मथ्नन्तीं च महादधि ।
फणानां पञ्चसंयुक्तं कालियस्य शिरोपरि ॥ ७४ ॥

नृत्यरूपं तथा कुर्यात्पुच्छं वामकरे धृतम् ।
एकं चाभयहस्तं च सर्वाभरणभूषितम् ॥ ७५ ॥

पादपार्श्वे तथा पत्नीं नागचूलिकमस्तकाम् ।
प्राञ्जलीकृत्य तां कुर्याद्विनैवानम्रमूर्धिकाम् ॥ ७६ ॥

पार्थं गाण्डीवसहितं शततूणीरसंयुतम् ।
रथस्थितं तथा कुर्यात्किरीटाङ्गदभूषितम् ॥ ७७ ॥

सव्यमारोप्य हस्तं तु वीक्ष्य देवस्य चाननम् ।
श्यामवर्णं च तं कुर्यात्केतुवानरभूषितम् ॥ ७८ ॥

रथे मुरलिपार्श्वे तु कृष्णमुद्बद्धकुन्तलम् ।
शङ्खं वामकरे कुर्यादक्षिणे पाशमेव च ॥ ७९ ॥

फल्गुनस्य मुखं वीक्ष्य किञ्चित्सस्मितहर्षितः ।
एवंरूपं च कृत्वैव तद्रूपं कौतुकं चरेत् ॥ ८० ॥

चतुर्भुजं वा कृत्वा तु स्थापनारम्भमाचरेत् ।
कृष्णरूपमसंख्यातं संख्या वक्तुं न शक्यते ॥ ८१ ॥

स्वेच्छारूपं तु कृत्वा तु तद्रूपे तु समर्चयेत् ।
पौण्डरीके प्रधानाग्नौ हौत्रशंसनमाचरेत् ॥ ८२ ॥

कृष्णं नारायणं पुण्यं त्रिदशाधिपमित्यपि ।
एवमेव विधानेन कृष्णस्यावाहनं स्मृतम् ॥ ८३ ॥

रुक्मिणीं सुन्दरीं देवीं रमामिति तथैव च ।
सत्यभामां सतीं चैव सन्नतीं च क्षमामिति ॥ ८४ ॥

इत्येवमुक्त्वा चावाह्य निरूप्याज्याहुतीर्यजेत् ।
सत्यस्सत्यस्य इत्युक्त्वा शतमष्टाधिकं यजेत् ॥ ८५ ॥

स्थापनादीनि सर्वाणि पूर्वोक्तेनैव कारयेत् ।
हरिः कृष्णो भवेद्यस्मात्तस्मात्सर्वं हरेरिव ॥ ८६ ॥

प्रतिष्ठार्चनादीनि स्नपनं चोत्सवं तथा ।
पूर्वोक्तेन विधानेन सर्वमन्यं च कारयेत् ॥ ८७ ॥

अस्यापि पौण्डरीकाग्निं सभ्याग्निं च विना क्रमात् ।
अग्नीनाहवनीयादीन् कल्पयेदिति केचन ॥ ८८ ॥

श्रावणे मासि तस्मिंश्च कृष्णपक्षे विशेषतः ।
अष्टमी रोहिणीयुक्ता जयन्तीति प्रकीर्तिता ॥ ८९ ॥

तत्र स्नात्वोपवासं च कृत्वा कृष्णं च भक्तितः ।
रुक्मिणीसत्यभामाभ्यामलङ्कारैः समायुतम् ॥ ९० ॥

ग्रामप्रदक्षिणं तत्र कारयित्वा यथोचितम् ।
स्नापयित्वा च देवीभ्यामर्चयित्वा यथाक्रमम् ॥ ९१ ॥

महाहविः प्रभूतं वा देवेशाय निवेदयेत् ।
रुक्मिण्यास्सत्यभामायाः पृथक् चेत्स्थापनं भवेत् ॥ ९२ ॥

हरिर्यथैव कृष्णोऽभूद्रुक्मिणी श्रीस्तथाऽभवत् ।
मही च सत्यभामाभूद्देव्यौ देवेन ते ततः ॥ ९३ ॥

पृथक् प्रतिष्ठा श्रीदेव्या यथा प्रोक्ता तथैव च ।
रुक्मिण्यास्स्थापनायां च सर्वं सम्यक् समाचरेत् ॥ ९४ ॥

महीदेव्या यथा प्रोक्ता स्थापनं तु पृथक् तथा ।
सत्यभामाप्रतिष्ठायां सर्वं पूर्ववदाचरेत् ॥ ९५ ॥

अत्रापि मूर्तिमन्त्रैस्तु विशेषोऽन्यत्समं भवेत् ।
युगान्तसमये विष्णुः कल्की चैव भविष्यति ॥ ९६ ॥

खड्गखेटकहस्तस्तु म्लेच्छादीन् स हनिष्यति ।
संहारात्मा स सर्वांश्च दुर्धर्षीतान् मदोद्धतान् ॥ ९७ ॥

पुनरेकार्णवं कृत्वा वटपत्रे शयिष्यति ।
स्थापयेत्कल्किनं विष्णुमालयादिविधिस्तथा ॥ ९८ ॥

पौण्डरीके प्रधानाग्नौ हौत्रशंसनमाचरेत् ।
कल्किनं वररूपं च विष्णुं संहारकात्मकम् ॥ ९९ ॥

इत्येवमुक्त्वा चावाह्य निरूप्याज्याहुतीर्यजेत् ।
धूर्णो वहन्तामित्युक्त्वा शतमष्टाधिकं यजेत् ॥ १०० ॥

प्रतिष्ठामर्चनादीनि पूर्ववत्कारयेद्बुधः ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे परशुरामादिकल्क्यन्त-
प्रतिष्ठाविधिर्नाम षष्टितमोऽध्यायः

एकषष्टितमोऽध्यायः

अतःपरं प्रवक्ष्यामि वासुदेवविधिं परम् ।
वासुदेवो द्विधा भूतः मानुष्यो दैविकस्त्विति ॥ १ ॥

मानुष्यमत्र वक्ष्यामि दैविकं तदनन्तरम् ।
मानुष्यं परमात्मानं द्विभुजं शङ्खचक्रिणम् ॥ २ ॥

श्यामलाङ्गं च तं कुर्यात्सर्वाभरणभूषितम् ।
रुक्मिणीं श्यामलाङ्गां च रक्तवस्त्रां च दक्षिणे ॥ ३ ॥

पद्मं धृत्वा करे वामे प्रसार्यैव स्थितां शुभाम् ।
दक्षिणे बलभद्रं तु हलं मुसलमायुधम् ॥ ४ ॥

सर्वाभरणसंयुक्तं श्वेतं नीलाम्बरावृतम् ।
तस्य दक्षिणपार्श्वे तु प्रद्युम्नं रक्तसन्निभम् ॥ ५ ॥

पीतकौशेयवसनं किरीटं दिव्यभूषणम् ।
असिं दीर्घक्षुरीयुक्तं वामकन्ध्यवलम्बितम् ॥ ६ ॥

वामपार्श्वेऽनिरुद्धं च प्रवालाग्निसमप्रभम् ।
पुष्पाम्बरधरं कुर्यात्कटकं खड्गमायतम् ॥ ७ ॥

पार्श्वे साम्बं च कृत्वैव नीलाम्बुदसमप्रभम् ।
श्वेताम्बरधरं कुर्यादण्डदानकरं तथा ॥ ८ ॥

ब्रह्माणं दक्षिणे कुर्याच्चतुर्भुजसमन्वितम् ।
पूर्वोक्तेनैव कृत्वा तु दशतालेन मानतः ॥ ९ ॥

गरुडं चोत्तरे कुर्यान्नवतालेन मानतः ।
तद्रूपं कौतुकं कुर्यात्सर्वेषां च तथैव च ॥ १० ॥

मध्ये चतुर्भुजं विष्णुमेवं कौतुकमेव वा ।
एवं वै मानुषं रूपं गोपुरे दीर्घशालके ॥ ११ ॥

दैविकं वासुदेवं च प्रवक्ष्यामि यथाक्रमम् ।
सोमच्छन्दविमाने वा ब्रह्मवृत्तेऽथवा पुनः ॥ १२ ॥

चतुर्भुजधरं देवं शङ्खचक्रधरं परम् ।
अभयं दक्षिणे हस्ते वामं कन्ध्यवलम्बितम् ॥ १३ ॥

किरीटादिविभूषाढ्यं भूषणैरपि भूषितम् ।
रक्ताम्बरधरं देवं दशतालेन मानतः ॥ १४ ॥

श्रीभूम्यौ पार्श्वयोर्देव्यौ पूर्ववत्कारयेद्बुधः ।
पूर्वोक्तान् बलभद्रादीन् सायुधान् वा निरायुधान् ॥ १५ ॥

तत्तद्देव्या समायुक्तान् विना वा सम्यगाचरेत ।
रेवतीं दक्षिणे कुर्यात् बलभद्रस्य पार्श्वतः ॥ १६ ॥

रोहिणीं नीलवर्णां च प्रद्युम्नस्यैव पार्श्वतः ।
अनिरुद्धस्य पार्श्वे तु रामां श्यामां तथैव च ॥ १७ ॥

तस्य साम्बस्य पार्श्वे तु पीताभिन्दुकरीमपि ।
गृहीत्वा पुष्पमेकेन हस्तमन्यं प्रसार्य च ॥ १८ ॥

किरीटाभरणैर्युक्ता देवीस्सर्वाश्च कारयेत् ।
रुक्मिणीं नीलवर्णां च प्रद्युम्नं चैव पार्श्वतः ॥ १९ ॥

अनिरुद्धश्चैव पार्श्वे रामश्चापि तथैव च ।
तस्य रामस्य पार्श्वे तु देवान् सर्वांश्च कारयेत् ॥ २० ॥

एवं दैविकमार्गं तु स्थापनारम्भमाचरेत् ।
पूर्ववत्सर्वहोमेषु जुहुयाच्च विधानतः ॥ २१ ॥

ब्रह्मणः पौण्डरीकाग्निं गरुडस्याहवनीयकम् ।
सभ्ये विष्णुं समुद्दिश्य हौत्रशंसनमाचरेत् ॥ २२ ॥

वासुदेवं यदुवरं विष्णुं च पुरुषोत्तमम् ।
रुक्मिणीं सुन्दरीं देवीं रमामिति समाह्वयेत् ॥ २३ ॥

रामं यदुवरं वीरं हलायुधमिति क्रमात् ।
प्रद्युम्नं च सुरूपाक्षं मन्त्रराशिं महाबलम् ॥ २४ ॥

अनिरुद्धं महान्तं च वैराग्यमिति च क्रमात् ।
सर्वतेजोमयं चैवमनिरुद्धं समाह्वयेत् ॥ २५ ॥

साम्बं सर्वमुखं चेति समुद्रं सागरं तथा ।
ब्रह्माणं गरुडं चेति नाम्ना पूर्ववदाह्वयेत् ॥ २६ ॥

एवं मानुषके प्रोक्तं दैविके तु प्रवक्ष्यते ।
विष्ण्वादिमूर्तिभिर्विष्णोः श्रियो मह्यास्तथैव च ॥ २७ ॥

पूर्ववद्बलभद्रादिदेवतानां विशेषतः ।
निर्वापादीनि कृत्वैव पूर्ववज्जुहुयाद्बुधः ॥ २८ ॥

विशेषं चात्र वक्ष्यामि शृणुध्वं मुनिसत्तमाः ।
सभ्ये च वैष्णवं सूक्तं सर्वहोमे च पौरुषम् ॥ २९ ॥

दक्षिणे विष्णुसूक्तं च गार्हपत्ये तथैव च ।
एकाक्षरादिकं सर्वं स्थावसथ्ये तथैव च ॥ ३० ॥

गायत्रीं वैष्णवीं सम्यग् ब्रह्महोमे तथैव च ।
ब्राह्मं गारुडहोमे च गारुडं च तथा यजेत् ॥ ३१ ॥

तत्तद्धोमे तत्तन्मन्त्रैरेकविंशतिकं तथा ।
तद्देवीमन्त्रसंयुक्तं यजेद्देवं विशेषतः ॥ ३२ ॥

कलशैः स्नापनं कुर्यात्तत्तद्धोमसमीपतः ।
मध्ये दक्षिणपार्श्वे तु क्रमादेवं समाचरेत् ॥ ३३ ॥

एष एव विशेषः स्यात्सर्वं पूर्ववदाचरेत् ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे दैविकमानुष्य-
वासुदेवप्रतिष्ठाविधिर्नामैकषष्टितमोऽध्यायः ॥

द्विषष्टितमोऽध्यायः

अतःपरं प्रवक्ष्यामि चादिमूर्तिविधिक्रमम् ।
कुम्भाकारे त्रिकूटे वा नन्द्यावर्तेऽथवा पुनः ॥ १ ॥

अनन्तोत्सङ्ग आसीनं प्रवालाग्निसमप्रभम् ।
वेरायामं त्रिधा कृत्वा तत्रैकं पीठमाचरेत् ॥ २ ॥

अनन्तस्य तु संप्रोक्तान्सप्त पञ्च फणास्तु वा ।
अङ्गोपरि फणाः कृत्वा ऊर्ध्वे सञ्छादकाः क्रमात् ॥ ३ ॥

त्रिवृते सर्पदेहोर्ध्वे समासीनं हरिं परम् ।
वामपादं समाकुञ्च्य दक्षिणं संप्रसार्य च ॥ ४ ॥

शङ्खचक्रधरं कुर्यात्सर्वाभरणभूषितम् ।
सर्पदेहोर्ध्वतः पाणिं दक्षिणं संन्यसेत्तथा ॥ ५ ॥

वामं च कुञ्चितं जानुं न्यसेत्सम्यक्प्रसारितम् ।
विधिनैव समासीनमादिमूर्तिं तु कारयेत् ॥ ६ ॥

भृगुपुण्ड्रौ तथा कुर्यात्पूजकौ स्थानमाश्रितौ ।
एवं योगासनं प्रोक्तं वक्ष्यतेऽथ सुखासनम् ॥ ७ ॥

वामहस्तं तथा वामे जानौ सम्यक्प्रसार्य च ।
हस्तं च दक्षिणं जानौ विन्यसेद्दक्षिणे क्रमात् ॥ ८ ॥

सिंहासने सुखासीनं श्रीभूम्यावपि कारयेत् ।
पूर्वोक्तैर्लक्षणैर्युक्तं सर्वाभरणभूषितम् ॥ ९ ॥

नारसिंहवराहौ द्वौ पूजकौ तु समाचरेत् ।
नवतालक्रमेणैव तत्तद्रूपं प्रकल्पयेत् ॥ १० ॥

प्राञ्जलीकृतहस्तौ तु सर्वाभरणभूषितौ ।
एवं सुखासनं कुर्यात्स्थापनारम्भमाचरेत् ॥ ११ ॥

सभ्याग्नौ च परिस्तीर्य हौत्रं तत्र प्रशंसयेत् ।
शिष्टं तु पूर्ववत्सर्वं कारयेत विधानतः ॥ १२ ॥

पञ्चमूर्तिविधानं तु पूर्वमेव प्रचोदितम् ।
अतः परं प्रवक्ष्यामि चतुर्मूर्तिविधिक्रमम् ॥ १३ ॥

विष्णुमूर्तिं विना मूर्तीश्चतुर्मूर्तीस्तु कारयेत् ।
पूर्वोक्ते च विमाने वै यथोक्ततलसंयुते ॥ १४ ॥

आदिभूमिस्तु सैन्यस्य मध्ये वै नरसिंहकम् ।
अधः प्रागादि परितः पुरुषाद्यास्तु पूर्ववत् ॥ १५ ॥

आसीनास्तुस्थिता वापि चतुर्मूर्तीश्च कारयेत् ।
पञ्चमूर्तिर्यदि भवेदूर्ध्वे वाराह उच्यते ॥ १६ ॥

तृतीये नरसिंहस्तु चतुर्थे शयनं भवेत् ।
पञ्चमे चासनं प्रोक्तं वाराहादेस्तथासनम् ॥ १७ ॥

पुरुषाद्याश्चतुर्दिक्षु तथासीनाः स्थितास्तु वा ।
कर्तुं सप्ततलादूर्ध्वं विमानं न हि शक्यते १८ ॥

सहस्राधिष्ठितग्रामे मध्यमे पञ्चमूर्तिकम् ।
चतुर्मूर्तीस्तु वा कुर्याद्ग्रामवृद्धिकरं भवेत् ॥ १९ ॥

ग्रामादेः पश्चिमे कुर्याच्चतुर्मूर्तीस्तु वा तथा ।
एकमूर्तिस्तु वा कुर्यान्नगरादौ तथैव च ॥ २० ॥

प्रतिष्ठामर्चनादीनि पूर्ववद्विधिना चरेत् ॥

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे आदिमूर्तिविधिर्नाम द्विषष्टितमोऽध्यायः ॥

त्रिषष्टितमोऽध्यायः

अथ गोत्रप्रवरं वक्ष्यामि । विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठ-काश्यपानां सप्तर्षीणामगस्त्याष्टमानामपत्यं गोत्रमुच्यते ।

१. अथ श्रीवत्सानां पञ्चार्षेयः प्रवरो भवति । तेषां भार्गवच्यवनामुवानौर्व-जामदग्न्येति होता वदेत् ।

२. यस्कानां त्र्यार्षेयः—भार्गववैतहव्यसावेदसेति ।

३. (वाध्र्यश्वानाम्)—त्र्यार्षेयः—भार्गववाध्र्यश्वदैवोदासेति ।

४. वैन्यानाम्—त्र्यार्षेयः—भार्गववैन्यपार्थेति ।

५. शुनकानाम्—एकार्षेयः—शौनकेति ।

६. गार्त्समदानाम् एकार्षेयः—गार्त्समदेति ।

७. आङ्गिरसानाम्—त्र्यार्षेयः—आङ्गिरसायास्यगौतमेति ।

८. शरद्वन्तानाम्[1]—त्र्यार्षेयः—आङ्गिरसगौतमशरद्वन्तेति[2] ।

९. कौमण्डगौतमानाम् — पञ्चार्षेयः — आङ्गिरसौच[3]थ्यकाक्षीवतगौतम-कौमण्डेति ।

१०. 'दीर्घतमानाम् — पञ्चार्षेयः — आङ्गिरसौचथ्यकाक्षीवतगौतमदै[5]र्घ-तमसेति ।

११. [6]कारेणुपालिनाम्—त्र्यार्षेयः—आङ्गिरसगौतमकारेणुपालेति ।

१२. औशनसगौतमानाम्—त्र्यार्षेयः—आङ्गिरसौशनसगौतमेति ।

१३. वामदेवानाम्—त्र्यार्षेयः—आङ्गिरसगौतमवामदेवेति ।

1. शारद्वतानाम्—पा.
2. शारद्वतेति—पा.
3. औतथ्य—पा.
4. दीर्घतमसानां. पा.
5. दीर्घतमेति.—पा.
6. कारेणपालि—पा. कारेणुपालानाम्—पा.

एकबेरप्रतिष्ठा चेत् त्रिकालं स्नापनं चरेत् ।
तैलेनाभ्यञ्जनं कृत्वा पश्चात्स्नापनमाचरेत् ॥ १६३
पञ्चविंशतिभिर्भेदैरर्चयेच्च यथाक्रमम् ।
एकबेरन्तु यत्रैव स्नानं तत्रैव कारयेत् ॥ १६४
सन्न्यसेत्कलशांस्तत्र प्रमुखे चोत्तरेऽपि वा ।
स्नपनोक्तविधानेन कलशन्यासमाचरेत् ॥ १६५
मध्ये शुद्धोदकं न्यस्य उदधान्यां विशेषतः ।
आधाय कलशान् सर्वान् गर्भगेहं प्रविश्य च ॥ १६६
देवस्य दक्षिणे भागे स्थित्वा चैवोत्तरामुखः ।
स्नपनोक्तैस्तथा मन्त्रैः मृदाद्यैरभिषेचयेत् ॥ १६७
अन्ते हारिद्रचूर्णेन स्नापयित्वा ततः परम् ।
शुद्धोदैरभिषिञ्चेत्तु शोधयित्वा विशेषतः ॥ १६८
प्लोतेन विमृजेत्पश्चात् वस्त्रालङ्कारमाचरेत् ।
अलङ्कारैरलङ्कृत्य पञ्चविंशतिविग्रहैः ।
अर्चयित्वा यथाशास्त्रं देवेशं प्रणमेत्ततः ॥ १६९

इत्यार्षे श्रीवैखानसे भगवच्छास्त्रे भृगुप्रोक्तायां संहितायां
खिलाधिकारे शूलस्थापनविधिर्नाम
एकादशोऽध्यायः ॥

अथ द्वादशोऽध्यायः

स्थानकासनशयनानि – स्थानकलक्षणम्

अत ऊर्ध्वं प्रवक्ष्यामि स्थानकस्य च लक्षणम् ।
स्थानकं त्रिविधं योगभोगवीरविभेदतः ॥ १

योगस्थानकम्

दैर्घिकन्तु त्रिधा कृत्वा तेषु भागेषु पूर्वतः ।
भागौ द्वावेकभागं वा व्यपोह्यैव तु पश्चिमे ॥ २
भागे संस्थापयेद्विम्बं स्थानकन्तु सुलक्षणम् ।
चतुर्भुजन्तु कृत्वा वै दशतालेन मानतः ॥ ३
सर्वाभरणसंयुक्तं शङ्खचक्रसमन्वितम् ।
सस्यश्यामनिभं कुर्यात्पीताम्बरसमन्वितम् ॥ ४
महीं दक्षिणतः कुर्यादेकजानुक्रमेण वै ।
पुष्पाञ्जलिसमायुक्तामानमन्तीं सदाऽऽदरात् ॥ ५
श्यामवर्णां महीं कुर्यात्पुष्पाम्बरसमन्विताम् ।
वामे पुराणं कुर्वीत एकजानुक्रमेण हि ॥ ६
पुराणञ्च प्रवालाभं जटामण्डलमण्डितम् ।
अक्षमालासमायुक्तं पुष्पाञ्जलिसमन्वितम् ॥ ७
देवदेवं समीक्ष्यैव नित्यं भक्तिसमन्वितम् ।
कुञ्जकौतुकयोर्मध्ये इडापुण्यौ समर्चयेत् ॥ ८
दक्षिणं भित्तिमाश्रित्य ब्रह्माणञ्चैव लेखयेत् ।
शङ्करं लेखयेद्वामे तत्तद्वर्णसमायुतम् ॥ ९

श्रीदेवीं दक्षिणे कुर्यान्महीं वामे च कारयेत् ।
प्रसार्य दक्षिणं पादं वाममाकुञ्चितं चरेत् ॥ २८
पद्मं दक्षिणहस्ते तु वामं कट्यवलम्बितम् ।
किञ्चिद्देवं समीक्ष्यैव श्रीदेवीञ्चापि कारयेत् ॥ २९
वामं पादं प्रसार्यैव दक्षिणं कुञ्चितं चरेत् ।
पद्मं वामे तु सङ्गृह्य देवदेवं समीक्ष्य वै ॥ ३०
सिंहासने सहासीनं देवमुद्वीक्ष्य चादरात् ।
आसीनामासने देवीं महीं कुर्याद्विचक्षणः ॥ ३१
अन्तरं देवदेव्योस्स्यात् भागं तालं यवद्वयम् ।
पृथगासने तथा कुर्याद्भोगभावो न सम्भवेत् ॥ ३२
सिंहासनस्य पृष्ठे तु व्याजिन्यौ भद्रकाजये ।
जयाञ्च दक्षिणे कुर्याद्वामे चैव तु भद्रकाम् ॥ ३३
जयाञ्च श्यामवर्णां तु पुष्पाम्बरधरां शुभाम् ।
हस्ते च दक्षिणे कुर्याच्चामरञ्च विशेषतः ॥ ३४
रक्ताभा भद्रका चोक्ता पीताम्बरवरप्रिया ।
चामरं वामहस्ते तु कुर्यादानम्य चादरात् ॥ ३५
अथवा कारयेद्विद्वान् किण्किन्धं सुन्दरं क्रमात् ।
किण्किन्धं दक्षिणे कुर्याद्वामे वै सुन्दरं चरेत् ॥ ३६
सुन्दरं वामहस्ते तु धरन्तं चामरं शुभम् ।
देवद्रुमं प्रकुर्वीत देवदेवस्य पृष्ठतः ॥ ३७
नानापुष्पसमायुक्तं नानापल्लवसंयुतम् ।
कारयित्वा विधानेन छत्रञ्चोपरि चन्द्रभम् ॥ ३८
भित्तौ बाह्वपरि लिखेत्प्रभामण्डलमन्तरा ।

वीरासनम्

एवमेव विधानेन बद्ध्वा वस्त्रं तथाऽऽसने ।
स्थितिं वीरासनं प्राहुर्नारसिंहे विशेषतः ॥ ४०
अथवा दक्षिणं पादं कुञ्चितं कारयेत्तथा ।
वामं पादं प्रसृतञ्च केषाञ्चित्पक्ष उच्यते ॥ ४१

त्रिविधशयनलक्षणम्

अतः परं प्रवक्ष्यामि शयनस्य विधिं क्रमात् ।
शयनञ्च त्रिधा योगभोगवीरक्रमाद्भवेत् ॥ ४२
सोमच्छन्दविमानं वा दीर्घशालमथापि वा ।
कूटं वा मण्डपं वापि शयनाय प्रकल्पयेत् ॥ ४३
दशतालयुतं वापि द्वारस्य समभेव वा ।
यजमानसमं वापि गर्भगेहसमन्तु वा ॥ ४४
शयनं सम्प्रकल्प्यैव सर्वाभरणभूषितम् ।

योगशयनम्

सस्यश्यामनिभं कुर्यादनन्तोपरि शायिनम् ॥ ४५
बेरायामं त्रिधा कृत्वा तत्रैकं शयनोच्छ्रयम् ।
सव्यं हस्तं प्रसार्यैव प्रह्लादस्य शिरःस्थले ॥ ४६
शयानं देवदेवेशं कुर्याद्योगाख्यशायने ।
प्रह्लादं रक्तवर्णञ्च शयनस्य समं तथा ॥ ४७
बालरूपं तथा कुर्यात्सर्वाभरणभूषितम् ।
वामकूर्परमूर्ध्वं स्यान्नताङ्गुलिसमन्वितम् ॥ ४८

स्वीयं कायं त्रिरावर्त्य तल्पीकृत्य हरेर्मृदुम् ।
फणान् पञ्च समुद्धृत्य प्रसार्य मकुटोपरि ॥ ४९
पीतवर्णमथ श्वेतमनन्तं परिकल्पयेत् ।
नाभ्यम्बुजे समासीनं ब्रह्माणञ्च प्रकल्पयेत् ॥ ५०
बिम्बस्य च चतुर्भागमायतं कारयेद्विधिम् ।
हिरण्यवर्णं ब्रह्माणं जटामकुटभूषितम् ॥ ५१
सर्वाभरणसंयुक्तं पुष्पाम्बरसमन्वितम् ।
चतुर्बाहुं पद्मभवं धातारं चतुराननम् ॥ ५२
कमण्डलुं वामहस्ते दक्षिणे चाक्षमालिकाम् ।
सव्यमालोक्यवत्कुर्यात् वामं कट्यवलम्बितम् ॥ ५३
ऊर्ध्वे पञ्चायुधानि स्युः मित्तिपार्श्वे विशेषतः ।
कौमोदकीं तथा शार्ङ्गमसिं स्त्रीरूपमाचरेत् ॥ ५४
चक्रं पुरुषवत्कुर्याच्छङ्खं भूताकृतिं चरेत् ।
रक्तां कौमोदकीं कुर्यात्पीतं शार्ङ्गमुदाहृतम् ॥ ५५
श्वेतवर्णमसिं कुर्याच्चक्रमग्निनिभं भवेत् ।
किरीटमकुटोपेतं स्तनबन्धसमन्वितम् ॥ ५६
तलप्रहारसमयद्रुतवेगसमन्वितम् ।
एवं रूपाणि कार्याणि आयुधानि विशेषतः ॥ ५७
उभौ कवचसंयुक्तौ शङ्खचक्रौ विशेषतः ।
सर्वाभरणसंयुक्तावुग्ररूपौ च कारयेत् ॥ ५८
वामपार्श्वे तथा कुर्यान्मधुं कैटभमेव च ।
समुद्रोद्धूतवेगेन जानुमात्रं समुद्गतौ ॥ ५९
मधुश्च रक्तवर्णः स्यात्कैटभः श्यामलो मतः ।
रक्तकेशौ दण्डवृक्षायुधसन्धारिणावुभौ ॥ ६०

वक्रदंष्ट्रौ लासहासयुतौ परमदारुणौ ।
सर्वाभरणसंयुक्तं भीमरूपं भयानकम् ॥ ६१
गरुडं दक्षिणे पार्श्वे प्राञ्जलिं सुस्थितं सितम् ।
वामपार्श्वे तथा शान्तं तद्वर्णेनैव कारयेत् ॥ ६२
इलापुष्यौ तथा कुर्यात्पूजकस्थानमाश्रितौ ।
पुष्यञ्च दक्षिणे कुर्याद्वामे क्षोणीञ्च कारयेत् ॥ ६३
नवतालक्रमेणैव एकजानुविधानतः ।
पुष्पाञ्जलिसमायुक्तौ रक्तश्यामनिभावुभौ ॥ ६४
एवं योगं समाख्यातं वीरस्यैव प्रवक्ष्यते ।

वीरशयनम्

चतुर्बाहुयुतं कुर्याच्छङ्खचक्रसमन्वितम् ॥ ६५
सव्यं शिरस्युपहितं
वामं हस्तं प्रसारितम् ।
उभौ देव्यौ पादयुग्मं
मर्दयन्त्यौ शनैः शनैः ॥ ६६
मार्कण्डेयञ्च माञ्चैव कुर्यादावाञ्च पूजकौ ।
एवं तु वीरशयनं सुखञ्चैव प्रवक्ष्यते ॥ ६७

भोगशयनम्

द्विभुजं देवदेवेशं सव्यञ्चैवोपधानकम् ।
प्रसारितं वामहस्तं मया पुण्येन चार्चितम् ॥ ६८
शिरोभागे श्रियं कुर्यात्पूर्वोक्तं मकुटं चरेत् ।
वामपार्श्वे महीं कुर्यात्सुखं तच्छयनं विदुः ॥ ६९

अर्धज्यागतपृष्ठन्तु वृत्तयः परिकीर्तिताः ।
शिरसा मिश्रिताः प्रोक्ता अध्यर्धांक्षं समाश्रिताः ॥ २९७
एते त्रयोऽपि विज्ञेया विभागाः परिकीर्तिताः ।
पार्श्वगतञ्चाध्यर्धांक्षं साचीकृतपरन्तु वा ॥ २९८
अर्धज्यागतपृष्ठन्तु वृत्तयः परिकीर्तिताः ।
शिरसा मिश्रिताः प्रोक्ता अध्यर्धांक्षं समाश्रिताः ॥ २९९
चतस्रस्तास्तु विज्ञेया वृत्तयस्त्वुर्विभागशः ।
एवं नवभ्यो वृत्तिभ्यः स्थानमन्यन्न विद्यते ॥ ३००
तिर्यक्ष्वपि च सर्वेषु विविधाकृतिजातिषु ।
स्थावरेष्वपि सर्वेषु यज्ञसंज्ञान्वितेषु वै ॥ ३०१
आसनेषु च हर्म्येषु मण्डपेषु गृहेषु च ।
शयनेष्वपि यानेषु शस्त्रादिषु च युक्तितः ॥ ३०२
बिम्बहाणां प्रमाणेन मानोन्मानादिकल्पनम् ।
अनुमानप्रमाणेन कुर्याद् वृत्तिं यथाक्रमम् ॥ ३०३

इत्यार्षे श्रीवैखानसे भगवच्छास्त्रे भृगुप्रोक्तायां संहितायां खिलाधिकारे भगवत्प्रतिमालक्षणकथनं नाम चतुर्दशोऽध्यायः ।

अथ पञ्चदशोऽध्यायः

परिषद्देवतालक्षणम्

अतः परं पारिषद्यलक्षणं समुच्यते ।
इन्द्रादीनां तथाऽन्येषां परिषद्वर्गगामिनाम् ॥ १

[.....]
नवार्धतालमानेन कुर्यात् बिंबं यथाक्रमम् ॥ २
हरः सत्यनिभः प्रोक्तस्सुवर्णाम्बरसंयुतः ।
तेन भावेन कर्तव्यं वपुर्विष्णोरिवं स्मृतम् ॥ ३
दशतालपरीणाहं नवतालादनन्तरम् ।
तन्मध्यमं तदा ग्राह्यं दिव्यं संहननं समम् ॥ ४
अच्युतस्येवाभरणं ब्रह्मसूत्रं विना तथा ।
श्रीवत्सं दिव्यचिह्नञ्च विना रूपं समाचरेत् ॥] ५

दिक्पालाः इन्द्रः

आसीनं द्विभुजं कुर्यादासने वज्रपाणिनम् ।
स्थितं शच्या महिष्याऽस्य श्रेष्ठमासनमुच्यते ॥ ६
किरीटं मकुटं तस्य पार्श्वे वर्जितदण्डकम् ।
हस्ते तु वज्रं कर्तव्यमासने चेन्निरायुधम् ॥ ७
इन्द्राणीं दक्षिणे कुर्याद्वामे च च्छन्दगां शुभाम् ।
पद्मामिव तथेन्द्राणीमिलामिव च च्छन्दगाम् ॥ ८
पद्मा भूमी यथा विष्णोरिन्द्रस्यैते मते तथा ।
घृताच्यलम्बुके चापि कुर्याद्वै परिचारिके ॥ ९
लोमशञ्च त्रितञ्चैव पूजकौ तौ समर्चयेत् ।
माद्य पुण्यमिव स्थाने दक्षिणे वाम एव वा ॥ १०
घृताची श्यामवर्णा चालम्बुकोत्पलपत्रभा ।
लोमशोऽञ्जनवर्णश्च तितो गोधूमसप्रभः ॥ ११
पृथक् चेदालयं तस्य परिवारेषु कारयेत् ।
निर्माल्यधारिणं वीरं रक्तोत्पलदलप्रभम् ॥ १२

गोपुरागारयोर्मध्ये स्थापयेद्वारणाधिपम् ।
स्थापयेच्चापि पर्जन्यं महाशनिसमन्वितम् ॥ १३
पर्जन्यं श्यामवर्णञ्च सर्वलोकशुभावहम् ।
वज्रस्थानसमायुक्तं रथस्थानसमन्वितम् ॥ १४

अग्निः

अग्निं कुर्याद्यथान्यायं नवतालेन मानतः ।
अग्निं किंशुकवर्णाभं प्रज्वलत्केशसंयुतम् ॥ १५
हयस्तु वाहनं तस्य रोहितो नाम नामतः ।
शङ्खश्च शैषिकस्तस्य कुन्देन्दुसदृशप्रभः ॥ १६
स्वाहास्वधा उभे देव्यौ मुक्ताहेमनिभे सती ।
शक्तिरस्यायुधं दिव्यं सर्वामरपुरोधसः ॥ १७

यमः

कृष्णाम्बुदनिभं कुर्याच्छमनं दण्डपाणिनम् ।
पाशं वामकरे कुर्याज्जानु च व्रणसंयुतम् ॥ १८
माता तेन परामृष्टा धात्री मातृसरूपिणी ।
मातृशापात्ततः पादो दक्षिणो व्रणसंयुतः ॥ १९
सर्वाभरणसंयुक्तः कुरोशयविलोचनः ।
देवी सत्यव्रता नाम सुता सा कृष्णवर्त्मनः ॥ २०
कुन्देन्दुसदृशाभा सा वर्णतः परिकीर्तिता ।
मुनिः शङ्खिलको नाम पूजकः श्वेत उच्यते ॥ २१
महिषो वाहनं तस्य व्यालध्वजसमन्वितः ।
शैषिकस्त्वचलो नाम यमस्य परिकीर्तितः ॥ २२

निर्ऋतिः

त्रिनेत्रो निर्ऋतिर्नीलः शूलपाणिः द्विबाहुकः ।
पत्नी च भञ्जनी नाम वर्णतस्सस्यसन्निभा ॥ २३
शैषिकः कलभो नाम किंशुकाभस्स उच्यते ।
शार्दूलो वाहनं तस्य निर्ऋतेः समुदाहृतः ॥ २४

वरुणः

वरुणो नीलवर्णश्च रक्ताम्बरधरः शुचिः ।
दण्डपाशकरस्तस्य वाहनं गज उच्यते ॥ २५
शैषिकः पुण्यनामा च देवी च कनका मता ।
कनका नाम शर्यातेः गन्धर्वस्य सुता मता ॥ २६
वरुणस्य प्रिया देवी सती कुन्देन्दुसप्रभा ।
ध्वजः सिंहः समाख्यातो मुनिर्वत्सल उच्यते ॥ २७
..... ।
सुमतीको बलाकाभो वत्सलेऽग्निसमप्रभः ॥ २८
सर्वाभरणसंयुक्तो देवो भोगेश्वरो वरः ।

वायुः

जवनश्चाच्छसङ्काशो वायू राजा महाबलः ॥ २९
असिहस्तश्च तं कुर्याद्दिव्यं मकुटमुत्तमम् ।
अञ्जना नाम तद्देवी वैदूर्यसदृशप्रभा ॥ ३०
अर्धासने च तां कुर्याद्वाहनं गज उच्यते ।
शैषिको बलको नाम लोहिताक्षश्च शूलभृत् ॥ ३१

कुबेरः

इन्द्रनीलनिभो वीरः पीताम्बरधरो सुखी ।
कार्यः कुबेरो यक्षेशः..... ॥ ३२

मकुटः पार्श्वको नाग आयुधं दण्ड उच्यते ।
हंसयुक्तो रथस्तस्य वाहनं परिकीर्तितम् ॥ ३३
देवी यवनला प्रोक्ता सैव ऋद्धिः प्रकीर्तिता ।
दमनः पूजकः प्रोक्तः कपिलश्चाङ्घ्रिपूजकः ॥ ३४
दमनश्चाग्निवर्णस्यात्कपिलस्सोमवर्णभाक् ।
श्यामस्तु धनिनश्शेषो वर्णतश्श्याम एव सः ॥ ३५

ईशानः

पाटलीकुसुमाभस्तु शिवो वृषभवाहनः ।
त्रिणेत्रस्तु ध्वजश्चोक्षः पत्नी रतिजया मता ॥ ३६
कुण्डाक्षस्य सुता रम्या इन्दीवरनिभा शुभा ।
दादीभको नाम मुनिः पूजकः श्वेत उच्यते ॥ ३७
शैषिको यमजिन्नाम स तु वै पद्मसन्निभः ।
शूलञ्च परशुं तस्य आयुधं परिकल्पयेत् ॥ ३८

आदित्यः

रुद्रस्यैवापरा मूर्तिः त्रिणेत्रो मकुटी तथा ।
बिम्बं मार्ताण्डस्य कुर्यात्पृष्ठे मण्डलसंयुतम् ॥ ३९
चतुष्पादं करयेच्च द्विपादमथवा रविम् ।
दोर्भिः द्वादशभिर्युक्तं व्याघ्रचर्माम्बरं तथा ॥ ४०
शुक्लाम्बरधरञ्चापि देवेशं रक्तलोचनम् ।
आसीनं वा स्थितं वापि विधित्रत्स्वस्तिकासने ॥ ४१
यज्ञोपवीतिनं कुर्यात्सप्ताश्वैस्सुदृढैः पुनः ।
आयुधैरपि संयुक्तं गदापाशासिशक्तिभिः ॥ ४२

उल्लोल्यन्तं विशिष्टं स्थानं चेत्सर्वमाचरेत् ।
दृष्टिं सानुग्रहं कुर्याद्दृष्टाभयकरं पुनः ॥ ४३
पत्नी सुवर्चला नाम रेणुकेति च तां विदुः ।
शैपिकस्त्वमितः प्रोक्तो भास्करस्याग्निसन्निभः ॥ ४४
मुनिः कनकमाली स्याद्बलिजिच्च विचक्षणः ।
वैखानसो मुनिर्धीमान् स्वर्णमाली प्रकीर्तितः ॥ ४५
बलिजित् बालखिल्यश्च तावुभौ च सितासितौ ।
वडवा वाहनं तस्य विश्वरेहेति कीर्तितः ॥ ४६
सर्वान् केतूंस्तथा कुर्यात्प्रमाणं शुक्लवर्णिनः ।
शुकनासाग्रुरानश्वान् रक्तमकेशान्तलोचनान् ॥ ४७
देवी जिजगपत्राङ्गा पिङ्गला वडवा मता ।
अरुणं वाहनस्थाने कपिलं रक्तमकेशकम् ॥ ४८
सर्वाभरणसंयुक्तं पादौ ..... ।
उत्पत्त्यादिकमन्यच्च मया प्रोक्तं प्रकीर्णके ॥ ४९
न लौहं कांस्यकं कार्यं तत्पात्रं परिवर्जयेत् ।
स्निग्धं कुसुम्भवर्णञ्च कृत्वा मार्ताण्डमर्चयेत् ॥ ५०
ध्वजे च शरभं कुर्यात्पृष्ठपादं बलान्वितम् ।
नवतालायतो .... व्यक्तोष्णपरिमण्डलः ॥ ५१

विष्वक्सेनः

अतः परं प्रवक्ष्यामि विष्वक्सेनस्य लक्षणम् ।
नवतालायतं वेरं किरीटेन समायुतम् ॥ ५२
ब्रह्मसूत्रं विना सर्वाभरणैरुपशोभितम् ।
आकुञ्च्य दक्षिणं पादं वामं पादं प्रसार्य च ॥ ५३

जयया सुखमासीनं भार्ययाऽग्निसमप्रभम् ।
शक्त्यायुधं दण्डपाणिं पुष्पपाणिं प्रजाहितम् ॥ ५४
कृत्वाऽर्चयेद्धनार्थी तु पूज्यमानं सदाऽमरैः ।
स्थानस्यैवाभिवृद्ध्यर्थं विष्वक्सेनं प्रचक्षते ॥ ५५

गरुत्मान्

वेदानामुत्तमां मूर्तिं गरुडं नवतालकम् ।
कुर्याद्धाटकवर्णञ्च शुकपिञ्जरवाससम् ॥ ५६
झल्लरीमेखलाबद्धकिङ्किणीजालशोभितम् ।
अङ्गदे कुण्डले कुर्याद्धस्तयोः कर्णयोरथ ॥ ५७
छत्राकारोत्तराबन्धं कौबेरमकुटं तथा ।
बाह्वोराकुञ्चितौ पक्षौ पञ्चवर्णैश्च सुन्दरौ ॥ ५८
पक्षयोः कीचकान् कुर्यादर्धायामसुसंयुतान् ।
आमध्यबन्धसंयुक्तान् विवृतान् कोर्परान्श्रितान् ॥ ५९
बिन्दुपिञ्जरवर्णाक्तान् पञ्चवर्णैश्च मिश्रितान् ।
तथा मरकताभाञ्च नासिकां चिलकृच्चरेत् ॥ ६०
तिलश्शूडास्समाख्याता मकुटस्य तु शोभनाः ।
उर्ध्वोपरि सञ्छत्ता युक्त्या बन्धूकसन्निभाः ॥ ६१
आसने चासनं तस्य यत्र (वज्र)पीठमुदाहृतम् ।
एकं जानुनि पीड्याथ ब्रह्मासनमथापि वा ॥ ६२
शैशवं नागराजञ्च बाहुलम्बितमाचरेत् ।
आमूलश्यामलं रम्यं कुञ्जरं तत्र शैषिकम् ॥ ६३
तमाभरणवत्कुर्यात् स्मयमानञ्च गर्वितम् ।
वाहनानाञ्च सम्पत्तिः गुरुडस्यापन्नाद्भवेत् ॥ ६४

पदार्थिनाञ्च सर्वेषामिष्टदेवाञ्च सर्वथा ।

वक्रतुण्डः

वक्रतुण्डं तथा कुर्याद्बाह्यगोपुरदक्षिणे ॥ ६५
एकदन्तयुतं कुर्याद्गजस्येव मुखं चरेत् ।
कण्ठादूर्ध्वं गजाकारं बालमौलिसमन्वितम् ॥ ६६
भूतार्धवामनाकारं प्रवाल्यभं चतुर्भुजम् ।
दक्षिणं साङ्कुशं वामं वज्रमुष्टिधरं परम् ॥ ६७
गजसाम्रफलं पेतं कदलीफलकाङ्क्षिणम् ।
इक्ष्वेकहस्तं कुर्वीत सर्पैश्च परिवेष्टितम् ॥ ६८
सव्यैकाननमव्यग्रमर्धसाचीकृतेक्षणम् ।
वामे च म्रफले पेतं सप्तभिर्वाथ पञ्चभिः (?) ॥ ६९

अनन्तः

द्वारस्य वामभागे च अनन्तं परिकल्पयेत् ।
सुवर्णवर्णं तं शेषं शङ्खक्षीरनिभन्तु वा ॥ ७०
आनीलाम्बरसंवीतं सर्वाभरणसंयुतम् ।
एकजानुसमासक्तमूर्ध्वं मकुटसंयुतम् ॥ ७१
सिंहासने वा कुर्वीत तथा पद्मासनेऽपि वा ।
द्विभुजं नागराजन्तु रक्तनेत्रासिपाणिकम् ॥ ७२
सुरया सहितं देवमप्सरोभिस्तथैव च ।
फणान्तु मध्यमं तस्य शतपञ्चाङ्गुलायतम् ॥ ७३
अष्टाङ्गुलसमुत्सेधं फणानामानुपूर्व्यतः ।
..... ॥ ७४

पादमेकं प्रसार्यैकमाकुञ्च्य परिकल्पयेत् ।
तेषां पृष्ठे तथा कुर्याद्व्याजिन्यौ दक्षिणे क्रमात् ॥ ११४
सारोचितां सरुचिरां कुर्यात् स्थाने यथाक्रमम् ।
पृथक् चेदालयं तस्या वाहनं खरयुग्मथः ॥ ११५
खराणाञ्चैव पञ्चाशत् रथे तस्याः प्रकीर्तिताः ।
कृष्णः कपिको ध्वजो ज्ञेयः नितम्बा चैव शैषिकी ॥ ११६
परिवारः खरास्तस्याः षोडश स्युर्दुरासदाः ।
आलेख्यास्ते कलुषबिम्बाः सर्वलोकस्य नाशकाः ॥ ११७
पिशाचसमकायास्ते नित्यञ्चाभोज्यभोजनाः ।
..... ॥ ११८

निद्रा

निद्राया लक्षणं वक्ष्ये तां कुर्यादष्टबाहुकाम् ।
शङ्खचक्रधरां स्थाने आकुञ्चितपदां तथा ॥ ११९
शूलखड्गसिचापसहितां गदापाशादिधारिणीम् ।
शुकं सुरुचिरे स्थाने स्थितमादाय वामगम् ॥ १२०
तनुकां पद्मके पीठे स्थापयेदिति शासनम् ।
माहिषे तु शिरस्येव तां देवीं स्थापयेत्क्रमात् ॥ १२१
रम्यां सुलोचनापाङ्गां कृष्णकुञ्चितमूर्धजाम् ।
तन्वीञ्च कुचभारोग्रां सूक्ष्मकर्णां त्रिलोचनाम् ॥ १२२
कन्याभरणसर्वाङ्गीं दृष्टकन्यासुवेषगाम् ।
लतावलयसम्बद्धां झल्लरीभिस्सुसंवृताम् ॥ १२३
कौबेरमौलिसंयुक्तामतिसुन्दरगात्रकाम् ।
तस्याः पृष्ठे समे पार्श्वे विशल्यां विरुजां तथा ॥ १२४

व्याजिन्यौ ते तथा कुर्यात्कुन्दबन्धूकसन्निभे ।
ख्यातीशपुण्ययोः स्थाने सुमनाभञ्जनां तथा ॥ १२५
तस्याश्च कौशिकी नाम शैषिकी परिकीर्तिता ।
कौशिकी श्वेतवर्णा स्यात्सुमना पीतका तथा ॥ १२६
अञ्जनाञ्जनसङ्काशाशुशोभास्साक्षमालिकाः ।
वहने वाहनं तस्याः सिंहः कृष्णमृगस्तथा ॥ १२७
सिंहः प्रभञ्जनो नाम कृष्णः सार उदाहृतः ।
दक्षिणोत्तरयोस्तस्या विन्यसेदिति शासनम् ॥ १२८
ध्वजश्चास्यास्समाख्यातस्स्वस्तिकः सिंहलक्षणः ।
नीलोत्पलदलो नाम भूतग्राही च वीजकः ॥ १२९
भूतः पङ्कजपदो नाम रुक्मवर्णोऽरुणेक्षणः ।

(सप्तर्षयः) — भृगुः

नवार्धतालमानेन माद्यं कुर्याच्चतुर्भुजम् ॥ १३०
ब्राह्मासनसमासीनं ब्रह्माञ्जलिकरद्वयम् ।
अङ्के वामे तथोत्तानं प्रसृतं तस्य चोपरि ॥ १३१
हस्तञ्च दक्षिणं तस्य चोर्ध्वोत्तानमाचरेत् ।
नासाग्रे प्रसृता दृष्टिर्योगदृष्टिरिति स्मृता ॥ १३२
दक्षिणे चोर्ध्वगे हस्ते कलशं मम कारयेत् ।
वामे शिक्यञ्च संशुद्धं ब्रह्मदण्डञ्च वैणवम् ॥ १३३
जातिहिङ्गुलिकाभं वै मुखञ्च मकुटे जटाम् ।
ताम्रास्यनयनं कुर्यात्सम्मुखे मृगचर्म च ॥ १३४
शुक्लवल्कलवस्त्रञ्च मुनिभिस्सह वा विना ।
परिवारैश्च सहितं विना चेन्मद्गृहे तथा ॥ १३५

समृद्धिश्च धनश्चोभौ .... ।
एतौ सत्यजपावर्णौ व्याजनौ कुकुराक्षकौ ॥ १३६
देवी सरस्वती चान्या वह्निश्रीः परिकीर्तिता ।
किञ्चार्धमासनं तस्याः कुर्यात्तु पृथगेव वा ॥ १३७
शैषिकञ्चार्चयेन्नित्यं प्रियव्रतमपाक्षिकम् ।
मन्त्रांस्तान् वाहनं कुर्याद्यावन्तस्स्युस्समाहिताः ॥ १३८
स्थापने मम नक्षत्रं कुर्यात्प्रोष्ठपदोत्तरम् ।
उत्तरां फल्गुनीञ्चाथ पौर्णमासीञ्च सप्तमीम् ॥ १३९
मुनीन् सर्वान् समासीनान् सम्भूतीशादिकान् समान् ।
तदा द्विबाहुकान् स्थाने सर्वलोकपितामहान् ॥ १४०
पितॄन् देवान् धारयतः तपसा सर्वमानुषान् ।
द्याञ्च गां लोकचक्षूंषि सदा गह्वरवाहनान् ॥ १४१
जङ्गमान् स्थावरानन्यान् तपसा तारयिष्यतः ।
लब्धप्रसादास्ते विष्णोः जगत्पालनतत्पराः ॥ १४२
तस्मात्तानर्चयेन्नित्यं सर्वलोकैकशान्तये ।
अनावृष्टिगदोत्पातवह्नितोयविषादिकम् ॥ १४३
विलुम्पन्नञ्च प्रोद्भूतदैविकं भयमष्टधा ।
नश्यन्ति दोषा यत्रैते पूज्यन्ते मुनयः क्रमात् ॥ १४४

सप्तर्षयः पत्न्यश्च

मरीचिः पुलहश्चैव पुलस्त्यः क्रतुरेव च ।
वसिष्ठोऽत्रिरहञ्चेति मुनयस्सप्तकीर्तिताः ॥ १४५
सम्भूतिश्च क्षमा चैव प्रीतिस्सन्नतिरेव च ।
ऊर्जास्त्यात्मनसूयाश्च ऋषिपत्न्यः प्रकीर्तिताः ॥ १४६

पत्न्यस्ता क्रमशः प्रोक्ताः कुर्याद्वै विरहासने ।

गविष्ठः (आकाशः)

गविष्ठं पद्मसङ्काशं कुर्याद्वै पीतवाससम् ॥ १४७
सर्वाभरणसंयुक्तं मुकुटं दैविकं तथा ।
बेरं सुखासने कुर्याद्गविष्ठस्य परं क्रमात् ।
गविष्ठो दण्डपाणिस्स्यादसिपाणिरपि स्मृतः ॥ १४८

पृषदश्वः (वायुः)

श्यामस्तु पीतको वायुः पूर्वं कौसुम्भकाम्बरः ।
..... ॥ १४९

आभुरण्यः (अग्निः)

आभुरण्यो नीलवासाः हरिपिङ्गरमूर्धजः ।
तं कुर्यान्मव्यमे तस्य वामे कुर्यात्तु गह्वरम् ॥ १५०

गह्वरः (जलम्)

तृतीयप्रकृतिं कुर्याद् गह्वरञ्चोत्पलप्रभम् ।
हरिपिङ्गरवस्त्रन्तं भूतानाञ्च चतुर्गुणम् ॥ १५१

मेदिनी

सर्वेषां वामतः कुर्यान्मेदिनीं वामलोचनाम् ।

पञ्चभूतानां स्थानानि

एकासनान् कुञ्चितापसव्यपादान् समाचरेत् ॥ १५२
आभुरण्यं गह्वरञ्च शक्तिपाणी समाचरेत् ।
गविष्ठपत्नी विख्याता विधिना सत्यलोचना ॥ १५३

वायोश्च चलिकां नामाऽमुरण्यस्य च सङ्कुचकां ।
त्रयाणामपि देवीनां पृथक् स्थानं विधीयते ॥ १५४

विद्या

विद्यां चतुर्भुजां कुर्याद्रक्तां धृतकुशेशयाम् ।
दक्षिणे त्वक्षमालाञ्च करे वामे कमण्डलुम् ॥ १५५
ज्ञानमुद्रां दक्षिणाधःकरे वामे च पुस्तकम् ।
एकं प्रसारिणं कुर्यात्सुरूपां शैषिकीं तथा ॥ १५६
पुष्करा च विशोका च व्याजिन्यौ परिकीर्तितौ ।
पुष्कराऽङ्कुशसङ्काशा विशोका दुग्धवर्णिनी ॥ १५७
विश्वपाद्मालवौ चैव पूजकौ तु मुनीश्वरौ ।
विश्वपादज्ञनाभस्तु भावो गालव उच्यते ॥ १५८
उग्रं भीमं महाभूतं विकटं दण्डपाणिनम् ।
कालाम्बुदाभं कृत्वा तु तलके स्थापयेदिति ॥ १५९

स्कन्दः

स्कन्दं पलाशपुष्पाभं षड्भुजं वा चतुर्भुजम् ।
बालमौलिसमायुक्तं विकचप्रीतिवाचकम् ॥ १६०
देवयानीञ्च तत्पार्श्वे स्थाने चेन्न समाचरेत् ।
आसने दक्षिणे तेन चासित्वान्योन्यवीक्षणे ॥ १६१
अर्धसाचीकृतं देव्याः तस्यार्धं भर्तुरिष्यते ।
सर्वेषामपि देवानामासनञ्चैव दैविके ॥ १६२
देवी श्यामनिभा तस्य देवयानी वराङ्गना ।
दुहिता सा हि धर्मस्य नित्यं धर्मपरायणा ॥ १६३

तस्यालये तु विधिना सुसेनं स्थापयेत्क्रमात् ।
सुसेनोऽञ्जनवर्णस्याच्छूलहस्तो गदायुधः ॥ १६४
वाहनं हस्तिनं कुर्यान्मयूरं वा यथोचितम् ।
नवहस्तमिभं कुर्यादुत्सेधस्सप्तहस्तकः ॥ १६५
आयामार्धं ततः पादाः शेषं नाह उदाहृतः ।
प्रदेश .... न्नतो विद्याच्छिरसो मस्तकं तयोः ॥ १६६
नाहेनार्धपरीणाहः पादहीनन्तु गात्रयोः ।
गात्रार्धपरिणाहो वा पादहीनः करोर्ध्वकः ॥ १६७
भूमिलम्बं तथा कुर्यात्करं वालमनुच्छ्रितम् ।
मानं नखानां तत्रैव चतुरङ्गुलमिष्यते ॥ १६८
भागान्तराणां तेषां वै सर्वं बोद्धव्यमित्यथ ।
तयोर्मानं यथेभस्य मानं कुर्याद्वयङ्गरम् ॥ १६९
इभानामेव सर्वेषां मानमित्थमुदाहृतम् ।
ऐरावतं विनाऽन्येषां नीलो वर्णः प्रकीर्तितः ॥ १७०

ऐरावतहस्ती

स्याद्वादशकरायामो मितं करिपतेः सदा ।
सतालनवहस्तः स्यादुत्सेधः सर्वसम्मतः ॥ १७१
प्रवालाभश्चतुर्दन्तः श्वेतवर्णो गजाधिपः ।
दन्ताश्च युग्मसंस्थाना युगलाश्शोभना मताः ॥ १७२
परिणाहादिकं तेषामूर्ध्वं युक्त्या समाचरेत् ।

नीलहस्ती

तथा च नीलहस्ती स्यादिन्द्रनीलनिभश्शुभः ॥ १७३

अङ्गरागसमायुक्तं शङ्खचक्रधरं परम् ।
शङ्खचक्रवियुक्तं वा द्विबाहुं नृहरिं चरेत् ॥ २१
बाहवस्सायुधाश्चाष्टौ यथायोगं प्रकीर्तिताः ।
निरायुधं नरहरिं कुर्युस्सर्वेऽभयप्रदम् ॥ २२
राजा निरायुधं बिम्बं नैव कुर्यात्कदाचन ।
अनन्तोत्सङ्गशयनं सप्तभिः फणमण्डलैः ॥ २३
समाच्छन्नशिरोदेशं वीशबाह्वोः स्थितन्तु वा ।
अष्टबाहुं चतुर्बाहुं तथा षोडशबाहुकम् ॥ २४
असङ्ख्याकभुजञ्चापि सायुधं कपिलाक्षकम् ।
मुक्ताकुन्देन्दुधवलं रक्तवस्त्रविभूषितम् ॥ २५
सर्वशत्रुहरञ्चैव धात्रि चोर्ध्वतले स्थितम् ।
स्थापयेदर्चयेद्देवं नरकेसरिणं हरिम् ॥ २६
तस्य दक्षिणपार्श्वे तु स्थापयेच्च पितामहम् ।
वामपार्श्वे हितं रुद्रं स्थापयेद्वृषभध्वजम् ॥ २७
किष्किन्धसुन्दरौ चैव
चामरग्राहिणौ मतौ ।
किष्किन्धोऽञ्जनवर्णाभः
सुन्दरः पद्मवर्णभाक् ॥ २८
किष्किन्धो दक्षिणं पार्श्वं सुन्दरो वाममाश्रितः ।
यज्ञतीर्थौ सुखासीनौ पूजकौ परिकीर्तितौ ॥ २९
यज्ञः कनकवर्णाभः श्यामलस्तीर्थ उच्यते ।
द्वारपार्श्वे च संयोज्यौ स्थितावेतौ द्विजोत्तमौ ॥ ३०
मणिकं पुष्कलञ्चैव द्वारपार्श्वे समर्चयेत् ।
भूतीशः शैपिकस्तौ द्वौ शैपिकस्थानमाश्रितौ ॥ ३१

वामनः

इन्द्रानुजन्तदितिजं कश्यपं ब्रह्मचारिणम् ।
आषाढाजिनसंयुक्तं शिक्षासूत्रसमन्वितम् ॥ ३२
पवित्रशाटीसंयुक्तं सच्छत्रं दण्डसंयुतम् ।
वर्णिनं वामनं कुर्याद्द्विभुजं सोमवर्चसम् ॥ ३३
कनकः शङ्खिलस्तस्य पूजकौ परिकीर्तितौ ।
कनकः कनकाभश्च शङ्खिलश्शङ्खसन्निभः ॥ ३४
कनको दक्षिणं पार्श्वं शङ्खिलो वाममाश्रितः ।
द्वारपालौ तु संयोज्यौ स्थितावेतौ खगेश्वरौ ॥ ३५

त्रिविक्रमः

वामनो वपुषे श्रीमान् त्रिविक्रममिताविनिः ।
दक्षिणं तुस्थितं पादं वाममुत्तालकं चरेत् ॥ ३६
तस्य विक्रममाणस्य चन्द्रादित्यौ स्तनान्तरे ।
ततो विक्रममाणस्य सक्थिदेशे स्थितौ पुनः ॥ ३७
ततो विक्रममाणस्य जानुगाविन्दुभास्करौ ।
रा विभूतिर्जगद्धर्तुः पादोद्धरणसंस्थितौ ॥ ३८
त्रिधा तु संस्थितिर्भिन्ना पादन्यासप्रभेदतः ।
जान्वन्तोद्धृतपादेन भाव्यन्तोद्धृतकेन च ॥ ३९
ललाटान्तोद्धृतेनाथ तृतीयेयं विशिष्यते ।
वामहस्तं समुद्धृत्य पादपार्श्वे तु सूचयेत् ॥ ४०
ब्रह्माणं पादपार्श्वे तु आकाशस्थं प्रकल्पयेत् ।
उभाभ्याञ्चैव हस्ताभ्यां पादप्रक्षालनोद्यतम् ॥ ४१

अथ एकोनविंशोऽध्यायः

दशावतारकल्पः

अतः परं प्रवक्ष्यामि प्रादुर्भावविधिं क्रमात् ।
मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः ॥ १
रामो रामश्च रामश्च कृष्णः कल्कीति वै दश ।
प्रादुर्भावा हरेः प्रोक्ताः ऋषिभिस्तत्त्वदर्शिभिः ॥ २
आविर्भावास्तु पञ्चैव पूर्वे पुण्याः प्रकीर्तिताः ।
प्रादुर्भावाः पञ्चपरे प्रोक्ताः पुण्याः स्वयम्भुवा ॥ ३
भाविता अपि देवाद्यैः पूजया चापि तुष्टिदाः ।
एको हि भगवान् देवो हरिर्नारायणः प्रभुः ॥ ४
तत्तद्रूपेण सन्तुष्टः सर्वानिष्टान् प्रदास्यति ।

मत्स्यकूर्मौ

मत्स्याकृतेस्तु देवस्य पृथक् स्थानं न विद्यते ॥ ५
नलीनके विमाने तु मध्यमे सम्प्रकल्प्यते ।
तले षष्ठे तु संस्थाप्य अर्चयेदिति शासनम् ॥ ६
अन्येषु तु विमानेषु प्रमुखे लेख्यमाचरेत् ।
कूर्मश्चापि तथा कुर्यात्सहितौ वा प्रपूजयेत् ॥ ७
पद्मासनस्थौ कर्तव्यौ भिन्नाञ्जनचयावुभौ ।
रक्तं सुवर्णपार्श्वञ्च मत्स्यरूपं प्रकल्पयेत् ॥ ८

वराहनारसिंहवामनाः

वराहादित्रयाणान्तु पृथक् स्थानं विधीयते ।
बहुभूमिविमानेषु कल्पयेदूर्ध्वमध्यमे ॥ ९

दंष्ट्रायां दक्षिणायान्तु धृत्वोर्वीं मोहनाकृतिम् ।
स्थितं वराहवदनं चतुर्बाहुसमायुतम् ॥ १०
शङ्खचक्रधरं देवं भिन्नाञ्जनचयप्रभम् ।
दंष्ट्रे स्फटिकसङ्काशे कुर्याच्छुभसमायते ॥ ११
मेदिनी श्यामला प्रोक्ता पद्मपत्रनिभाम्बरा ।
न्यस्ताञ्जलिपुटा कार्या अङ्के वा कोलरूपिणः ॥ १२
उभाभ्यामपि बाहुभ्यां भर्त्रा कार्या धृता मही ।
पुण्यधर्मौ मुनी तस्य पूजकौ परिकीर्तितौ ॥ १३
पुण्यः पद्मपलाशाभः धर्मः स्फटिकसन्निभः ।
रक्तचाषाम्बरौ तौ तु पूजायां परिकल्पयेत् ॥ १४
पुण्यो दक्षिणभागस्थः धर्मः सव्यं समाश्रितः ।
ब्रह्माणौ पिङ्गलाभाश्च द्वारवामेऽथ दक्षिणे ॥ १५
सुखासीने तथा कुर्यान्मुनिभिः परिवारिते ।
स्वाहा स्वस्ति स्वधा मेधा कान्तिर्लज्जाऽहुतिः श्रुतिः ॥ १६
पुष्टिर्मतिः धृतिः कीर्तिः श्रद्धा श्रीरिन्दुका सुधा ।
एताश्च परितः कुर्यादालेख्यस्यास्सुराङ्गनाः ॥ १७
तदधस्तान्महाविष्णुमादिमूर्तिमनामयम् ।
तस्याधस्ताच्चतुर्मूर्तीः स्थाप्य सम्यक् समर्चयेत् ॥ १८
तथोपरितले देवं शयानं सम्यगाचरेत् ।
पञ्चभूमिविमानेषु स्थापनन्त्वेवमाचरेत् ॥ १९
... ...
... ...

नारसिंहः

सटालसिंहवक्त्रञ्च चतुर्बाहुं तलद्वयम् ।
वीरासने समासीनं व्याव्रास्यं पवलप्रभम् ॥ २०

क्षणेन स्रुततोयाञ्च गङ्गां देवीं सुरूपिणीम् ।
तां वहन्तं वेगयुतां शङ्करञ्चैव कारयेत् ॥ ४२
एवमेव प्रकारेण कारयेत्परितः प्रभोः ।
वामपादस्य पार्श्वे तु गङ्गां कुर्याद्विचक्षणः ॥ ४३
साचीकृतार्धवपुषा गङ्गां कुर्याद्विचक्षणः ।
गङ्गा स्यात् श्वेतवर्णा तु सर्वाभरणभूषिता ॥ ४४
बाहुदक्षिणतश्शङ्कं वनमालासमन्वितम् ।
चन्द्रं शशधरञ्चापि कुर्याद्भूषणभूषितम् ॥ ४५
देवेन्द्रञ्चैव कृत्वा तु सर्वाभरणभूषितम् ।
बाहौ वामे तथेन्द्रस्य चामरे परिकल्पयेत् ॥ ४६
कुर्यात् बाहुसमस्थाने नमन्तं देवमादरात् ।
दक्षिणे स्तनपार्श्वे तु चन्द्रं सम्यक् समाचरेत् ॥ ४७
तथैव वामपार्श्वे तु भास्करं निम्नमाश्रितम् ।
जानुस्थानगतं कुर्यात्पृष्ठे मण्डलसंयुतम् ॥ ४८
देवस्य दक्षिणे पार्श्वे वामनं बलिसंयुतम् ।
महाबलिञ्च कुर्वीत सर्वाभरणभूषितम् ॥ ४९
उभाभ्याञ्चैव हस्ताभ्यां दधतं सोदक घटम् ।
वामनं कारयेत्पञ्चतालमानेन वामनम् ॥ ५०
सोत्तरीयपरीधानं कृष्णाजिनधरं विभुम् ।
छत्रदण्डसमायुक्तं याचमानमुखाम्बुजम ॥ ५१
देवस्य वामभागे तु भूमिस्थं गरुडं चरेत् ।
शुक्रमुद्दिश्य हस्तेन घ्नन्तं कोपसमन्वितम् ।
देवस्य मूर्धभागे तु जाम्बवन्तं प्रकल्पयेत् ॥ ५२

भेरीसन्ताडने व्यग्रं जयार्थं मधुघातिनः ।
एवमेतान् कल्पयित्वा शेषं युक्त्या समाचरेत् ॥ ५३
नवस्थानेषु विधिना कर्माणश्च कारयेत् ।
मोक्षार्थी श्वेतवर्णञ्च पीतवर्णन्तु पुत्रधीः ॥ ५४
धनधान्यसमृद्ध्यर्थी श्यामं कुर्यात् त्रिविक्रमम् ।
वीर्यार्थी विजयार्थी च रक्तवर्णं समाचरेत् ॥ ५५
कृतत्रेताद्वापराश्च कलिश्चेति युगाः क्रमात् ।
श्वेतवर्णं पीतवर्णं श्याममञ्जनसन्निभम् ॥ ५६
यथाक्रमं प्रकुर्याद्वै युगेषु च विशेषतः ।
ब्राह्मणो यजमानश्चेत् श्वेतवर्णः प्रशस्यते ॥ ५७
क्षत्रियश्चेद्रक्तवर्णः वैश्यश्चेत्पीत आहृतः ।
शूद्रश्चेदञ्जनो वर्णः सर्वेषां श्याम एव वा ॥ ५८
एवं वर्णं यथावाञ्छा कारयेत्तु त्रिविक्रमम् ।
पुराकल्पोक्तमानेन मानोन्मानादि चाचरेत् ।
सर्वलक्षणसंयुक्तं कारयेच्छिल्पिना शुभम् ॥ ५९

वामनप्रतिष्ठा

अत ऊर्ध्वं प्रवक्ष्यामि स्थापनाविधिविस्तरम् ।
अङ्कुरारोपणादीनि स्नपनान्तं यथाक्रमम् ॥ ६०
पूर्वोक्तेन विधानेन कृत्वा सर्वाणि वै गुरुः ।
सञ्चक्षुक्षिणपार्श्वे तु पौण्डरीकञ्च साधयेत् ॥ ६१
अ.घारं विधिवत्कृत्वा अग्निमानय्य चादरात् ।
इध्मप्रक्षेपणं कृत्वा परिस्तीर्य च पावकम् ॥ ६२
यो वा त्रिमूर्तिं मावृत्य शतमष्टौ हुनेत्ततः ।
जुहुयात् पौरुषं सूक्तं विष्णुसूक्तमतः परम् ॥ ६३

एवं विशिष्य हुत्वा तु शिष्टं पूर्ववदाचरेत् ।

वामनार्चनाक्रमः

अत ऊर्ध्वं प्रवक्ष्यामि अर्चनाक्रममुत्तमम् ॥ ६४
पूर्वोक्तेन विधानेन सम्भारान् सम्यगाहरेत् ।
प्रदक्षिणादौ नो भेदः पूर्वोक्तस्तत्र वै विधिः ॥ ६५
मूर्तिभेदो विशेषोऽत्र शृणुध्वं मुनिसत्तमाः ।
'विष्णुं त्रिविक्रमञ्चेति त्रिलोकेशमतः परम् ॥ ६६
त्रिदशाधिपतिञ्चेति वैकुण्ठमि' ति चार्चयेत् ।
'वामनं वरदञ्चेति काश्यपञ्चादितिप्रियम्' ॥ ६७
'बलिं वैरोचनिञ्चेति महावीर्यं महामतिम्' ।
वैरभोजन' मित्युक्त्वा पञ्चभिर्नाममिर्बलिम् ॥ ६८
'गरुडं पक्षिराजञ्च सुपर्णञ्च खगाधिपम्' ।
'शुक्रञ्च भार्गवञ्चेति काव्यञ्च परिसर्पिणम्' ॥ ६९
एवं देवान् समभ्यर्चेच्चतुर्मूर्तिविधानतः ।
देवदेवं विशेषेण सप्तविंशतिविग्रहैः ॥ ७०
अर्चयित्वा यथान्याय्यं बलिमुत्थापयेत्क्रमात् ।
त्रिविक्रमे विशेषोऽयं शेषं विष्णोरिवाचरेत् ॥ ७१

वामनविमानम्

ग्रामे वा नगरे वाऽपि पत्तने खर्वटेऽपि वा ।
नदीतीराश्रये वापि वेलायां सागरस्य वा ॥ ७२
शैलाग्रे शैलपार्श्वे वा वनपार्श्वे वनान्तरे ।
स्थानं यत्रैव विस्तीर्णं तत्रापि च मनोरमे ॥ ७३

कारयेत्तु विधानेन विमानं लक्षणान्वितम् ।
नन्दीविशालमष्टाङ्गं सोमच्छन्दं चतुस्स्फुटम् ॥ ७४
बृहद्वृत्तविमानं वा दीर्घशालमथापि वा ।
विमानेष्वेषु चैकस्मिन् यजमानेच्छया गुरुः ॥ ७५
शिल्पशास्त्रोक्तविधिना कारयित्वा गृहं हरेः ।
रम्यं मनोहरं बिम्बं देवदेवस्य कारयेत् ॥ ७६
कुर्याद्विमानं प्राग्द्वारं प्रत्यग्द्वारमथापि वा ।
पूर्वद्वारन्तु मोक्षार्थी तथाऽन्यं भोगकामुकः ॥ ७७
अध्यर्धद्वारेलता स्यादुत्तमा प्रतिमा तथा ।
पादाधिकां वा कुर्वीत द्वारमानामथापि वा ।
बिम्बं सल्लक्षणं कुर्याद्दशतालोक्तमानतः ॥ ७८

परशुरामः

जामदग्न्यं जटोपेतं धनुःपरशुपाणिनम् ।
अक्षमालाधरं रक्तबल्कलाम्बरमर्चयेत् ।
शिष्यावपि सगायोऽथौ पावनौ जवनौ मुनी ॥

राघवरामः

अत ऊर्ध्वं राघवस्य रामस्य स्थापनाविधौ ।
तथार्चनायां वक्ष्यामि विशेषं शृणुतर्षयः ॥ ७९
सकलैर्विदितो ह्येष प्रादुर्भावो जगत्पतेः ।
विजयार्थी प्रजार्थी वा मोक्षार्थी राममर्चयेत् ॥ ८०
ग्रामे वा नगरे वाऽथ पत्तने वाऽथ खर्वटे ।
नद्यास्तीरे तटाके वा पर्वताग्रे वनाश्रये ॥ ८१

नद्यंभध्ये तथा तीरे वेलायां सागरस्य वा ।
स्थानेष्वेतेषु दैवेषु प्रतिष्ठाप्य समर्चयेत् ॥ ८२
कर्षणं विधिवत्कृत्वा खननं पूरणादिकम् ।
आद्येष्टकादिकरणं पूर्वोक्तविधिना चरेत् ॥ ८३
कुर्यादेकतलं वा स्यादेकगोपुरसंयुतम् ।
विमानं गोपुराद्यैस्तु विधिवन्निर्मितं हरेः ॥ ८४
विमानं हस्तिपृष्ठं वा प्रशस्तं गोपुराकृति ।
निर्माय श्रद्धया दिव्यमालयं शुभलक्षणम् ॥ ८५
विधिना शूलमादाय शूलस्थापनमाचरेत् ।
दशतालेन मानेन वेरन्यासः प्रशस्यते ॥ ८६
मृत्क्रियां रज्जुबन्धञ्च घटशर्करिकाक्रियाम् ।
पटाच्छादनसंस्कारं वर्णसंस्कारमेव च ॥ ८७

लक्षणम्

आचरेत् द्विभुजं देवं धनुर्हस्तं त्रिभिर्नतम् ।
श्यामवर्णं मकुटिनं सर्वाभरणभूषितम् ॥ ८८
श्रीवत्सवक्षसं कुर्यात्पीताम्बरसुशोभितम् ।
रामः कमलपत्राक्षस्सर्वसत्त्वमनोहरः ॥ ८९
वामभागे च सौमित्रिं दक्षिणे जनकात्मजाम् ।
रामबाहुसमौ तत्र कारयेद्विधिकोविदः ॥ ९०
हेमवर्णां पद्मनेत्रां शुकपिञ्छनिभाम्बराम् ।
सीतां पद्मकरां कुर्यात्सौमित्रिञ्च धनुर्धरम् ॥ ९१
हनुनाऽञ्जनवर्णेन रक्तवर्णमुखेन च ।
श्वेतवस्त्रेण चैकेन अष्टतालविधौ कृतम् ।
हनूमन्तं महाभक्तं कारयेत्पुरतः स्थितम् ॥ ९२

एष सायुधकल्पस्स्यादन्यश्चास्ति निरायुधः ।
सिंहासने सहासीनं सीतया रघुनन्दनम् ॥ ९३
श्यामलाङ्गं मकुटिनं सर्वाभरणभूषितम् ।
श्रीवत्सवक्षसं कुर्याद्दशतालेन मानतः ॥ ९४
वामपार्श्वे स्थितं कुर्यात्सौमित्रिञ्चानिलात्मजम् ।
'रामं दाशरथिं वीरं काकुत्स्थ' मिति नामभिः ॥ ९५
आवहनार्चनादीनि राघवस्य प्रकल्पयेत् ।
'सीतामयोनिजां लक्ष्मीं वैदेही' मिति जानकीम् ॥ ९६
'रामानुजञ्च सौमित्रिं लक्ष्मणं लक्ष्मिवर्धनम्' ।
'कपिराजं हनूमन्तं शब्दराशिं महामतिम्' ॥ ९७
इत्येवं मूर्तिभिः कुर्यादावाहनमथार्चनम् ।
कौतुकं कारयेद्विद्वान् सौवर्णं राजतन्तु वा ॥ ९८
ताम्रजं दारवं वापि षण्मानपरिकर्मितम् ।
ध्रुवबेरं त्रिधा कृत्वा एकभागं व्यपोह्य च ॥ ९९
भागद्वयं त्रिधा कृत्वा समस्तद्योत्तमं भवेत् ।
भागद्वयं मध्यमं स्यात् एकं भागमथाधमम् ॥ १००
एकैकन्तु त्रिधा कृत्वा पीठञ्च त्रिविधं भवेत् ।

राघवरामप्रतिष्ठा

एवं कृत्वा यथाशास्त्रं श्रद्धाभक्तिसमन्वितः ॥ १०१
शुभायनर्तुमासर्क्षतिथिवाराऽन्विते दिने ।
देशकालौ समालोच्य स्थापनारम्भमाचरेत् ॥ १०२
पूर्वोक्तगुणसम्पन्नानुक्तदोषविवर्जितान् ।
वैखानसविदो विप्रान् शान्तान् दान्तान् जितेन्द्रियान् ॥ १०३

आहूयात्वेकमाचार्यं वृत्वा तेनोक्तमाचरेत् ।
प्रतिष्ठादिवसात्पूर्वं सप्तमे चाङ्कुरार्पणम् ॥ १०४
अङ्कुरारोपणादूर्ध्वं कारयेद्विजभोजनम् ।
कृत्वाऽक्षिमोचनं पश्चादधिवासांश्च कारयेत् ॥ १०५
गोमूत्रे गोमये क्षीरे दधि चैव घृते तथा ।
कुशोदे पृथगेकैकरात्रिमात्राधिवासनम् ॥ १०६
मृष्टसिक्तोपलेपाद्यैः शोधयेद्देवमन्दिरम् ।
धूपयित्वा तथा धूपैः आलयं समुप्रावजेत् ॥ १०७
अलयादुत्तरे पार्श्वे भूमियज्ञं यजेत्क्रमात् ।
पर्यग्निं कारयित्वा तु पञ्चगव्यैस्समुक्ष्य च ॥ १०८
पुण्याहं वाचयित्वा तु प्रोक्षणैः प्रोक्षणं चरेत् ।
सप्तभिः कलशैः देवं स्नापयेद्विधिना क्रमात् ॥ १०९
वस्त्रोत्तरीयाभरणैरलङ्कृत्य यथोचितम् ।
पाद्यमाचमनीयञ्च पुष्पं गन्धं तथैव च ॥ ११०
धूपं दीपं तथा चान्नं हविर्दद्याद्यथार्हकम् ।
ताम्बूलञ्च निवेद्यैव नमस्कुर्यात् पुनः पुनः ॥ १११
शिबिकां रथरङ्गं वा वाहनाद्यं गजादिकम् ।
आदाय देवमारोप्य नयेद् ग्रामं प्रदक्षिणम् ॥ ११२
शङ्खदुन्दुभिनिर्घोषैः पटहध्वनिभिस्तथा ।
वीणावेणुमृदङ्गाद्यैर्वेदघोषैश्च संयुतम् ।
प्रदक्षिणं सुखं नीत्वा ग्राममालयमेव वा ॥ ११३
शय्यामण्डपमध्ये तु धान्यराशिं प्रपूर्य च ।
तदूर्ध्वे च स्तरेत्तल्पान् पञ्च पञ्चाण्डजादिकान् ॥ ११४

वासांस्युक्ताण्डजादीनामालाभे तत्र संस्तरेत् ।
आस्तीर्य तल्पान् प्रागग्रान् अलङ्कुर्याच्च सर्वतः ।
पुरिश्चात्र(?) समास्तीर्य प्रोक्षणैः प्रोक्षणं चरेत् ॥ ११५
पुण्याहं वाचयित्वा तु रक्षाबन्धनमाचरेत् ।
ततः पुरिं शोधयित्वा 'यद्वैष्णव' मिति ब्रुवन् ॥ ११६
शाययेच्छयने देवं देवीभ्यांसह मन्त्रवित् ।
कुम्भञ्च सन्न्यसेद्देवपादपार्श्वे विचक्षणः ॥ ११७
पक्षेण च्छादयेत्पश्चाद्देवं कुम्भसमायुतम् ।
यजमानोऽथ तत्काले ऋत्विग्भिस्सहितं गुरुम् ॥ ११८
पूजयित्वा विधानेन तत्तत्कार्ये नियोजयेत् ।
प्राच्यामाहवनीयन्तु अन्वाहार्यन्तु दक्षिणे ॥ ११९
प्रतीच्यां गार्हपत्यन्तु आवसथ्यं तथोत्तरे ।
संसाध्य परितो धाम दिशाहोमांश्च कारयेत् ॥ १२०
आधारं विधिवत्कृत्वा मथितेनैव वह्निना ।
आहवनीये जुहुया 'दतो देवा' दि वैष्णवम् ॥ १२१
दक्षिणाग्नौ तु जुहुयात्पौरुषं सूक्तमेव च ।
गार्हपत्ये तथा विद्वान् यद्देवाद्यातुतीर्यजेत् ॥ १२२
विष्णुसूक्तसमायुक्तं मूर्तिहोमं तथोत्तरे ।
हौत्रं तत्र प्रशंस्यैव मूर्त्यावाहनमाचरेत् ॥ १२३
आवाहनक्रमेणैव चतुर्थ्यन्तं प्रयुज्य च ।
जुष्टाकारं ततः कुर्यात्तत्क्रमेणाहुतीर्यजेत् ॥ १२४
शाबवस्य प्रधानाग्नावन्वाहार्ये यजेदिदम् ।
'स्वौजसा सर्व' मन्त्रेण हुनेदष्टोत्तरं शतम् ॥ १२५

चतुर्दिक्षु विधानेन वेदानध्यापयेत्क्रमात् ।
नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं व्यपोह्य च ॥ १२६
पुनः प्रभाते धर्मात्मा यजमानयुतो गुरुः ।
स्नात्वा स्नानविधानेन सूक्तानि च जपेत्क्रमात् ॥ १२७
मुहूर्ते समनुप्राप्ते उद्धृत्य च पुरिं ततः ।
कुम्भं बिम्बसमायुक्तं नीत्वा धामप्रदक्षिणम् ॥ १२८
प्रविशेदालयं पश्चात् बिम्बस्थापनमाचरेत् ।
कुम्भस्थां शक्तिमादाय तत्तद्बिम्बे न्यसेद्बुधः ॥ १२९
बीजाक्षरं सुसंन्यस्येत्पश्चात्पुण्याहमाचरेत् ।
उपचारैस्समभ्यर्च्य सप्तविंशतिभिस्ततः ॥ १३०
पायसादीन् निवेद्यैव दक्षिणादानमाचरेत् ।
देवदेवं नमस्कुर्याद्भक्तिश्रद्धासमन्वितः ॥ १३१
उत्सवञ्चोत्सवान्ते च स्नपनं कारयेत्तथा ।
स्वप्रधाने समुद्दिष्टो विधिरेष मयाऽनघाः ॥ १३२
अप्रधानं यदि भवेद्दिशाहोमं विना चरेत् ।
रत्नन्यासस्तथा नेष्टः उत्सवोऽपि न सम्मतः ॥ १३३
एवं यः कुरुते भक्त्या रामं दाशरथिं प्रति ।
स भुक्त्वा चैहिकान् भोगान् ततो मोक्षमवाप्नुयात् ॥ १३४

कृष्णः

अतः परं प्रवक्ष्यामि कृष्णस्य स्थापनाविधिम् ।
प्रादुर्भावेषूत्तमस्य पुरुषस्य जगत्पतेः ॥ १३५
स्वेच्छया भगवानीशः धर्मग्लानिर्यदा भवेत् ।
तदा धर्मस्य रक्षार्थं संहाराय दुरात्मनाम् ॥ १३६

अवतारं करोतीशः रामकृष्णादिसंज्ञया ।
प्रादुर्भावेषूत्तमौ तौ शक्तिमन्तौ विशेषतः ॥ १३७
रामकृष्णौ ततश्शक्तिं
तयोस्सम्पूज्य मानवाः ।
इह लोके सुखं भुक्त्वा
विष्णोस्सायुज्यमाप्नुयुः ॥ १३८
कृष्णस्यालयनिर्माणप्रतिमालक्षणादिकम् ।
प्रतिष्ठां स्नपनञ्चैव पूजनाद्यं क्रमेण वै ॥ १३९
वक्ष्यामि विस्तरेणैव शृणुध्वमृषिसत्तमाः ।
ग्राममध्ये च पूर्वे च दक्षिणे पश्चिमे तथा ॥ १४०
कारयेदुत्तरे चैव विदिशास्वपि मन्दिरम् ।
आरामे वा नदीतीरे पर्वते वा वनाश्रये ॥ १४१
समुद्रवेलादेशे वा अन्यस्मिन् वा मनोरमे ।
सरस्तटाकतीरे वा नदीसागरसङ्गमे ॥ १४२
नगरे पत्तने वापि खर्वटे कुटिके तथा ।
भूमिं परीक्ष्य पूर्वं वै शुचौ देशे मनोरमे ॥ १४३
कर्षणं विधिवत्कुर्याद्यावत्प्राकारविस्तरम् ।
कृष्णस्य मन्दिरं कुर्यात्संस्कारयुतमुक्तवत् ॥ १४४
कुम्भाकारं त्रिकूटं वा हस्तिपृष्ठमथापि वा ।
नन्द्यावर्तं विमानं वा कृष्णस्योत्तमसिद्धये ॥ १४५
अथ वा मण्डपं वापि कूटं वा राजधानिकम् (?) ।
कुर्यादेकतलं गेहमेकप्राकारसंयुतम् ॥ १४६
पीठगोपुरसंयुक्तं यानशैषिकसंयुतम् ।

पूर्ववद्दारु सङ्गृह्य शूलं कृत्वा विचक्षणः ।

कृष्णलक्षणम्

दशतालोक्तविधिना मानोन्मानादि लक्षयन् ॥ १४८
रत्नन्यासं ततः कृत्वा शूलस्थापनमाचरेत् ।
रज्जुबन्धं मृत्कियाञ्च योजयेद्धटशर्कराः ॥ १४९
एवं कृत्वा यथान्यायं पटाच्छादनमाचरेत् ।
पादादुष्णीषपर्यन्तमेवं मान उदाहृतः ॥ १५०
द्विभुजं त्रिणतं कुर्याद्देवं सुन्दरविग्रहम् ।
सस्यश्यामनिभं प्रोक्तं कृष्णरूपं विशेषतः ॥ १५१
रक्तवस्त्रधरं कुर्यात्कृष्णं भूषणभूषितम् ।
उष्णीषन्तु ततः कुर्यात्पार्श्वे पुरिम(?)संयुतम् ॥ १५२
सहस्रकुन्तलैर्युक्तं शिरस्सम्यक् समाचरेत् ।
दक्षिणे कर्णनालन्तु रत्नकुण्डलसंयुतम् ॥ १५३
पञ्चरत्नसमायुक्तमन्यत्र परनालिकम् (?) ।
वामञ्च कर्णनालञ्च शङ्खपत्रेण योजयेत् ॥ १५४
पद्मपत्रेक्षणं राजत्पीनोष्ठपुटसंयुतम् ।
हारं श्रीवत्सदेवं स्यान्मुक्तामालामथोपरि ॥ १५५
बाहुबन्धं ततः कुर्यात्किंपुरिं मुखमध्यमे ।
अधस्तादुलिकाञ्चैव योजयेद्वामदक्षिणे ॥ १५६
प्रकोष्ठे च तथा कुर्यात्कटकत्रितयं बुधः ।
हस्ताङ्गुलीयरत्नानि युक्तियुक्तं प्रयोजयेत् ॥ १५७
उत्तरीयं तथा विद्वान् वनमालाञ्च कारयेत् ।
छत्रवीरसमायुक्तमुरोबन्धञ्च योजयेत् ॥ १५८

कटिबन्धं तथा कुर्यात्सर्वरत्नसमन्वितम् ।
नूपुरं त्रिमुखं कुर्यान्मुखरत्नसमन्वितम् ॥ १५९
अथ दक्षिणहस्तन्तु क्रीडायष्टिसमन्वितम् ।
वामेन कोपरेणात्र गरुडं लम्बयेत्क्रमात् (?) ॥ १६०
अहीनयौवनञ्चैव नातिबालञ्च कारयेत् ।
क्रीडारससमायुक्तं दिव्यरूपञ्च कारयेत् ॥ १६१
पादाङ्गुलिसमासक्तपादबन्धञ्च कारयेत् ।
तस्य दक्षिणपार्श्वे तु रुक्मिणीं कारयेत्क्रमात् ॥ १६२
पक्वाकुलवर्णाञ्च शुक्लवर्णाम्बरां तथा ।
सर्वाभरणसंयुक्तां नवतालेन कारयेत् ॥ १६३
आदाय दक्षिणे हस्ते औत्पलं पुष्पमेव च ।
प्रसार्य वामहस्तन्तु किञ्चिद्देवं निरीक्ष्य च ॥ १६४
सत्यभामाञ्च वामे तु रक्तवस्त्रां स्वलङ्कृताम् ।
श्यामवर्णां तथा कुर्यात्पुष्पमालाधरां करे ॥ १६५
सर्वाभरणसंयुक्तां श्रीवत्सकुटबन्धनाम् ।
वामपार्श्वे गरुत्मन्त गोपालकमथापि वा ॥ १६६
गरुडं पूर्ववत्कुर्याद्गोपालं गोपवेषकम् ।
श्वेताम्बरधरं कुर्याद्रक्तवस्त्रधरं तथा ॥ १६७
वंशहस्तञ्च गोपालं किञ्चिद्देवं निरीक्ष्य च ।
भागाङ्गुलाधिकं कुर्यादष्टतालेन योजयेत् ॥ १६८
श्रीदामानं तथा कुर्यात्करमञ्जलिसंयुतम् ।
कङ्कुश्यामनिभं कुर्याच्छ्वेताम्बरधरं तथा ॥ १६९
पञ्चमात्राधिकमानेन अष्टतालेन योजयेत् ।
निर्माल्यहारिणञ्चोक्तविधिना कारयेद्बुधः ॥ १७०

पताकाहस्तमेकन्तु धृताहिञ्चैव वामकम् ।
प्रभामण्डलसम्बद्धपादपद्मविभूषितम् ॥ १९१
तत्पार्श्वे नागपत्न्यश्च सर्वाभरणभूषिताः ।
कृताञ्जलिपुटाः कार्या देवमानम्य चादरात् ॥ १९२
एवं कृष्णं प्रकुर्वीत कालीयशिरसि स्थितम् ।
अनन्तलीलाललितकृष्णरूपाणि कारयेत् ॥ १९३

नवनीतनटः

नवनीतनटञ्चापि कृष्णमेवं प्रकल्पयेत् ।
पद्मपीठोपरि गतमाकुञ्च्यैकं पदं विभुम् ॥ १९४
सन्धार्य दक्षिणे हस्ते नवनीतं तथेतरत् ।
प्रसार्य हस्तं नृत्यन्तं हर्षोत्फुल्लविलोचनम् ॥ १९५
कृष्णरूपाण्यसङ्ख्यानि सङ्ख्यातुं नैव शक्यते ।
बहुना किमिहोक्तेन रूपमिष्टं शुभं चरेत् ॥ १९६
पूर्ववत् स्थापयित्वा तु अर्चयेत्तु विधानतः ।
यद्यद्रूपधरं ध्यात्वा पूजयेद्भक्तिमान्नरः ॥ १९७
तत्तद्रूपधरो देवः सर्वकामान् प्रयच्छति ।
अर्चनस्नपनादीनि विधिनोक्तेन कारयेत् ॥ १९८
अथ चेदेकवेरं स्यात् ध्रुवहीनं विशेषतः ।
तत्तन्मूर्तिं समुच्चार्य पीठस्य परितः क्रमात् ॥ १९९
पुष्पं दत्त्वात् चतुर्दिक्षु देव्योर्देवस्यचैव तु ।
पुष्पन्यासं विना कुर्यात्पूजां पाद्यादिविग्रहैः ॥ २००
तत्तत्प्रधानमन्ते मूर्तिमन्त्रांस्तु योजयेत् ।
अष्टोपचारैरभ्यर्च्य कौतुकन्तु विशेषतः ॥ २०१

(पीठदेवांस्तथाऽभ्यर्चेत् सप्तविंशतिविग्रहैः ।
षोडशैर्विग्रहैर्वापि तं तं देवमनुस्मरन्) ? ॥ २०२

मानुषवासुदेवः

अत ऊर्ध्वं मानुषस्य वासुदेवस्य वै विधिम् ।
प्रवक्ष्यामि समासेन शृणुध्वमृषिसत्तमाः ॥ २०३
मनुष्यवपुषं देवं द्विभुजं शङ्खचक्रिणम् ।
श्यामलाङ्गञ्च तं कुर्यात्सर्वाभरणसंयुतम् ॥ २०४
दक्षिणे रुक्मिणीं देवीं स्वर्णाभाञ्च किरीटिनीम् ।
रक्ताम्बरधराञ्चैव सर्वाभरणभूषिताम् ॥ २०५
सव्ये पद्मधरां हस्ते प्रसार्यैतरमास्थितान् ।
दक्षिणे बलभद्रन्तु बलिनं मुसलायुधम् ॥ २०६
सर्वाभरणसंयुक्तं श्वेतं नीलाम्बरान्वितम् ।
तस्य दक्षिणपार्श्वे तु प्रद्युम्नं रक्तवर्णकम् ॥ २०७
पीतकौशेयवसनं किरीटाद्यैश्च भूषितम् ।
दीर्घक्षुरकरं वामं कट्यवलम्बितम् ॥ २०८
अनिरुद्धं वामपार्श्वे प्रवालाग्निसमप्रभम् ।
पुष्पाम्बरकरं कुर्यात् खड्गखेटकधारिणम् ॥ २०९
पार्श्वे साम्बं तथा कुर्यान्नीलाम्बुदसमप्रभम् ।
श्वेताम्बरं तथा कुर्यादंडादानकरं पुनः ॥ २१०
ब्रह्माणं दक्षिणे कुर्याच्चतुर्भुजसमन्वितम् ।
पूर्वोक्तेन प्रकारेण दशतालप्रमाणतः ॥ २११
गरुडञ्चोत्तरे कुर्यात्पूर्वोक्तनवतालतः ।
तद्रूपं कौतुकं कुर्यादाश्रित्य लक्षणं विधिम् ॥ २१२

मध्ये तु वासुदेवन्तु कारयेद्वा चतुर्भुजम् ।
एवं मानुषरूपन्तु गेपुरे दीर्घशालके ।
स्थापयित्वाऽर्चयेद्देवं सर्वकामार्थसिद्धये ॥ २१३

दैविकवासुदेवः

अत ऊर्ध्वं दैविकन्तु वासुदेवं वदामि वः ।
सोमच्छन्दविमाने वा बृहद्बृतेऽपि वा हरिम् ॥ २१४
चतुर्भुजधरं देवं शङ्खचक्रधरं परम् ।
अभयं दक्षिणं हस्तं वामं कट्यवलम्बितम् ॥ २१५
किरीटाद्यैस्समस्तैश्च भूषणैरपि भूषितम् ।
रक्ताम्बरधरं देवं दशतालेन मानतः ॥ २१६
कारयेच्चोभयोः देव्यौ पार्श्वयोः कारयेत्तथा ।
बलभद्रादिदेवांश्च पूर्वोक्तविधिना चरेत् ॥ २१७
निरायुधान् साधुवान्वा देवीभ्यां सह वा विना ।
कारयेत्सह देवीभ्यां विशेषस्सम्प्रवक्ष्यते ॥ २१८
'रेवतीं रोहिणीञ्चेति रमामिन्दुकरी' मिति ।
रक्तां नीलां तथा श्यामां पीतवर्णां समाचरेत् ॥ २१९
एकं पुष्पधरं हस्तं कुर्यादेकं प्रसारितम् ।
देवीवियुक्तं युक्तं वा मार्गद्वयमथाचरेत् ॥ २२०

स्थापनविधिः

एवं दैविकमार्गस्स्यात् स्थापनं तु प्रवक्ष्यते ।
पञ्चवीरोक्तविधिना क्रमादग्निषु पञ्चसु ॥ २२१
सभ्ये विष्णुं समुद्दिश्य हौत्रं तत्र समाचरेत् ।
'वासुदेवं यदुवरं भूहितं पुरुषोत्तमम्' ॥ २२२

'सत्यभामां सतीञ्चैव सन्नतीं विष्णुवल्लभाम्' ।
ब्रह्मणः पद्महोमस्स्याद्वीशस्यौपासनं चरेत् ॥ २२३
'रुक्मिणीं सुन्दरीं देवीं श्रिय' ञ्चेति समर्चयेत् ।
'रामं यदुवरं चैव हलायुध' मिति क्रमात् ॥ २२४
'प्रद्युम्नञ्च सुरूपाक्षं मदनांशं महाबलम्' ।
'अनिरुद्धं महान्तञ्च वैराग्य' मिति च क्रमात् ॥ २२५
सर्वतेजोमयञ्चेति अनिरुद्धं समर्चयेत् ।
'साम्बं सर्वसुखञ्चेति समृद्धं सामगं' तथा ॥ २२६
ब्रह्माणं गरुडञ्चापि पूर्वोक्तैर्नाममिर्यजेत् ।
विष्वादिपञ्चमूर्तीश्च श्रियञ्चेति गहीमिति ॥ २२७
मानुषोक्तक्रमेणैव कुर्यादावाहनादिकम् ।
आवाह्य बलभद्रादींस्तद्धोमे विशेषतः ।
जुष्टाकारांस्तथा स्वाहाकारान् पूर्वोक्तवच्चरेत् ॥ २२८
सभ्ये तु वैष्णवं हुत्वाऽऽहवनीये तु पौरुषम् ।
दक्षिणे विष्णुसूक्तञ्चैकाक्षरादि तु पश्चिमे ॥ २२९
उत्तरे विष्णुगायत्रीं ब्राह्मं ब्रह्मानले यजेत् ।
गारुडं गरुडस्याग्नौ तांस्तान् स्त्रीसहितान् स्मरन् ॥ २३०
प्रत्येकं विंशतिं हुत्वा पश्चादग्निं विसर्जयेत् ।
स्नपनं शयनं कुम्भसाधनं स्यात्समीपतः ॥ २३१
मध्ये च दक्षिणे पार्श्वे क्रमादेवं समाचरेत् ।
एवं मूर्त्यर्चनं कुर्याच्छेषं पूर्वोक्तवच्चरेत् ॥ २३२

आदिमूर्तिः

अत ऊर्ध्वं प्रवक्ष्यामि आदिमूर्तेस्तु लक्षणम् ।
मूर्तीनामनिरुद्धस्तु सर्वासामादिरुच्यते ॥ २३३

कुम्भाकारविमानं वा चतुर्मुखमथापि वा ।
सोमच्छन्दं त्रिकूटं वा श्रियावृत्तमथापि वा ।
पूर्वोक्तेन विधानेन विमानं सम्यगाचरेत् ॥ २३४
आदिमूर्तिञ्च कुर्वीत
अनन्तासनसंयुतम् ।
पूर्वादि वृत्तं कुर्वीत
त्रिरावृत्त्या प्रदक्षिणम् ॥ २३५
वृत्तं समं प्रकुर्वीत सर्पाकारसमन्वितम् ।
तस्य मध्ये सुखासीनं सर्पभोगे तथाऽऽश्रितम् ॥ २३६
उपधानं सर्पभोगे कृत्वा चैव शनैश्शनैः ।
प्रकुटोपरि सञ्छाद्य विषवेगसमन्वितान् ॥ २३७
फणानां पञ्चवर्णानां युतं पञ्चभिरादरात् ।
वेरायामसमायाममनन्तासनमिष्यते ॥ २३८
प्रसार्य दक्षिणं पादं वाममाकुञ्च्य सुस्थितम् ।
शङ्खचक्रधरं देवं सर्वाभरणभूषितम् ॥ २३९
अनिरुद्धं रक्तवर्णं प्रवालसदृशद्युतिम् ।
पूर्वोक्तेन प्रमाणेन कारयेद्बिम्बमुत्तमम् ॥ २४०
नारसिंहवराहाभ्यामर्चितं वादि दैवतम् ।
दक्षिणे नारसिंहाञ्च वामे वाराहमर्चयेत् ॥ २४१
एकजानुक्रमेणैव तौ स्ववर्णसमायुतौ ।
पुष्पाञ्जलिसमायुक्तौ देवदेवं समीक्ष्य वै ॥ २४२
मध्ये ब्रह्मस्थानमित्योः पूजकस्थानमिष्यते ।
अर्चयित्वा विधानेन पूर्वोक्तेन क्रमेण तु ।
उत्सवं स्नपनञ्चैव बल्यादीन् पूर्ववच्चरेत् ॥ २४३

गजेन्द्रमोक्षणम्

अतः परं प्रवक्ष्यामि आविर्भावांश्च शार्ङ्गिणः ।
गजेन्द्रस्य तु मोक्षार्थं शिशुमारवधाय च ॥ २४४
गरुडस्कन्धमारुह्य ग्राहसंसृष्टचक्रकम् ।
शङ्खं शार्ङ्गञ्च वामाभ्यां धरन्तं वेगसंयुतम् ॥ २४५
उद्धृत्य दक्षिणं पाणिं किञ्चिदालोलकुन्तलम् ।
एवं चतुर्भुजं कुर्यात्कृपारोषसमन्वितम् ॥ २४६
इषुधिभ्याञ्च संयुक्तं शिशुमारनिरीक्षणम् ।
अर्धज्यागतमार्गेण चासीनं पीतवाससम् ॥ २४७
तार्क्ष्यं दक्षिणहस्तेन स्पृशन्तं स्फुरितावरम् ।
ग्राहे सार्चीकृतावाहमर्धपद्मकुटीमुखम् ? ॥ २४८
जलस्थशिशुमारेणग्रस्ताङ्घ्रिं पुरतः स्थितम् ।
ऊर्ध्वाननं गजेन्द्रञ्च पुष्करोद्धृतपङ्कजम् ॥ २४९
कृत्वैवं पूजयेद्देवं विष्णुं गरुडवाहनम् ।
त्रैलोक्यं मोहितं येन यदुषा कृपयाऽपि च ॥ २५०
त्रैलोक्यमोहनं नाम प्रतिमां परिकल्पयेत् ।
तस्य पूजनया लोकः त्रिलोकविजयी भवेत् ॥ २५१
ऐहिकामुष्मिके सर्वं लभते नात्र संशयः ।
शत्रुक्षयो भवेच्चैव सर्वाभीष्टञ्च सिद्ध्यति ॥ २५२
किंकुर्वाणा भवन्त्यस्य प्राणिनस्सर्वदा भुवि ।
अन्ते कलेवरं त्यक्त्वा सायुज्यं लभते हरेः ॥ २५३
लोहाद्यैः प्रतिमां कुर्याच्चित्राभासेऽथवा हरिम् ।
पूजयेदुक्तमार्गेण विष्णुं गरुडवाहनम् ।
अनेनैव तु मार्गेण तस्य स्युः सर्वसम्पदः ॥ २५४

सूर्यमण्डलान्तस्थमूर्तिः

अतः परं प्रवक्ष्यामि आविर्भावेषु चोत्तमम् ।
अन्यद्रूपं सूर्यमण्डलान्तस्स्थं कमलाऽसने ॥ २५५
समासीनं हिरण्याभं शङ्खचक्रगदाधरम् ।
हारकेयूरमकरकुण्डलाञ्चितविग्रहम् ॥ २५६
पीतेन वाससा चान्यैर्दिव्यैर्दिव्याम्बरैर्युतम् ।
रक्तास्यपाणिचरणं श्रीवत्साङ्कं चतुर्भुजम् ॥ २५७
योगासनसमायुक्तं भ्राजमानं सुखोद्वहम् ।
एवं सङ्कल्प्य यत्नेन योगाद्यैरर्चयेद्धरिम् ॥ २५८
बिम्बं कर्तुमशक्तश्चेद्ध्यायेदादित्यमण्डले ।
सायुज्यमाप्नुयात्तेन नरो निर्धूतकल्मषः ॥ २५९

क्षीरार्णवस्थमूर्तिः

अथ प्रपूजयेद्देवमनन्तशयनं हरिम् ।
क्षीरार्णवे शेषभोगे योगनिद्रावशं गतम् ॥ २६०
सहस्रफणसञ्छन्नमूर्ध्वभागं तथाऽम्बुधौ ।
नाभिसञ्जातपद्मोदरासीनचतुराननम् ॥ २६१
दिव्याभरणसंयुक्तं देवीभ्यां मृदिताङ्घ्रिकम् ।
पञ्चायुधैः परिवृतं मधुकैटभसेवितम् ॥ २६२
सताक्ष्यं ताक्ष्यरहितं द्विभुजं वा चतुर्भुजम् ।
चित्ते वाऽऽभासके वाऽथ पूजयेत्सर्वसिद्धये ॥ २६३

अनिरुद्धः

अथवाऽऽराधयेद्देवमादिमूर्तिं सनातनम् ।
अनिरुद्धं तस्य पूजाप्रकारः पूर्वमीरितः ॥ २६४

विष्णुञ्च पुरुषञ्चैव सत्यञ्चैवाच्युतं तथा ।
समाहृत्य तु पश्चापि मूर्तीर्विधिवदर्चयेत् ॥ २६५

श्रीधरः

तथा श्रीधरमूर्तिञ्च पूजयेद्धृदये क्वचित् ।
चन्द्रमण्डलमध्ये तु सुखासीनं तु श्रीधरम् ॥ २६६
मुक्तादामावृतञ्चैव शङ्खचक्रधरं तथा ।
मुक्ताफलैरेव कृतैः भूषणैस्सुविभूषितम् ।
श्रीधरंप्रतिमां कृत्वा पूजयेत्सर्वसिद्धये ॥ २६७

विश्वरूपधरः

विश्वरूपञ्च देवेशं पूजयेद्दैवतं तथा ।
अनेकभुजसंयुक्तमनेकायुधधारिणम् ॥ २६८
अनेकदेवतोपेतमनेकाभरणोज्ज्वलम् ।
अनेकविस्मयोपेतं वन्द्यमानं सुरादिभिः ॥ २६९
तथा दन्तसहस्रान्तर्विलीनजगदन्तरम् ।
स्थितं कृत्वाऽर्चयेद्विद्वान् सर्वशत्रुक्षयाय वै ।
सर्वोपद्रवनाशार्थं सर्वकार्यार्थसिद्धये ॥ २७०

हरिशाङ्करः

हरिशाङ्करमन्यं वै पूजयेद्भक्तिसंयुतः ।
अर्धं वैष्णवरूपञ्च यथाऽर्धं शाङ्करं वपुः ॥ २७१
रूपं लक्षणवत्कृत्वा पूजयेत्तु विचक्षणः ।
वैष्णवैश्च तथा रौद्रैर्मन्त्रैः स्थापनमाचरेत् ॥ २७२

शेषं युक्त्या प्रकुर्वीत अर्चनादिकमादरात् ।
अन्यानि देवरूपाणि शास्त्रोक्तानि शुभानि च ।
संस्थाप्य पूजयेदिच्छन् भक्तो भक्तिसमन्वितः ॥ २७३

इत्यार्षे श्रीवैखानसे भगवच्छास्त्रे भृगुप्रोक्तायां संहितायां
खिलाधिकारे दशावतारकल्पो नाम
एकोनविंशोऽध्यायः ।

अथ विंशोऽध्यायः

नित्यार्चनक्रमः

ऋषय ऊचुः—

नमस्ते भगवन् ब्रह्मन् नमस्ते ब्रह्मणः सुत ! ।
त्वत्प्रसादाच्छ्रुतो विष्णोरस्माभिः स्थापनाक्रमः ।
कौतुकस्यौत्सवस्यापि तथाऽर्चायाः विशेषतः ॥ १
भेदान् नवविधांश्चैव लोहसंस्कारमेव च ।
नित्यार्चनक्रमञ्चैव श्रोतुमिच्छामहे वयम् ॥ २

कौतुकादिव्यवस्थाप्रकारः

भृगुरुवाच—

युष्माभिश्चोदितं सर्वं प्रवक्ष्यामि तपोधनाः ।
एकस्मिंस्तु विमाने वै बेराणि त्रीणि कल्पयेत् ॥ ३
अशक्तो द्वे तथैकं वा यथाशक्ति प्रकल्पयेत् ।
कौतुकञ्चौत्सवार्चा त्रिविधं बिम्बमुच्यते ॥ ४
कौतुकं ब्रह्मणः स्थाने विधिना स्थापयेद्बुधः ।
तस्यैवोत्तरतः पार्श्वे औत्सवं स्थापयेत्तथा ॥ ५

दक्षिणे कौतुकस्यात्र किञ्चित्पूर्वं समाश्रिते ।
स्थापयित्वा तथैवार्चां नित्यपूजां समाचरेत् । ६
कुर्यात्कौतुकबिम्बे वै नित्यपूजां यथाक्रमम् ।
औत्सवे च तथा बिम्बे काम्यकर्माणि कारयेत् ॥ ७
कर्म नैमित्तिकं यत्तदर्चायां कारयेद्बुधः ।
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ॥ ८
पुण्यकालं समीक्ष्यैव तत्कालात्पूर्वमाचरेत् ।
यजमानस्य जन्मर्क्षे राज्ञो जन्मदिने तथा ॥ ९
अन्यस्मिन् पुण्यनक्षत्रे विष्णुपञ्चदिनेषु च ।
कर्मोद्दिष्टं काम्यमुक्तं कालो मध्याह्न उच्यते ॥ १०
ऐकाहिकोत्सवोक्तेन मार्गेणोत्सवमाचरेत् ।
ग्रामं प्रदक्षिणं कृत्वा तीर्थस्थानं प्रविश्य च ॥ ११
उत्सवोक्तप्रकारेण तीर्थस्नानं समाचरेत् ।
पश्चाद्ग्रामं परीत्यैव देवालयमुपव्रजेत् ॥ १२
स्नपनोक्तेन मार्गेण स्नापयेत्पुरुषोत्तमम् ।
प्रभूतञ्च निवेद्यैव स्वस्थाने स्नाप्य पूजयेत् ॥ १३
अथ नैमित्तिकं कुर्यादुर्दुर्भिक्षे व्याधिजे भये ।
अद्भुतोत्पादनादौ च तच्छान्तेषु ॥ १४
उत्सवस्नपनादीनि
अर्चायां सम्यग चरेत् ।
विहीने चौत्सवेऽर्चायां
कौतुके सर्वमाचरेत् ॥ १५
(हीनमौत्सववेरस्थेदर्चायामुत्सवं चरेत्
हीने च स्नापने बेरे औत्सवे स्नपनं चरेत्)

कृत्वाऽऽश्रयं शुभे स्थाने
तत्र संस्थाप्य चार्चयेत् ।
कर्षणादीनि कर्माणि
हरेरिव समाचरेत् ॥ १०

बिम्बलक्षणम्

पूर्वोक्तविधिना कुर्याद्बाम्देवीं शुभलक्षणाम् ।
शिल्पशास्त्रोक्तमार्गेण शिल्पया चोत्तमं भवेत् ॥ ११
ध्रुवानुरूपां वै कुर्यात् कौतुकप्रतिमामपि ।
नवतालक्रमेणैव चित्रं चित्रार्धमेव वा ॥ १२
जटामण्डलसंयुक्तां स्वर्णवर्णां चतुर्भुजाम् ।
ऊर्ध्वदक्षिणहस्तन्तु अक्षमालाधरं तथा ॥ १३
मुद्राधरमधोहस्तं वरदं वापि कारयेत् ।
ज्ञानमुद्रा मुनिहिता वरदा भोगदा स्मृता ॥ १४
ज्ञानमुद्रा च मुद्रासु सदंशं(?) हृदयोन्मुखम् ।
सैव मुद्रा पराभूता ज्ञेया व्याख्यानमुद्रिका ॥ १५
कमण्डलुधरश्चोर्ध्ववामहस्तं तथाऽधरम् ।
हस्तञ्च पुस्तकधरं कारयेत्तु विचक्षणः ॥ १६
पद्मपीठोपरि पुनः कल्पयेद्ब्राह्ममासनम् ।
कुर्यात्प्रसारितं पादं दक्षिणं कुञ्चितं परम् ॥ १७
सर्वाभरणसंयुक्तां श्वेतवस्त्रविभूषिताम् ।
कक्ष्याबद्धस्तनयुगां छन्नवीरोपशोभिताम् ॥ १८
कुर्यात्सकलसौन्दर्यसम्कृतां बुद्धिदेवताम् ।
शुक्लवस्त्रधरां शुक्लां शुक्लमाल्यानुलेपनाम् ॥ १९

शुक्लपद्मासनां देवीं केचिदाहुर्मनीषिणः ।

परिवारः — लक्षणम्

दक्षिणे सुन्दरीं कुर्याद्धस्ते व्यजनधारिणीम् ॥ २०
रक्तवर्णां सुरूपाञ्च सर्वाभरणभूषिताम् ।
वामे च विजयां कुर्याद्व्याजिनीं श्यामलां शुभाम् ॥ २१
दक्षिणोत्तरयोः ब्रह्मस्थानकुड्यद्वयान्तरे ।
शुक्रञ्च शौनकञ्चैव पूजकौ तु समाचरेत् ॥ २२
शुक्रं कुर्याद्रक्तवर्णं शौनकं श्वेतमेव च ।
सौम्यभावसमायुक्तौ जटामकुटधारिणौ ॥ २३
अशक्तौ परिवारांस्तु चित्रवर्णैस्समालिखेत् ।
पृष्ठे श्रियमुमाञ्चैवारुन्धतीञ्च कुमुद्वतीम् ॥ २४
एवं कर्तुमशक्तश्चेद्ब्रह्मभागे यथाविधि ।
एकबेरविधानेन प्रतिष्ठां कारयेद्बुधः ॥ २५
दक्षिणे प्रथमे द्वारे विशोकां श्यामरूपिणीम् ।
वामे चोत्पलकां कुर्यात्तप्तहाटकसन्निभाम् ॥ २६
जयां कुर्याद्रक्तवर्णां द्वितीयद्वारदक्षिणे ।
वामे च विजयां कुर्याच्छ्यामलाङ्गीं सुरूपिणीम् ॥ २७
सोपानमध्ये हंसञ्च कारयेच्छिल्पयाऽथ वा ।
तस्योत्तरे समासीनां रक्तवर्णां सुरोत्तमाम् ॥ २८
कुर्यादाभरणैर्युक्तां सुरूपांशुकधारिणीम् ।
प्रथमावरणे त्वेवं द्वितीयावरणे तथा ॥ २९
मण्डपानि च शक्तश्चेद्गोपुरादींश्च कारयेत् ।
बहिर्द्वितीयावरणाद्भूतपीठञ्च कारयेत् ॥ ३०

जगन्त्यवति ब्रह्माद्यैरर्चिता कृपया पुरा ।

पूजामहिमा

ऐहिकामुष्मिकं सर्वमिच्छन् देवीं प्रपूजयेत् ।
ब्रह्मवृद्धिमभीप्सद्भिः ब्राह्मणैः क्षत्रियैस्तथा ॥ ६
काङ्क्षमाणैः शत्रुजयमर्चनीया नृपाङ्गणे ।
यतः सा वैष्णवी शक्तिः तामुद्दिश्य कृतार्चनम् ॥ ७
भवेत्सिद्धिदमित्यत्र नैव कार्या विचारणा ।
ग्रामे वा नगरे वापि पत्तने कुटिकेऽपि वा ॥ ८
पर्वताग्रे नदीतीरे कान्तारे वा सरित्तटे ।
कारयेदालयं तत्र कर्षणादीनि चादरात् ॥ ९
हरेरुक्तविधानेन कारयेद्भक्तिमान्नरः
राज्ञां गृहार्चनाय स्याद्वेश्माभिमुखमालयः ॥ १०
धनाधिपदिशः पूर्वे तथा द्वारस्य दक्षिणे ।

आचार्यवरणम्

निर्मित्सुरालयं देव्या यजमानो मुदाऽन्वितः ॥ ११
आचार्यं वरयेत्पूर्वं मन्त्रकल्पविचक्षणम् ।
श्रीवैखानससूत्रेण निषेकादिक्रियाऽन्वितम् ॥ १२
सकलात्मगुणोपेतं शान्तं दान्तं जितेन्द्रियम् ।
तदाज्ञामनुसृत्यैव सर्वकार्याणि चाचरेत् ॥ १३

बालागरादि

आलयं कर्तुकामस्तु बालागारं प्रकल्पयेत् ।
भूमियज्ञञ्च कृत्वा तु दुर्गासूक्तेन होमयेत् ॥ ४१

शताधिकं समावर्त्य पद्माग्नौ दोषशान्तये ।
शुभे मुहूर्ते दुर्गां तां तथा निर्माल्यहारिणीम् ॥ १५
बालागारप्रतिष्ठोक्तविधिना स्थापयेद्गुरुः ।

बिम्बमानम्

नवार्धतालमानेन देवीं कुर्याच्चतुर्भुजाम् ॥ १६
दधतीमूर्ध्वहस्ताभ्यां शङ्खचक्रे समुज्ज्वले ।
अन्याभ्यां दधतीं देवीमञ्जलिं हृदये पुनः ॥ १७
केयूरहारमकुटदिव्याभरणभूषिताम् ।
पीताम्बरधरां देवीं कक्ष्याबद्धपयोधराम् ॥ १८
ताम्रेण दारुणा वाथ देवीं रम्यां प्रकल्पयेत् ।

परिवारः

नवतालेन च जयां शैपिकीं परिकल्पयेत् ॥ १९
कुर्याच्चतुर्भुजां देवीं विजयार्थी विशेषतः ।
कुर्याद्द्वौवारिकं भूतं मृगेन्द्रञ्चैव वाहनम् ॥ २०
द्वारं पालयतो देव्यौ गङ्गा च यमुना तथा ।
एभिः परिवृतां देवीं बालागारे समर्चयेत् ॥ २१
एवं विधाय विधिना विमानं कारयेद्बुधः ।
विमानं कारयित्वा तु शूलस्थापनमाचरेत् ॥ २२

बिम्बलक्षणम्

चतुर्भुजां तडिद्वर्णां मकुटेन स्वलङ्कृताम् ।
शङ्खचक्रधरां देवीं बद्धाञ्जलिपुटां तथा ॥ २३
सस्यश्यामनिभां कुर्यात्कक्ष्याबद्धपयोधराम् ।
सौम्यरूपमिदं प्रोक्तं सर्वसम्पत्समृद्धिदम् ॥ २४

अथवाऽष्टभुजां कुर्यादिच्छन् शत्रुविनाशनम् ।
शक्तिशार्ङ्गासिचक्राणि शरत्राङ्कुलमुद्गराः ॥ २५
खेटकच्छायुधानि स्युः रूपं घोरतमं भवेत् ।
महिषासुरमूर्धस्थसव्यापादाम्बुजां तथा ॥ २६
तथा कुञ्चितवामाङ्घ्रिं वीर्यार्थीं कारयेत्सदा ।
देव्या बेरं ध्रुवास्यं स्यादेवं लक्षणसंयुतम् ॥ २७
अथ वा सुखमासीनां कुर्यात्सिंहासने शुभे ।
सौम्यरूपां क्रियादेवीं सत्यश्यामां चतुर्भुजाम् ॥ २८
सर्वप्राणिहिता ह्येषा प्रतिमा पुष्टिदायिनी ।

स्थापनदेशः

दुर्गायाः स्थापनं ग्रामे नगरे च विशेषतः ॥ २९
सर्वकामसमृद्धिञ्च सर्वशान्तिञ्च यच्छति ।
स्थापयेद्ब्रह्मणः स्थाने पृथक् देवीं चतुर्भुजाम् ॥ ३०
केवलं शिलया कुर्यान्मोक्षार्थी प्रतिमां तथा ।
उक्तेष्वेकेन मार्गेण देवीं पारिषदैर्युताम् ॥ ३१
शिल्पशास्त्रोक्तविधिना कारयेच्छिल्पिना बुधः ।

परिवारकल्पनम्

कुर्याच्चामरधारिण्यौ पार्श्वयोरुभयोरपि ॥ ३२
भित्तेरूर्ध्वमुभे कुर्याद्विन्दां पुष्टिं क्रमेण वै ।
यक्षा विद्याधरा देव्यै दधुस्ते परिचारिके ॥ ३३
दक्षिणे भित्तिपार्श्वे तु पद्मां पद्मकरां तथा ।
उमां तथा वामकरे पुष्पमालाधरां चरेत् ॥ ४३

ऋषिराङ्गिरसश्चैव मृकण्डुश्च तथाऽपरः ।
पूजकौ पुष्पहस्तौ तौ मुनिमुख्यौ प्रकीर्तितौ ॥ ३५
अन्तर्द्वारे तथा कुर्याद्वामदक्षिणपार्श्वयोः ।
नन्दगोपं यशोदाञ्च प्रसन्ननयनावुभौ ॥ ३६
चित्राभासौ च कर्तव्यावष्टतालेन तावुभौ ।
एकस्मिन् जन्मनि च तौ देव्यास्तु पितरौ स्मृतौ ॥ ३७
गङ्गा च यमुना चैव प्रथमद्वारपालिके ।
अदितिश्चदितिश्चैव द्वितीयद्वारि कारयेत् ॥ ३८
मृगेन्द्रं वाहनस्थाने कल्पयेच्च विचक्षणः ।
न्यक्षादीन् लोकपालांश्च स्वे स्वे स्थाने प्रकल्पयेत् ॥ ३९
शैषिकीञ्च जगत्सेनां स्वस्थाने परिकल्पयेत् ।
उक्तांस्तु परिवारांस्तान् युक्तवर्णायुधादिभिः ॥ ४०
क्रमेण कारयेच्चैव विधिना विधिकोविदः ।
शिलया ध्रुवबेरञ्चेत्कल्पितं शिल्पयैव हि ॥ ४१
परिवारांश्च कृत्वा तु चित्रकर्म समाप्य च ।
सङ्कल्प्य स्थापनञ्चैव सर्वकर्माणि चाचरेत् ॥ ४२
कर्ता कल्पज्ञमासाद्य तमाचार्यं प्रकल्पयेत् ।

प्रतिष्ठाक्रमः

प्रतिष्ठादिवसात्पूर्वं नवमे वाथ सप्तमे ॥ ४३
पञ्चमेऽहनि वा कुर्याद्विधिना चाङ्कुरार्पणम् ।
सम्भ्रियेत च द्रव्याणि यथोक्तगुणवन्ति वै ॥ ४४
स्थापकान् ऋत्विजोऽन्यांश्च वरयेद्विधिपूर्वकम् ।
कौतुकं कारयेद्बेरं ध्रुवबेरानुरूपतः ॥ ४५

ज्येष्ठा च सर्वदाऽऽसीना इति पूर्वजदर्शनम् ।
वाह्नन्तं वा स्नानान्तं वा नाभ्यन्तं वा ध्रुवस्य च ॥ ८७
ब्रह्मेशावमितं सूर्यं तत्समान्वा प्रकल्पयेत् ।
तत्त्रिभागैकभागादिमानैः कुर्याच्च कौतुकम् ॥ ८८
देवेशाधिकमानेन परिवारान् न कल्पयेत् ।

बेराणामुपादानद्रव्यनियमः

ध्रुवेरन्तु यद्द्रव्यं तद्द्रव्या एव पार्षदाः ॥ ८९
विष्वक्सेनरविस्कन्दाः दुर्गा गरुड एव च ।
शैला अपि न दोषस्स्यादिति पूर्वजदर्शनम् ॥ ९०
ध्रुवकौतुकसंयुक्ते तत्र स्युः परिषद्गणाः ।
ध्रुवार्चनं ध्रुवार्चायां विपरीतं न कारयेत् ॥ ९१

बेराणां स्थाननियमः

एकबेरप्रतिष्ठा चेद्ब्राह्मे संस्थापयेत्तु तत् ।
ध्रुवकौतुकसंयुक्ते मानुषे स्थापयेत्तथा ॥ ९२
ब्राह्मे तु कौतुकं स्थाप्यमिति पूर्वजदर्शनम् ।

बेरविशेषाणां मुखनियमः

द्वारपालाः प्रकर्तव्याः किञ्चिद्द्वारनिरीक्षकाः ।
बहिर्मुखा विमानेशाः प्रासादाश्रयमन्दिराः ॥ ९३
ईशानसोमयोर्मध्ये दक्षिणाभिमुखोऽमितः ।
श्रीभूतारिध्वजाम्भोजयूथेशाश्चाक्षहा तथा ॥ ९४
कल्प्या बहिर्मुखा एव वीशस्त्वभिमुखो मतः ।
देवाग्रे स्थापयेदेतांस्तत्तदावरणे पृथक् ॥ ९५

अनपायिनः

श्रीभूतश्चैव गरुडः प्रथमावरणे स्थितौ ।
चक्रध्वजाब्जयूथेशा द्वितीयावरणादिषु ॥ ९६
एतेऽनपायिनः प्रोक्ता विष्वक्सेनसमन्विताः ।
प्राकाराश्रयवासाः स्युरन्ये वास्तुनिरीक्षकाः ॥ ९७

श्रीदेवी

तप्तहाटकसङ्काशां पद्मपत्रायतेक्षणाम् ।
तिसृभिः पुष्पचूडाभिर्ललाटोपरि शोभिताम् ॥ ९८
सपद्मवामहस्तां तां कक्ष्यावद्धघनस्तनीम् ।
प्रसारितेतरकरां सर्वाभरणभूषिताम् ॥ ९९
श्रीवत्सादिमबीजां तां फाल्गुने चोत्तरोद्भवाम् ।
श्रियं दक्षिणपार्श्वे तु हंसनिर्याख्यवाहिनीम् ॥ १००

भूदेवी

वामपार्श्वे महीं श्यामां सर्वाभरणभूषिताम् ।
वैशाखे रेवतीजातां दधतीं दक्षिणेऽम्बुजम् ॥ १०१
प्रसारितेतरकरां प्रसन्नेन्दुनिभाननाम् ।
महाचातकवाहां तां लक्ष्मीपूर्वाक्षरान्विताम् ॥ १०२
श्रीभूम्योः केचिदिच्छन्ति व्यत्ययेन करद्वयम् ।

मार्कण्डेय-भृगू

एकजानुक्रमासीनो भित्तिमूले तु दक्षिणे ॥ १०३
सोपवीतो जटामौलिः रोहिणीजोऽथ फाल्गुने ।
तप्तहाटकसंकाशो मार्कण्डेयस्तु पूजकः ॥ १०४

वामपार्श्वे भृगुः कार्यो जातिहिङ्गुलिकप्रभः ।
वैशाखे रोहिणीजातः ख्यातीशः पुष्पपाणिकः ॥ १०५

अत्रानुक्तन्तु यत्सर्वं पुराणस्योक्तवद्भवेत् ।

ब्रह्म-शङ्करौ

पद्मासने समासीनो रुक्मवर्णश्चतुर्मुखः ॥ १०६
कुशाक्षमालापाणिश्च जटामौलिश्चतुर्भुजः ।
हंसोऽस्य वाहनं प्रोक्तं सावित्रीपतिरुच्यते ॥ १०७
चैलेऽभिजिति सञ्जातोऽवरीपश्चैषिकोऽस्य तु ।
कमण्डलुध्वजश्चापि ब्रह्माऽख्यो दक्षिणे ध्रुवात् ॥ १०८
उत्तरे ध्रुववेरस्य प्रवालाग्निनिभो भवेत् ।
टङ्कैणधृत् चतुर्बाहुर्व्याघ्रचर्माम्बरो हरः ॥ १०९
अर्धचन्द्रजटामौलिः पिङ्गनेत्रैस्त्रिभिर्युतः ।
आर्द्राजो मागशीर्षे तु शिवश्चण्डीशऐषिकः ॥ ११०
दक्षिणाभिमुखश्चैव वृषभध्वजवाहनः ।
पार्वतीशश्शूलपाणिः पूज्यश्चात्र पिनाकवान् ॥ १११

कौतुकद्वितीयावरणे शिवादयः

शिवः शुभेश्वरः श्यामः सवारिकलशध्वजः ।
भेरीशब्दरवो रक्तवासाश्च गजवाहनः ॥ ११२
विश्वः श्यामनिभश्चैव शुद्धेशो वेदकेतुकः ।
हयश्च वाहनं तस्य मिलश्श्यामोऽरुणाम्बरः ॥ ११३
स्रुवध्वजश्च मित्रेशः अत्रिः श्यामस्सतीश्वरः ।
जुह्वध्वजो रक्तवर्णो रुरुवाहन एव च ॥ ११४
माघमासे तु रोहिण्यां जातास्ते तु बहिर्मुखाः ।
सनत्कुमारसनकसनातनसनन्दनाः ॥ ११५
हेमाभाः शुक्लवसनाः तैष्यमासे तु पुष्यजाः ।
कूर्चध्वजा इति ध्येयास्सर्वे ते ब्रह्मचारिणः ॥ ११६

धात्रादयो द्वारदेवाः

वेणुपत्रनिभो धाता रथयान उदङ्मुखः ।
[1]पुष्पकेतुः सन्धिनीशो रक्तवस्त्रश्च दक्षिणे ॥ ११७
विधाता शुक्लपद्माभ ऊर्ध्वेशो गजवाहनः ।
सर्पध्वजः शुक्लवस्त्रः पूज्यावेतौ कवाटयोः ॥ ११८
भुवङ्गो दक्षिणशिरा उत्तराङ्घ्रिः खलोचनः ।
प्रीतीशोऽग्निशिखाकेतुर्नीलोत्पलदलप्रभः ॥ ११९
हस्तजो मार्गशीर्षे तु वामे वृषभवाहनः ।
पतङ्गोऽधोमुखश्चोर्ध्वे शुक्लाभः पौषहस्तजः ॥ १२०
भरणीश उत्तरशिराः अश्वयानध्वजस्तथा ।
कवाटोर्ध्वशिलाश्लिष्टः पूज्यो रक्ताम्बरोऽमलः ॥ १२१
पतिरो हेमवर्णाभः हाटकाम्बरसंवृतः ।
उदङ्मुखो रक्तवस्त्रो वृषाङ्को गजवाहनः ॥ १२२
नागेशो माघमासे तु तथा हस्तर्क्षजः स्मृतः ।
वरणो हेमपद्माभः हाटकाम्बरसंवृत ॥ १२३
धरणीशः फाल्गुने तु हस्तजो रथवाहनः ।
शङ्खध्वजोऽत्र पूज्यश्च द्वारभागे तु वामतः ॥ १२४
धालाद्या हस्तजास्सर्वे क्रमादाश्वयुजादिषु ।
द्वारे द्वारे तु धात्रादीन् षडेतान् सम्यगर्चयेत् ।

मणिकादयो द्वारपालाः

मणिकं श्वेतवर्णञ्च शुक्लाम्बरधरं तथा ॥ १२५
उपवीताजिनोद्दीप्तं पिङ्गलाक्षं जटाधरम् ।
हृदयेऽञ्जलिसंयुक्तं सन्ध्यानार्थं स्रुवध्वजम् ॥ १२६

1. पुष्पकेतुश्च सन्धीशः. ख.

स्थितं द्वारं समीक्ष्यैव द्वारनिर्गमदक्षिणे ।
चैत्रे मासे च रोहिण्यां जातं द्विभुजमर्चयेत् ॥ १२७

वामे सन्ध्याञ्च हेमाभां हृदयेऽञ्जलिसंयुताम् ।
सौम्यजां श्रावणे सासि द्विभुजाञ्च सिताम्बराम् ॥ १२८

तस्य द्वितीयद्वारस्य बहिः पार्श्वे च दक्षिणे ।
शातातपञ्च दिव्येशं कुशध्वजमृषीश्वरम् ॥ १२९
चैत्रे तु रोहिणीजातं जटामौलिं चतुर्भुजम् ।
स्फटिकाभं नीलवस्त्रं रुरुवाहनमर्चयेत् ॥ १३०

तापसं वामपार्श्वे तु श्यामाभं रुरुवाहनम् ।
फाल्गुने पुष्यजं कूर्चध्वजं सन्धीशमर्चयेत् ॥ १३१

श्रीभूतः

रक्ताम्बरधरञ्चैव द्विभुजं जटिलं तथा ।
सोपानमध्ये श्रीभूतमर्चयेद्बहिराननम् ॥ १३२
[1] विराजेशं भूतकेतुं ज्येष्ठमासे श्रविष्ठजम् ।

न्यक्षादयः

न्यक्षो दूर्वाङ्कुराभश्च प्रज्ञतीशोऽरुणाम्बरः ॥ १३३
श्येनयानध्वजो दण्डपाणिर्वीररवध्वनिः ।
रोहिण्यां मार्गशीर्षे तु मासि जातो बहिर्मुखः ॥ १३४

विवस्वान् रक्तवर्णश्च तथैवोत्सादिनीपतिः ।
भिण्डिवालध्वजश्चैव दण्डी गवयवाहनः ॥ १३५
प्रोष्ठपादे मघोद्भूतो द्विभुजो नीलवस्त्रकः ।
मित्रो बहुप्रजानाथो शरभाण्डनिभस्तथा ॥ १३६

1. श्रीभूतं ब्रह्मचारिणमाह मरीचिः.

कपोतवाहनश्चैव मेघनादरवस्तथा ।
द्विभुजो रक्तवर्णश्च यूपकेतुर्हलायुधः ॥ १३७
ज्येष्ठाजो मासि वैशाखे धामपालस्तु पश्चिमे ।
एष पङ्क्तीशनामा हि [1] भित्तावभिमुखेऽर्चयेत् ॥ १३८

क्षत्ता पद्मनिभश्चैव वाणीनाथस्सिताम्बरः ।
कुशध्वजो दण्डपाणिः बलवान् मृगवाहनः ॥ १३९
श्रावणे श्रवणोद्भूतो द्विभुजः पूज्य उत्तरे ।

हविःपालः

हविःपालोऽसितो विद्युत्पतिः कालाग्निशूलधृत् ॥ १४०
रोहिण्यां मार्गशीर्षे तु जातो रक्ताम्बरस्तथा ।

पुष्पेशः

पुष्पेशः कनकाभश्च श्यामवस्त्रोऽजवाहनः ॥ १४१
पुष्पायुधो मीनकेतुः चेत्रेऽनूराधजस्तथा ।

बलिरक्षकः

बलीशो बालिकेशोऽद्रिध्वजो(?) दण्डी सितासितः ॥ १४२
मृगेन्द्रवाहनश्चैत्रे सौम्यजो रक्तवस्त्रधृत् [2] ।

इन्द्रादयो लोकपालाः

इन्द्रस्सस्यनिभः श्यामो द्विभुजः कुलिशायुधः ॥ १४३
शचीशः पीतवस्त्रश्च ज्येष्ठाजः श्रावणे तथा ।
*किरीटी मकुटी दण्डी चासीनश्चेन्निरायुधः ॥ १४४

1. ख. दिण्डिकारथवाहनः. 2. अत्र ६ अध्यायसमाप्तिः. ख. कोशे.

*ख. किरीटी मकुटी दण्डी सर्वाभरणभूषितः ।
वेणुध्वजो मेघरवो गजवाहश्शचीपतिः ॥
अकारबीजसंयुक्तः इन्द्रश्शच्याः पतिस्तथा ।
पुरुहूतस्तथा प्रोक्तः पुरुन्दरमथार्चयेत् ॥

कृत्तिकास्वनले जातो मार्गशीर्षे तु मासि वै ।
किञ्जल्कपुञ्जसदृशो लोहिताक्षोऽजवाहनः ॥ १४५

देव्यौ स्वाहा स्वधा प्रोक्तौ शक्तिरायुधमस्य वै ।

फाल्गुने भरणीजातो यमो नीलोत्पलप्रभः ॥ १४६

सत्यव्रतापतिर्दण्डी पाशी महिषवाहनः ।

आरम्भाधिप्रतिस्तैष्ये मूलजो [1]भञ्जनीपतिः ॥ १४७

शार्दूलवाहनश्चैव शूलपाणिस्त्रिलोचनः ।

चैत्रे शतभिषग्जातो वरुणो नीलवर्णकः ॥ १४८

दण्डपाशकरो रक्ताम्बरो द्विरदवाहनः ।
कनकेशस्सिंहकेतुः प्रतीच्यां प्राङ्मुखः स्थितः ॥ १४९

वायुः स्वच्छाम्बुसङ्काशश्शूलपाणिश्च खड्गधृत् ।
स्वातिजः कार्तिके मासि देवी तस्याज्ञना मता ॥ १५०

अभ्यन्तरमुखञ्चैवमिन्द्रं प्राच्यां समर्चयेत् ।
आग्नेय्यां कार्तिके मासि वह्निजातस्तनूनपात् ॥
किंशुकीपुष्पसङ्काशश्शक्तिपाणिश्च कुण्डली ।
केयूराभरणश्चैव शुकपिञ्छाम्बरस्तथा ॥
कपिध्वजो मेषवाहः स्वाहापतिरथापि वा ।
रकारबीजसंयुक्तः सर्वदेवमुखस्थता ॥
आसीनञ्च प्रणम्यैवं पूजयेच्च विशेषतः ।
याम्ये मिथुनमासे तु भरण्यां जात एव च ॥
श्यामाभो रक्तवस्त्रश्च व्यालध्वजसमन्वितः ।
महिषो वाहनञ्चैव फकारं बीजमेव च ॥
शुकाङ्कीदेवीसहितः घण्टानादरवस्तथा ।
किरीटी मकुटी दण्डी पाशहस्तस्तथैव च ॥ इति पाठो दृश्यते ।

1. रञ्जनीपतिः, ख. रजनीपतिः, क.

पीताम्बरधरो वीरः कृष्णसाररथध्वजः ।

कुबेरो दण्डपाणिस्तु सहस्रस्थवाहनः ॥ १५१

लिपाद्यवनलानाथः श्रविष्ठाजश्च कार्तिके ।
श्यामो रक्ताम्बरधर उदीच्यां दक्षिणामुखः ॥ १५२

आर्द्रायां मार्गशीर्षे तु जात ईशान उच्यते ।
पाटलीकुसुमाभस्तु वृषभध्वजवाहनः ॥ १५३
लिलोचनोऽम्बिकानाथः शूलपाणिश्च चर्मधृत् ।

सूर्यः

मार्ताण्डः पद्महस्तश्च पृष्ठे मण्डलसंयुतः ॥ १५४

चतुर्बाहुर्द्विबाहुर्वा पलाशकुसुमप्रभः ।
श्रावणे हस्तजो देव्यौ रेणुका च सुवर्चला ॥ १५५
सप्तसप्तिसमायुक्तरथो वाहनमुच्यते ।
अनूरुस्सारथिस्सर्पो ध्वजस्तुरग एव वा ॥ १५६

विष्वक्सेनः

शान्तस्सोमेशयोर्मध्ये ह्यासीनो दक्षिणामुखः ।
श्रीवत्सं ब्रह्मसूत्रं च विना सर्वं हरेरिव ॥ १५७

प्रलम्बसूत्रम्

प्रलम्बासुरसङ्ग्रामे ह्युपवीतं तु शार्ङ्गिणः ।
तदायुधपरिच्छिन्नमेकं सूत्रं प्रलम्बितम् ॥ १५८
तदभ्यर्थनया तच्च तथैव धृतमेव हि ।
[1]लम्बयज्ञोपवीतित्वं ततः प्रभृति शार्ङ्गिणः ॥ १५९
तदसाधारणं नाम लोकेऽस्मिन् प्रथितं पृथु[2] ।
तत्सूत्रं लम्बितं छेदाद्भवत्याऽधो दक्षिणस्तनात् ॥ १६०

1. ख. प्रलम्बब्रह्मसूत्रित्वं. 2. क. प्रभोः.

वामांसात्सव्यगुल्फान्तं लम्बितं तनुमध्यतः ।
तद्ब्रह्मसूत्रमित्युक्तं तदसाधारणं हरेः ॥ १६१

आकुञ्च्य दक्षिणं पादं वामं पादं प्रसार्य च ।
जयया सार्धमासीनः पुष्पहस्तोऽग्निसन्निभः ॥ १६२
गदाशक्तिकरो वाऽथ पूज्यः स्यानाभिवृद्धये ।
चतुर्भुजो यदि गदाशक्ती शङ्खं सुदर्शनम् ॥ १६३
सस्यश्यामनिभौ देव्यौ कुर्यादन्यच्च पूर्ववत् ।
पूर्वाषाढासमुद्भूतो मासि भाद्रपदे तथा ॥ १६४

ध्रुवकौतुकसंयुक्तमुत्तमं परिचक्षते ।
मध्यमं चैकबेरं स्यादधमं पीठपूजनम् ॥ १६५
ग्रामस्य यजमानस्य चानुकूलप्रमाणतः ।
विष्वक्सेनं प्रकुर्वीत मूलबेरवशात्तु वा ॥ १६६
आयादयो न द्रष्टव्या मूलबेरवशाद्यदि ।

गरुत्मान्

गरुडो वेदमूर्तिस्तु तप्तहाटकसन्निभः ॥ १६७
शुकपिञ्छाम्बरधरो झल्लरीमेखलायुतः ।
किङ्किणीजालसंयुक्तः कुण्डलाङ्गदहारभृत् ॥ १६८
[1] छन्नवीरोत्तराबद्धः कौबेरमकुटोज्ज्वलः ।
तैष्ये स्वातिदिने जातः तथा श्वसनवाहनः ॥ १६९
त्रिवृत्तस्य शिरस्साम गायत्रं चक्षुरेव च ।
आत्मा स्तोमाह्वयं साम वामदेव्यं तनुस्तथा ॥ १७०
बृहद्रथन्तरे पक्षौ यज्ञायज्ञियपुच्छकः ।
छन्दांस्यङ्गानि वै तस्य यजूंषि च शफाः स्मृताः ॥ १७१

1. ख. छन्नवीरोदराबद्धः.

एवं ध्यात्वाऽर्चयेद्वीरं वाहनानाञ्च वृद्धये ।

वक्रतुण्डः

प्रवालाभश्चतुर्बाहुरेकदंष्ट्रो गजाननः ॥ १७२
चैत्रे मासे श्रविष्ठाजः कदलीमोदकेक्षुभृत् ।

अनन्तः

दक्षिणे गोपुराद्वाह्ये वामेऽनन्तस्सितप्रभः ॥ १७३
आश्रेषाजश्च वैशाखे द्विबाहुश्च सुरापतिः ।
फणामण्डलमध्यस्थः प्राञ्जलिर्भुजगाधिपः ॥ १७४

भौमः

शक्तिपाणिस्तथा भौमः कदम्बकुसुमप्रभः ।
देवी च कुमुदा तस्य वराहो वाहनं तथा ॥ १७५
पूर्वाषाढासमुद्भूतो ज्येष्ठमासे कुजस्तथा ।

शनैश्चरः

सौरिं कृष्णनिभं कुर्यात् कुशचीराम्बरं तथा ॥ १७६
माघमासे तु रेवत्यां जातं नीलोत्पलप्रभम् ।
स्यन्दनं वाहनं तस्य [1] वराहध्वजसंयुतम् ॥ १७७

बृहस्पतिः

कुर्याद्बृहस्पतिं पीतं कदुलीवनमध्यगम् ।
कुशध्वजं हंसरथं पुष्पश्यामाम्बरोज्ज्वलम् ॥ १७८
आषाढे तिष्यसम्भूतं तारां देवीं च तस्य वै ।

बुधः

बुधं सस्यनिभं कुर्याच्छरचापासनान्वितम् ॥ १७९
[2] सिद्धादेवीसमायुक्तं वामदेवाश्ववाहनम् ।
श्रावणे च श्रविष्ठानं दर्पणध्वजमेव च ॥ १८०

1. वराहोरगसंयुतम्. 2. ख. बुद्धा.

शुक्रः

शुक्रो रजतवर्णश्च जटाभृद्वल्कलाम्बरः ।
[1]जयाधीशोऽम्बुदरथो माघमासे तु भाग्यजः ॥ १८१

जाह्नवी

जाह्नवीं श्वेतरक्ताभां पीतवस्त्रां तथैव च ।
विभज्यैकदलं हस्तेनाजिघ्रन्तीं सिताम्बुजम् ॥ १८२
अश्वयुङ्मासि रेवत्यां संजातां लोहितध्वजाम् ।
सर्वाभरणसंयुक्तां गङ्गां कुर्याद्विचक्षणः ॥ १८३

चन्द्रः

आत्रेयं हरिवत्कुर्यात्सितमण्डलमध्यगम् ।
तत्र स्वमनिभं श्वेतमिश्रमावर्तकं भवेत् ॥ १८४
राजानं द्विभुजं कुर्याद्रोहिणीवल्लभं तथा ।
चैत्रे मृगशिरोजातं साश्वस्यन्दनवाहनम् ॥ १८५

श्रीः

पद्मपीठे समासीनां मण्डले चोर्ध्वकर्णिके ।
ततप्रसूतके दिव्ये बाह्वोः धृतकुशेशयाम् ॥ १८
शातकुम्भमयैः कुम्भैर्दिग्गजैरभिषेचिताम् ।
क्रीडन्तीं विष्णुना वाऽपि श्रीदेवीं कारयेद्बुधः ॥ १८

सप्तरोहिण्यः

मयूरवाहा रोहिण्यः कृकलासध्वजप्रियाः ।
पुष्पाम्बराः पुष्पहस्ताः शुक्लकञ्चुकसंयुताः ॥ १८
रोहिणीसम्भवास्तैष्ये नित्यं लोकप्रसादकाः ।

धात्री

कुर्याद्धात्रीं महारौद्रीं दंष्ट्राभ्यामप्यलङ्कृताम् ॥ १८

1. ख. जयन्तीशः.

बालमौल्युत्तरासङ्गां सत्रिशूलाञ्च षड्भुजाम् ।
रक्तोग्रनयनापाङ्गां भ्रूभङ्गविकटेक्षणाम् ॥ १८९
[1]नरस्त्रीणामिव तनुमतिरौद्रीं समाचरेत् ।

ज्येष्ठा

कपालवामहस्ताञ्च रक्तकुञ्चितमूर्धजाम् ॥ १९०
उष्ट्रपीठे समासीनामट्टहाससमन्विताम् ।
चैत्रे याम्यर्क्षसञ्जातामुल्काध्वजसमन्विताम् ॥ १९१
त्रिपीठिकाख्यपीठे च ज्येष्ठां कुर्याद्विचक्षणः ।
[2]प्रसारासनगां स्थाने [3]न दैवे न च मानुषे ॥ १९२
वामहस्तेन सम्पूर्णं वहन्तीं निधिभाजनम् ।
दक्षिणेन तु पुष्पाणि किञ्चिल्लम्बोदरीं शुभाम् ॥ १९३
सरक्तपुष्पवस्त्रां तामतिपीनचलस्तनीम् ।
तस्याश्च दक्षिणे पुत्रं तस्या बाहुप्रमाणतः ॥ १९४
पीतं वृषभकं नाम शुक्लवर्णाऽहिताम्बरम् ।
[4]तदासने सहासीनं दण्डपाणिकमुन्नतम् ॥ १९५
वृषभाभं शिरस्तस्य पूर्वोक्तं किञ्चिदुन्नतम् ।
वामे सुमाञ्जलिं तस्यास्सुतां परमलालिताम् ॥ १९६
अर्धसाचीकृते तस्याः स्वार्धासन उपास्थिताम् ।
रक्तवासः परीताङ्गीं [5]रक्तोत्पलकराम्बुजाम् ॥ १९७
एकं पादं प्रसार्यान्य माकुञ्च्यापि निषेदुषीम् ।
पञ्चाशत्खरसंयुक्तो रथस्तस्यास्तु वाहनम् ॥ १९८

1. क. न स्त्रीणामिवतद्वक्त्रमतिरौद्रं. 2. ख. प्रसारघ्नगतां. 3. आ. न दैवे मानुषांशके. 4. आ. एकासने तथाऽऽसीनं. 5. ख. रक्तोत्पलकराम्बराम्.

कृष्णकाकध्वजा ज्येष्ठासम्भवा मार्गशीर्षके ।

भृग्वादयः सप्तर्षयः

नवार्धतालमानेन माञ्च कुर्याच्चतुर्भुजम् ॥ १९९

ब्राह्ममासनमासीनं ब्रह्माञ्जलिकरद्वयम् ।
अङ्के वाममथोत्तानं प्रसृतं तस्य चोपरि ॥ २००

हस्तञ्च दक्षिणं तस्मादुपर्युत्तानमाचरेत् ।
[1]आत्मनासाग्रगा दृष्टिर्योगदृष्टिरिति स्मृता ॥ २०१

दक्षिणे चोर्ध्वहस्ते तु कलशं धारयाम्यहम् ।
वामे च शिक्यं संशुद्धं ब्रह्मदण्डं च वैणवम् ॥ २०२

[2]जातिहिङ्गुलिकाभं वै सजटामकुटोज्ज्वलम् ।
ताम्रास्यनयनं कुर्यात्सुमुखं मृगचर्मिणम् ॥ २०३

ब्रह्मासने समासीनं मरीच्यमनलप्रभम् ।
षडङ्घ्रिवाहनं [3]मालायुधं सुमतिमञ्जलिम् ॥ २०४

तस्योत्पत्तिः तथाऽऽषाढे नक्षत्रं पूर्वफल्गुनी ।
ध्वजश्च ब्रह्मणः प्रोक्तः सर्वमन्यद् भृगोरिव ॥ २०५

पुलस्त्यः काञ्चनाभोऽयमासीनो ब्राह्ममासनम् ।
[4]प्रीतीशश्शङ्खहेतिश्च तथा षट्पदवाहनः ॥ २०६

चैत्रेऽनूराधसञ्जातः ऊर्णाख्यो ध्वजस्तथा ।

पुलहस्ताम्रवर्णोऽयमासीनश्च पुलस्त्यवत् ॥ २०७

क्षमाधीशः क्षमाधैर्यस्तुलाधारोऽस्य वाहनम् ।

हस्तजश्चाश्वयुङ्मासि सर्वमन्यद्भृगोरिव ॥ २०८

1. ख. स्वनासाग्राहिता दृष्टिरूर्ध्वदृष्टिरिति स्मृता. 2. ख. जातिहिङ्ग्वा कृतिर्भावैः मुखार्धमकुटे जटा. 3. ख. चैव हलायुधसुसंस्थितम् 4. क. सतोशः

सप्ततीशः क्रतुश्शुक्लो वैशाखे मासि हस्तजः ।
बडवा वाहनं प्रोक्तं सर्वमन्यद्भृगोरिव ॥ २०९

वसिष्ठोऽथ हरिद्राभोऽरुन्धतीशस्तथैव च ।
ऊर्णाध्वजसंयुक्तो वषट्काराख्यवाहनः ॥ २१०

तैष्ये पुष्यर्क्षसञ्जातो ब्रह्मदण्डायुधस्तथा ।

अनसूयापतिस्त्वत्रिर्मधुवर्णोऽस्य वाहनम् ॥ २११

वषट्कारश्च ऊर्णाध्वजः श्रवणसम्भवः ।
[1]कार्तिक्यां मासि सम्भूतः सर्वमन्यद्भृगोरिव ॥ २१२

द्विबाहवो मरीच्याद्या अङ्के वामकरं तथा ।
तदूर्ध्वे दक्षिणं पाणिमुत्तानं परिकल्पयेत् ॥ २१३

मरीचिः पुलहश्चैव पुलस्त्यः क्रतुरेव च ।
वसिष्ठोऽत्रिरहं चैवमृषयः सप्त कीर्तिताः ॥ २१४

सम्भूतिश्च क्षमा प्रीतिः सन्नत्यूर्जाऽनसूयकाः ।
ख्यातिश्चेति क्रमादेताः कर्तव्यास्तैस्सहासने ॥ २१५

गविष्ठः (आकाशः)

गविष्ठो ही महाभूतश्चेन्दीवरदलप्रभः ।
मकुटी पीतवासाश्च सर्वाभरणसंयुतः ॥ २१६

स सत्यलोचनः श्रीमान् गविष्ठः कुम्भवाहनः ।
भेरुण्डकेतुस्संप्रोक्तो मारुद्वरसं तथा (?) ॥ २१७

चैत्रे चित्रर्क्षसम्भूतो योषा स्यात्सत्यलोचना ।

वायुः

वायुश्श्यामोऽसिपाणिस्तु शुकाख्याहिवाहनः ॥ २१८

1. ख. श्रावस्यां.

शङ्खध्वजो हंसरवो [1]माघे स्वातीदिनोद्भवः ।
उदायिनीश्वरश्चैव पीतवस्त्र इति स्मृतः ॥ २१९

अग्निः

अग्निस्सुवर्णवर्णोऽयमर्चिष्केशश्च शक्तिभृत् ।
वडवावाहनश्चैव स्वाहेशो वानरध्वजः ॥ २२०
प्रोष्ठपादेऽग्निभोद्भूतो नीलवस्त्रस्तथैव च ।
एषां त्रयाणां [2]देव्यश्च पृथक्स्थाने समाचरेत् ॥ २२१

तोयम्

तोयं चाञ्जनवर्णश्च तथा वृषभवाहनम् ।
हरिपिङ्गरवासः स्याद् भूतमेतच्चतुर्गणम् ॥ २२२
तोयं नपुंसकञ्चेति मुनिश्शातातपोऽब्रवीत् ।
गलकाख्यं ध्वजश्चैव तथोदभ्रवध्वनिः ॥ २२३
ऊर्म्यायुतं तथाऽऽषाढे सौम्यनक्षत्रसम्भवम् ।

भूमिः

हरिणीं श्यामवर्णां तां श्वेतवस्त्रां किरिटिनीम् ॥ २२४
पद्महस्तां क्षमां देवीं पद्मनेत्रां सुभूषिताम् ।
वैशाखे रेवतीजातां महाचातकवाहिनीम् ॥ २२५

सावित्री

सावित्रीं ध्वजिनीञ्चापि श्वेतवस्त्रां सुसंस्थिताम् ।
विद्यां चतुर्भुजां कुर्याद्रक्तामृतकुशेशयाम् ॥ २२६
दक्षिणे त्वक्षमालां च करे वामे कमण्डलुम् ।
ज्ञानमुद्रां दक्षिणेऽथ करे वामेऽथ पुस्तकम् ॥ २२७
तैष्ये पुनर्वसूद्भूतां तदा पूज्याधिकेन सा ।

सर्वेश्वरः

सर्वेश्वरोऽम्बुवाहाभष्षडङ्घ्रिध्वजवाहनः ॥ २२८

1. ख. मेषे. 2. ख. देवानां पूर्वस्थाने समाचरेत्.

[1] श्वेतवस्त्रधरो दण्डी कुम्भशब्दरवस्तथा ।
[2] तैष्ये पुष्यभवः श्वेतवस्त्रश्चैवोष्ट्रवाहनः ॥ २२९

सप्तमातरः

ब्रह्माणीं पिङ्गलाञ्चैव चतुर्वक्त्रां चतुर्भुजाम् ।
कलशीमक्षमालाञ्च दधतीं जटया युताम् ॥ २३०
दर्भध्वजां हंसरथां चैत्रे याम्यदिनोद्भवाम् ।

सरिप्रिया श्यामवर्णा शूलहस्ता चतुर्भुजा ॥ २३१
तस्या हंसो ध्वजः प्रोक्तः सौरभेयी च वाहनम् ।
वैशाखे रेवतीजाता रक्तवस्त्रा त्रिलोचना ॥ २३२
मौलौ वेणीसमायुक्ता भीमरूपा भयानका ।

वैशाखिनी स्वर्णनिभा शक्तिहस्ता चतुर्भुजा ॥ २३३
कृकलासध्वजा रक्तवसना [3]च गुहाधिपा ।
ज्येष्ठमासे तथा देवी कृत्तिकर्क्षसमुद्भवा ॥ २३४

शङ्खचक्रधरा श्यामा वैष्णवी [4]नीलवासिनी ।
फाल्गुने श्रवणोद्भूता गरुडध्वजवाहना ॥ २३५

वाराही कृष्णवर्णा च वराहवदना तथा ।
शङ्खचक्रधरा चैव वराहध्वजवाहना ॥ २३६
पौषे श्रवणसम्भूता [5]रक्तवस्त्रा चतुर्भुजा ।
इन्द्राणी यवसस्याभा वज्रहस्ता चतुर्भुजा ॥ २३७

1. क. दण्डी विद्युन्निभेशश्च ढक्काशब्दरवस्तथा. 2. ख. तैष्ये पुष्ये भवस्तत्र पश्चिमामुखमर्चयेत्. 3. ख. गुहराडिव. 4. ख. कठिनस्तनी. 5. ख. श्वेतवस्त्रा.

श्वेतवस्त्रसमायुक्ता शुक्लतुण्डास्त्यवाहना ।
[1]वेणुपत्रध्वजा माघे ज्येष्ठानक्षत्रसम्भवा ॥ २३८

काली [2]करालवदना कालाङ्गी चोष्ट्रवाहना ।
पिशाचाङ्कध्वजा चैव वह्निज्वालाभमूर्धजा ॥ २३९
[3]प्रोष्ठपादे यमोद्भूता शूलपाशकपालिनी ।
रक्तोग्रनयनापाङ्गा भ्रूभङ्गविकृतानना ॥ २४०

नरस्त्रीणामिव मुखं दंष्ट्राभ्यां समलङ्कृतम् ।
त्रिनेत्र्योऽर्धेन्दुमकुटा नागाभरणसंयुताः ॥ २४१
प्रसारासनमासीना सप्तमातर ईरिताः ।

प्रसारासनलक्षणम्

दक्षिणं पादमाकुञ्च्य वामं पादं प्रसार्य च ॥ २४२
प्रसारासनमित्युक्तं स्त्रीणां सामान्यमेव तत् ।

स्कन्दः

स्कन्दः पलाशपुष्पाभः षट्भुजो वा चतुर्भुजः ॥ २४३
बालमौलिसमायुक्तः देवयानीपतिस्तथा ।
मयूरवाहनश्शक्तिधरः कुक्कुटकेतुकः ॥ २४४
फाल्गुने कृत्तिकोद्भूतो हस्ती वा तस्य वाहनम् ।

हस्ती

नवहस्तमितं कुर्यादुत्सेधं सप्तहस्तकम् ॥ २४५
आयामार्धं ततः पादं शेषं नाहमुदाहृतम् ।
प्रादेशिकं ततो विद्या[4]च्छिरसोरुत्कतस्तयोः ॥ २४६

1. ख. शुक्लतुण्डध्वजोपेता मेषे ज्येष्ठानुसम्भवा. 2. ख. करालदंष्ट्रा च. 3. ख, तथा ज्येष्ठे यमोद्भूता. 4. ख. उरसे सप्तकन्तथा (?)

नाहेनार्धपरीणाहं पादहीनं तु गात्रयोः (?) ।
गात्रस्यार्धपरीणाहं पादहीनं करोर्ध्वगम् ॥ २४७
[1]तस्मात्त्रिभागादेव स्यात्करात्रे नाह उच्यते ।
भूमिलम्बं तथा कुर्यात्करस्याग्रमनुच्छ्रितम् ॥ २४८
मानं नखानां तस्यैव चतुरङ्गुलमिष्यते ।
गात्रान्तरेषु तेषां वै सर्वं बोद्धव्यमित्यतः ॥ २४९
ऐरावतं विनाऽन्येषां नीलवर्ण उदाहृतः ।
कण्ठेषु द्वादशायामं करिणां परिरुच्यते (?) ॥ २५०
सतालनवहस्तः स्यादुत्सेधः करिणां पतेः ।
प्रबालाभश्च गण्डश्च गात्रं श्वेतमुदाहृतम् ॥ २५१
[2]यथाऽत्मनस्तथेभस्य मानञ्चैव भयङ्करम् ।
इभानामेव सर्वेषां मानमेवमुदाहृतम् ॥ २५२
परिणाहे तथा तेषामूर्ध्वं युक्त्या समाचरेत् ।
तथा च नीलहस्ती स्यादिन्द्रनीलप्रभश्शुभः ॥ २५३
(वाराहस्य महाविष्णोर्वाहनं परिकीर्त्यते ।
पञ्चहस्तायतं पृष्ठे सकोलं चार्धदेहकम् ॥ २५४
तस्यार्धमूर्ध्वे कर्णः स्यान्नाहं तस्य षडङ्गुलम् ।
अग्रे भागपरीणाहः शिखा स्यदङ्गुलास्तु षट् ॥ २५५
[3]गोलकं विस्तृतं तस्य [4]तुण्डं स्यात् चतुरङ्गुलम् ।
भुजमालं तु पादं स्या[5]द्भुजमाले तले उभे ॥ २५६
पञ्चाक्षरास्समाख्याताः सुन्दराः पञ्चवर्णकाः ।
[5]मयूरा एव दृश्यन्ते [6]दृश्यन्ते मेचकास्तथा ॥ २५७

1. क. तस्य त्रिभाग एव स्यात्. 2. क. यथा मानं तथाहि स्यात्. 3. ख. पट्कोलं. 4. ख. मण्डना. 5. ख. भुजमात्रमुभे तले. 6. ख. मयूरा ये प्रदृश्यन्ते ते वै प्राकृतमानवाः म. तथा प्रकृतिमानकम्.

कपित्थदलप्रशंसा

बिल्वपत्रसमं रात्रौ कपित्थदलमुच्यते ।
यानि पुष्पाणि चोक्तानि तत्पत्रैश्चापि पूजयेत् ॥ ५७
अर्चको वारि दीपञ्च धूपं पुष्पं चतुष्टयम् ।
सामान्यतः प्रगृह्णीयात् सम्पूर्णं पूजनं भवेत् । ५८

पञ्चाङ्गमर्चनम्

ध्रुववेरार्चनं पूर्वं द्वितीयं शान्तपूजनम् ।
कौतुकाभ्यर्चनं पश्चाद् भूतपीठार्चनं परम् ॥ ५९
पञ्चमं बलिपूजा स्यादेतैः पञ्चभिरर्चनैः ।
सम्पूर्णमर्चनं युक्तमयुक्तं विकलार्चनम् ॥ ६०
(पञ्च तुल्यफलान्याहुरर्चनानि तपोधनाः ।)
ध्रुववेरार्चनात्सिद्धेत् सायुज्यं पदमक्षयम् ॥ ६१
सर्वलोकाधिपत्यं वै सारूप्यं शान्तपूजया ।
ऐहिकामुष्मिकं सर्वं भुक्त्वा सायुज्यमाप्नुयात् ॥ ६२
कौतुकाभ्यर्चनाद्वापि भूतपीठार्चनात्ततः ।
सर्वशत्रुजयं दीर्घमायुरारोग्यमेव च ॥ ६३
[1] श्रियं पुत्रसमृद्धिञ्च सालोक्यं पदमाप्नुयात् ।
सर्वलोकेऽपि विख्यातिं सामीप्यं बलिपूजया ॥ ६४
तत्तत्प्रतिष्ठाकर्तॄणां तत्तत्फलमुदाहृतम् ।
बेरे चैव विमाने च भूतपीठे तथैव च ॥ ६५
सदा सन्निहितो विष्णुः छाययोर्ध्वबेरयोः ।
प्रदक्षिणविधावेतल्लङ्घनन्तु न दोषकृत् ॥ ६६

1. पुत्रमित्र आ.

युग्मप्रदक्षिणं कुर्यादयुग्मं त्वाभिचारिकम् ।
नैव प्रदक्षिणं कुर्यादन्तरे देवशान्तयोः ॥ ६७
देवपीठान्तरे चैव न कुर्यादिति केचन ।
एष एव विशेषस्यादन्यत्सर्वं खिलोक्तवत् ॥ ६८

इत्यार्षे श्रीवैखानसे भगवच्छास्त्रे भृगुप्रोक्तायां संहितायां
क्रियाधिकारे उपचारभेदपुष्पनिर्णयविधानं नाम
दशमोऽध्यायः[1] ।

एकादशोऽध्यायः ।

दशावतारकल्पः

वक्ष्ये दशावताराणां प्रतिष्ठां मुनिसत्तमाः ।
मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ॥ १
रामो रामश्च रामश्च कृष्णः कल्कीति ते दश ।
आविर्भावाः पञ्च पूर्वे प्रादुर्भावास्तथाऽपरे ॥ २
मत्स्यकूर्मौ द्विधा प्रोक्तौ वाराहस्त्रिविधः स्मृतः ।
पञ्चधा नारसिंहस्तु द्विविधो वामनः स्मृतः ॥ ३
एकधा भार्गवो रामो राघवो द्विविधः स्मृतः ।
द्विविधो बलभद्रश्च कृष्णोऽसङ्ख्यातविग्रहः ॥ ४
एकधा कल्किरूपश्च तेषां शृणुत लक्षणम् ।

मत्स्यः

महाजलौघप्रलये चराचरजगत्क्षये ॥ ५

1. १३ अध्यायः ख. ११. अध्यायः ई.

तत्तोयमुपसंहर्तुमासीत्प्रथममत्स्यकः ।
तद्रोमकूपविवरे प्रमितः प्रलयार्णवः ॥ ६
कल्पावसानप्रलयलीनवेदोपदेशकः ।
मत्स्य आसीद्द्वितीयश्च देवदेवो जनार्दनः ॥ ७
तप्तहाटकसङ्काशः प्रथमोऽन्योऽञ्जनप्रभः ।
रक्तपद्मासनारूढौ वितस्तिविसृतौ (?) तथा ॥ ८
विस्तारद्विगुणायामौ कुर्यान्मत्स्यौ यथाविधि ।
पौण्डरीकः प्रधानाग्निरन्यत्सर्वं खिलोक्तवत् ॥ ९

कूर्मः

स्वस्थानचलितक्षोणीभरणायादिकच्छपः ।
द्वितीयश्चामृतोद्धारमन्थमन्दरधारकः ॥ १०
अञ्जनाभं तयो रूपं चतुरश्रासनस्थितिः ।
गार्हपत्यः प्रधानाग्निरन्यत्सर्वं खिलोक्तवत् ॥ ११

वाराहः

पातालमग्नां वसुधामुद्धर्तुं प्रथमस्तथा ।
आसीदादिवराहाख्यस्तस्य वक्ष्यामि लक्षणम् ॥ १२
नररूपो वराहश्च सस्यश्यामश्चतुर्भुजः ।
दक्षिणस्सुस्थितः पादः पीठे वामस्तु कुञ्चितः ॥ १३
पञ्चतालप्रमाणेन तदूरौ श्यामलां महीम् ।
प्राञ्जलीकृतहस्तां तां प्रसारितपदद्वयाम् ॥ १४
पुष्पाम्बरां वीक्षमाणां व्रीडाहर्षसमन्विताम् ।
देवं दक्षिणहस्तेन देव्याः पादौ प्रगृह्य च ॥ १५
वाममाधारवत्कृत्वा देव्या बाह्वोरथोपरि ।
पातालमग्नां वसुधां जिघ्रन्तं मूर्ध्नि सुस्थितम् ॥ १६

पराभ्याञ्च कराभ्याञ्च शङ्खचक्रधरं परम् ।
कुर्याद्देवं तथा देवीं सर्वाभरणभूषिताम् ॥ १७
श्वेतपद्मसिताभौ तु पुष्यतीर्थौ तदर्चकौ ।
[1]ब्रह्मराजश्रियौ श्वेतरक्ताभे द्वारपालिके ॥ १८
श्वेताभाश्च चतुर्वेदाः वाहनस्थानमाश्रिताः ।
पुलिन्दं शैषिकं श्यामं शेषं पूर्ववदाचरेत् ॥ १९
प्रलयेऽवान्तरोद्भूते तञ्च संहर्तुमुद्यतः ।
वाराहः प्रलयाख्योऽभूत्[2] पूर्ववच्च किटेर्मुखम् ॥ २०
तप्तहाटकसङ्काशं नीलाम्बरधरं परम् ।
अभयं दक्षिणं हस्तं वामं कट्यवलम्बितम् ॥ २१
शङ्खचक्रधरावूर्ध्वमन्यत्सर्वं च पूर्ववत् ।
देवस्य दक्षिणे पार्श्वे महीं देवीं प्रकल्पयेत् ॥ २२
देवदेव्यौ सुखासीनौ तस्य सिंहासनादधः ।
नारदं रक्तवर्णञ्च वीणाहस्तं प्रकल्पयेत् ॥ २३
पूजकौ[3] भृगुपुण्यौ तावन्यत्सर्वञ्च पूर्ववत् ।
हिरण्याक्षासुरं हत्वा सर्वयज्ञविनाशकम् ॥ २४
[4]यज्ञस्य स्थापनं कर्तुमासीद्यज्ञवराहकः ।
श्वेतो वर्णोऽखिलञ्चान्यत्प्रलयाख्यवराहवत् ॥ २५
सिंहासने सुखासीनः श्रीभूमिसहितः परः ।
उक्तौ कनकयज्ञाख्यौ पूजकौ रुक्मसन्निभौ ॥ २६

1. ब्रह्मा च श्वेतरक्ताभः कनकाभश्च मौलिकः । इति आ. पाठः 2. पूर्ववच्चाहवोन्मुखं आ. देवस्य दक्षिणे भागे महीं देवीं प्रकल्पयेत् इत्यधिकं ई. 3. पृथु आ. 4. यज्ञार्थस्थापनं आ.

तेषां सम्यः प्रधानाग्निरन्यत्सर्वं खिले.क्तवत् ।
'क्ष्मामेका' मिति मन्त्रेण शतमष्टोत्तरं यजेत् ॥ २७

नारसिंहभेदाः

गिरिजः स्थूणजश्चैव सुदर्शननृसिंहकः ।
तथा लक्ष्मीनृसिंहश्च पातालनरसिंहकः ॥ २८

इति पञ्चविधः प्रोक्तो नारसिंहो मनीषिभिः ।
गिरिजस्थूणजौ प्रोक्तौ खिले विस्तरतो मया ॥ २९

सुदर्शननृसिंहः

सुदर्शननृसिंहस्य लक्षणं सम्प्रवक्ष्यते ।
कोटिसूर्यप्रतीकाशं चक्रं विमलमुज्ज्वलम् ॥ ३०

बृहद्भानुपुरद्वन्द्वं[1] चक्रमध्ये प्रकल्पयेत् ।
तस्य मध्ये [2]सुखासीनं नृसिंहमरुणप्रभम् ॥ ३१

अत्यन्तभीषणाकारं भक्तानामभयप्रदम् ।
चक्रायुधं चतुर्बाहुं देवदेवं प्रकल्पयेत् ॥ ३२

तस्य सिंहासनाधस्ताद्दक्षिणेतरपार्श्वयोः ।
[3]वदन्तौ कोपशान्त्यर्थं ब्रह्मरुद्रौ प्रकल्पयेत् ॥ ३३

'यो वा नृसिंह' इत्युक्त्वा चक्रमन्त्रद्वयेन च ।
अष्टोत्तरशतं होममन्यत्सर्वं नृसिंहवत् ॥ ३४

लक्ष्मीनृसिंहः

वक्ष्ये लक्ष्मीनृसिंहस्य लक्षणं मुनिसत्तमाः ।
सिंहासने सुखासीनं वामपादं प्रसार्य च ॥ ३५

आसने निहितं पादं दक्षिणं कुञ्चितं चरेत् ।
देवस्योरौ प्रकुर्वीत लक्ष्मीं सर्वाङ्गसुन्दरीम् ॥ ३६

1. द्वारं आ. 2. समासीनं आ. 3. वन्दनौ आ.

सर्वाभरणसंयुक्तां व्रीलाहर्षसमन्विताम् ।
प्राञ्जलीकृतहस्तान्तां पद्मकिञ्जल्कसन्निभाम् ॥ ३७

प्रसारितपदां देवीं पञ्चतालप्रमाणतः ।
वरदाभयहस्तां वा उद्यत्पद्मधरान्तु वा ॥ ३८

दक्षिणेनैव हस्तेन कुर्वन्तमुपगूहनम् ।
वामेनोरौ निवेश्यैव शङ्खचक्रधरं परम् ॥ ३९

भुक्तिमुक्तिफलापेक्षी कुर्यादेवं यथाविधि ।
केवलामुष्मिकापेक्षी लक्ष्मीं वामे प्रकल्पयेत् ॥ ४०

वामभागे तु कुर्याच्चेद्वामोरौ तां निवेशयेत् ।
(प्रसार्य दक्षिणं सव्यमाकुञ्च्य च तथेतरम् ॥) ४१

वामेन तां परिष्वज्य दक्षिणेनाभयप्रदम् ।
पराभ्याञ्च कराभ्याञ्च शङ्खचक्रधरं तथा ॥ ४२

एवं सम्परिकल्प्यैनं ब्रह्मेशावपि पूजयेत् ।
औपासनाग्निकुण्डञ्च कुर्याद्देव्याः पृथक् श्रियः ॥ ४३

एककुण्डेऽथ वा होमं कुर्यादिति च केचन ।
लक्ष्म्याः श्रीसूक्तसंयुक्तं 'श्रिये जात' इति ब्रुवन् ॥ ४४

'श्रं सा नियच्छती' त्युक्त्वा शतमष्टोत्तरं यजेत् ।
'श्रियं धृतिं पवित्रीञ्च लक्ष्मी' मिति च मूर्तिभिः ॥ ४५

पृथक्कुण्डं यदि भवेत्पुरुषसूक्तसमन्वितम् ।
पूर्ववन्नारसिंहस्य सर्वं कुर्याद्यथाविधि ॥ ४६

नृसिंहस्थापने विशेषः

(ध्रुवार्चास्थापनं चेद्वै भोगं चेद्दैविके पदे ।)
सुदर्शननृसिंहञ्च स्थूणजञ्च विनेतरान् ॥ ४७

सर्वत्र कल्पयेत्पुष्टयै ग्रामादिषु च वास्तुषु ।
ग्राममध्ये यदि भवेत् [1]तद्दृष्ट्या सर्वनाशनम् ॥ ४८

तस्मात्सर्वप्रयत्नेन चतुर्द्वाराणि कारयेत् ।
सुदर्शननृसिंहञ्च स्थूणजञ्च यथाविधि ॥ ४९

[2]स्थापयेद्ग्रामबाह्येषु ग्रामाभिमुखमेव वा ।
(पर्वताग्रे नदीतीरे वने वा वृक्षसङ्कुले ॥ ५०

आरामेषु सरित्तीरे जर्झरे स्थापयेद्बुधः ।
सुदर्शननृसिंहस्य अत्रिणोक्तं समाचरेत् ॥) ५१

पातालनरसिंहञ्च प्रवक्ष्यामि समासतः ।
वामजानु समुद्धृत्य दक्षिणेनैव जानुना ॥ ५२

आसीनं गरुडं कुर्याच्चतुर्भुजसमन्वितम् ।
उभाभ्यामपि पाणिभ्यां हृदयेऽञ्जलिसंयुतम् ॥ ५३

कराभ्यामितराभ्याञ्च दधानं शेषविग्रहम् ।
भोगिभोगवलियं स्कन्धे कुर्याद्गरुत्मतः ॥ ५४

उत्तमाङ्गं समुद्धृत्य फणामण्डलमण्डितम् ।
कल्पयेत्तत्फणाधस्तान्नारसिंहं यथाविधि ॥ ५५

कुञ्चितं वामपादन्तु शेषभोगे निधाय च ।
आसीनं दक्षिणं पादं वीशस्कन्धे प्रसार्य च ॥ ५६

अष्टबाहुसमायुक्तमभयं दक्षिणं करम् ।
शेषैश्चक्रं शरं खड्गं दधतं बाहुभिस्त्रिभिः ॥ ५७

वामे शङ्खञ्च शार्ङ्गञ्च खेटकञ्च गदामपि ।
शेषं पूर्ववदुद्दिष्टं प्रतिष्ठां कारयेद्बुधः ॥ ५८

1. ग्रामाधिक्यं निरीक्षणम् आ. 2. कल्पयेत् आ.

गारुडं शेषदेवत्यं जुहुयादेकविंशतिः ।
'यो वा नृसिंह' इत्युक्त्वा शतमष्टोत्तरं यजेत् ॥ ५९

(एवं लक्ष्मीनृसिंहञ्च कुर्यादित्येव केचन ।)
नारसिंहप्रतिष्ठायामग्नावाहवनीयकं ॥ ६०

हौलं प्रशंस्य तन्मूर्त्या निरुप्याज्याहुतीर्यजेत् ।
अन्यत्सर्वं खिले प्रोक्तं तत्र ज्ञात्वा समाचरेत् ॥ ६१

नारसिंहविकल्पाश्च बहुधा परिकीर्तिताः ।
तेषां तालविभागश्च मन्त्रा मूर्तय एव च ॥ ६२

कुण्डानि परिवाराणां गिरिजस्योक्तवत्करेत् ।

वामनः

वैरोचने बलवति बलिनोऽसुरपुङ्गवात् ॥ ६३

छलादाहर्तुमवनीमदित्यां कश्यपादभूत् ।
वामनस्य प्रवक्ष्यामि प्रतिष्ठामर्चनादिकम् ॥ ६४

त्रिविक्रमः स एवासीत्त्रिलोकक्रमणोद्यतः ।
त्रिविक्रमस्त्रिधा प्रोक्तः प्रथमश्च द्वितीयकः ॥ ६५

तृतीयश्चेति तद्रूपं यथेष्टं कारयेद्बुधः ।
अष्टबाहुं चतुर्बाहुं दशतालक्रमेण वै ॥ ६६

गदाचक्रासिशक्तीश्च पद्मशङ्खधनुःशरान् ।
दधतं श्यामदेहञ्च महारूपधरं हरिम् ॥ ६७

स्थितं दक्षिणपादेन वामपादं प्रसार्य च ।
हर्षवेगसमायुक्तं सर्वाभरणभूषितम् ॥ ६८

अष्टबाहुं प्रकुर्वीत प्रवक्ष्यामि चतुर्भुजम् ।
पराभ्याञ्च कराभ्याञ्च शङ्खचक्रधरं परम् ॥ ६९

दक्षिणं हस्तमादाय पादमन्यत्प्रसारितम् ।
वाममूर्ध्वे प्रसार्याङ्घ्रिं दक्षिणेनैव सुस्थितम् ॥ ७०

तत्प्रसारितपादोर्ध्वे हस्तं सम्यक्प्रसारितम् ।
इन्द्रं छत्रधरं कुर्यादाकाशस्थं यथाविधि ॥ ७१

पार्श्वयोर्जवनं सम्यग्वरुणं व्याजनौ तथा ।
वामदक्षिणयोश्चन्द्रसूर्यावूर्ध्वे प्रकल्पयेत् ॥ ७२

जानुमात्रोद्धृते पादे प्रथमस्तु विधीयते ।
नाभिमाने द्वितीयः स्यात्तृतीयस्स्याल्ललाटके ॥ ७३

ब्रह्माणं कल्पयेदूर्ध्वे तत्पादक्षालनोद्यतम् ।
ततो गङ्गां प्रकुर्वीत ब्रह्मलोकात्परिप्लुताम् ॥ ७४

प्राञ्जलीकृतहस्तान्तां नाभेरूर्ध्वे शरीरिणीम् ।
तस्य पादोर्ध्वतः कुर्याच्छ्रमन्तं नमुचिं तथा ॥ ७५

शुक्रं विघ्नकरं कुर्यात्स्थितपादस्य वामतः ।
मुष्टिना प्रहरन्तं तदूर्ध्वे वीरं प्रकल्पयेत् ॥ ७६

जाम्बवन्तं चरेत्पार्श्वे भेरीताडनतत्परम् ।
तद्दक्षिणे स्थितं कुर्यात् वटुरूपञ्च वामनम् ॥ ७७

छत्रदण्डधरं पुण्यं शिखाकौपीनसंयुतम् ।
तत्पार्श्वे बलिनं कुर्याद्गृहीतकरकं[1] तथा ॥ ७८

सर्वाभरणसंयुक्तं हर्षयुक्तं प्रकल्पयेत् ।
नीलाभं जाम्बवन्तञ्च कल्पयेद्वानराकृतिम् ॥ ७९

इन्द्रं श्यामनिभं कुर्याद्वायुमञ्जनसन्निभम् ।
वरुणं श्यामवर्णञ्च भास्करञ्चाग्निसन्निभम् ॥ ८०

1. कलशं क.

श्वेतं निशाकरं कुर्याद्ब्रह्माणं हाटकप्रभम् ।
गङ्गां श्वेतप्रभाङ्कुर्यान्नमुचिं श्याममेव च ॥ ८१

शुक्रं श्वेतनिभं कुर्यात्कार्यविघ्नत्वरान्वितम् ।
मुष्टिप्रहरणं कुर्याद्वरुडं पञ्चवर्णकम् ॥ ८२

वामनञ्च तथा श्यामं बलिनं कनकप्रभम् ।
एवं त्रिभेदतो रूपं स्वेच्छया कारयेद्बुधः ॥ ८३

अन्वाहार्ये प्रधानाग्नौ हौत्रशंसनमाचरेत् ।
'यो वा त्रिमूर्तिं' रित्येकं शतमष्टाधिकं यजेत् ॥ ८४

[1]स्थापनादीनि सर्वाणि विष्णुसूक्तेन कारयेत् ।
वामनो न पृथक् स्थाप्यस्सर्वमन्यत्त्रिलोक्तवत् ॥ ८५

परशुरामः

महाबलक्षत्रवधाद् भूभारस्य निरासकः ।
जमदग्निसुतो रामो बभूवात्यन्तदारुणः ॥ ८६

कल्पयेद्द्विभुजं रामं दशतालप्रमाणतः ।
दक्षिणे परशुं हस्ते वाममुद्देशकं तथा ॥ ८७

रक्तवर्णं प्रकुर्वीत जटामकुटमण्डितम् ।
नीलाम्बरधरं देवमासीनं स्थितमेव वा ॥ ८८

तद्रूपं कौतुकं कुर्याद्दर्पांस्तत्परितो लिखेत् ।
अन्वाहार्ये प्रधानाग्नौ हौत्रशंसनमाचरेत् ॥ ८९

'विष्णुर्वरिष्ठ' इत्युक्त्वा सप्तत्येकोत्तरं यजेत् ।
शिष्टानि सर्वकार्याणि पूर्ववत्सम्यगाचरेत् ॥ ९०

1. स्नापनादीनि क.

दाशरथिरामः

देवहिंसाकरान् हन्तुं रावणाद्यांश्च राक्षसान् ।
आसीद्दाशरथी रामः सायुधश्च निरायुधः ॥ ९१
सार्धाष्टतालमानेन राघवं सम्प्रकल्पयेत् ।
श्यामलं द्विभुजं कुर्यात्त्रिभङ्गेन च सुस्थितम् ॥ ९२
शरं दक्षिणहस्तेन चापं वामेन बिभ्रतम् ।
सर्वाभरणसंयुक्तं किरीटमकुटोज्ज्वलम् ॥ ९३
सीताञ्च दक्षिणे पार्श्वे पीतवर्णां प्रकल्पयेत् ।
सपद्मवामहस्ताञ्च सम्प्रसारितदक्षिणाम् ॥ ९४
दक्षिणं सुस्थितं पादं वामं किञ्चिच्च कुञ्चितम् ।
पादं हस्तं प्रकुर्वीत विपरीतमथापि वा ॥ ९५
वामतो लक्ष्मणं कुर्यादष्टतालेन रूक्ष्मभम् ।
[1]बालकुन्तलसंयुक्तमन्यत्सर्वञ्च रामवत् ॥ ९६
वार्ताविज्ञापनपरं हनूमन्तञ्च दक्षिणे ।
रुक्माभं दक्षिणेनैव पाणिना पिहिताननम् ॥ ९७
प्रह्वाञ्जलिमूर्ध्ववदनं वामेनापि धृताम्बरम् ।
एवं सायुध उद्दिष्टो वक्ष्याम्यन्यं निरायुधम् ॥ ९८
सिंहासने समासीनं देवं देवीं यथाविधि ।
वामतो लक्ष्मणं कुर्यात्प्राञ्जलीकृत्य सुस्थितम् ॥ ९९
कारयेत्कौतुकं तद्वदासीनं स्थितमेव वा ।
सायुधे सायुधं तद्वत्कौतुकञ्च समाचरेत् ॥ १००

1. बालकुन्दलसंयुतं आ.

एकस्मिन्नेव कुम्भे तु लयाणां ध्यानमाचरेत् ।
तस्य देवस्य देव्याश्च शयनक्रम उच्यते ॥ १०१
तद्वेद्यां लक्ष्मणस्यापि शयनं तु पृथग्भवेत् ।
अन्वाहार्ये प्रधानाग्नौ हौत्रशंसनमाचरेत् ॥ १०२
'रायामीश' इति जपन् सप्तत्येकोत्तरं यजेत् ।
श्रीवत्सवक्षञ्च सीताया युक्त्या बुद्ध्या समाचरेत् ॥ १०३

बलभद्ररामः

वक्ष्यामि बलभद्राख्यरामं यदुकुलोद्भवम् ।
दानवेन्द्रवधात्सोऽपि भूमिभारापनोदकः ॥ १०४
हस्तिपृष्ठविमाने वा सोमच्छन्देऽथवा पुनः ।
एकासनं सहासीनं कृष्णेन पृथगेव वा ॥ १०५
शङ्खेन्दुकुन्दधवलं द्विभुजं नीलवाससम् ।
मुसलं दक्षिणे हस्ते हलं वामे च कल्पयेत् ॥ १०६
इत्येवं सायुधः प्रोक्तः प्रवक्ष्यामि निरायुधम् ।
वामपादं समाकुञ्च्य दक्षिणं सम्प्रसार्य च ॥ १०७
सव्यञ्चाभयहस्तन्तु वामहस्तौ निवेशितम् ।
रेवतीं दक्षिणे पार्श्वे नीलोत्पलदलप्रभाम् ॥ १०८
पद्मं दक्षिणहस्तेन गृहीत्वाऽन्यं तथा करम् ।
ऊरौ निवेश्य चासीनां रेवतीञ्च प्रकल्पयेत् ॥ १०९
सर्वाभरणसंयुक्तं देवं देवीसमन्वितम् ।
एवञ्च कौतुकं कुर्यात्स्थापनारम्भमाचरेत् ॥ ११०
अग्नावाहवनीये तु हौत्रशंसनमाचरेत् ।
'क्ष्मामेका' मिति मन्त्रेण शतमष्टोत्तरं यजेत् ॥ १११

अन्यत्सर्वं विशेषेण विष्णोरिव समाचरेत् ।

कृष्णः

कूटे वा गोपुराकारे कुम्भाकारेऽथवाऽऽलये ॥ ११२

नवतालप्रमाणेन कृष्णं कृत्वा समर्चयेत् ।
श्यामलं त्रिणतं रक्तवाससं द्विभुजं तथा ॥ ११३

पाणिना दक्षिणेनैव क्रीडायष्टिधरं परम् ।
वामेनोत्क्रीडनकरं लीलयैव च सुस्थितम् ॥ ११४

सर्वाभरणसंयुक्तं सुन्दरं सौम्यलोचनम् ।
रुक्मिणीं सत्यभामाञ्च देव्यौ दक्षिणवामयोः ॥ ११५

श्यामरक्तनिभे कृष्णपीतवस्त्रविभूषिते ।
बाहुसीमान्तमानेन कारयेद्भूषणोज्ज्वले ॥ ११६

गरुडम्

कल्पयेत्प्राञ्जलिं वीरं वामपार्श्वे तु तत्र वै ।
ध्रुवबेरानुरूपं वै कौतुकञ्च समाचरेत् ॥ ११७

सिंहासने [1]समासीनं देवीभ्यां तु निरायुधम् ।
पूर्वोक्तेन विधानेन सर्वाभरणसंयुतम् ॥ ११८

नवनीतनटं वाऽथ तथा कालीयमर्दनम् ।
गोपालविग्रहं वाऽथ पार्थसारथिमेव वा ॥ ११९

रूपाण्यन्यान्यसङ्ख्यानि कृष्णस्य मुनिसत्तमाः ।
शिल्पशास्त्रोक्तविधिना तत्तद्रूपाणि कारयेत् ॥ १२०

दक्षिणं कुञ्चितं पादं वामपादं तु सुस्थितम् ।
तस्य कुञ्चितपादन्तु [2]वामपार्ष्णिनिवेशितम् ॥ १२१

1. सुखासीनं आ. 2. वामपादनिवेशितं आ.

गृहीतवेणुं हस्ताभ्यां वेणुरन्ध्राहिताननम् ।
बर्हिबर्हावतंसञ्च कुर्याद्गोपालविग्रहम् ॥ १२२

युक्त्या बुद्ध्या समूह्यैव कुर्यात्तद्रूपकल्पनम् ।

क्रीडायष्टिधरं कृष्णं तथा गोपालविग्रहम् ॥ १२३

विनान्यान्यस्य रूपाणि देवीविरहितानि वै ।
क्रीडायष्टिधरं कृष्णं चौत्सवं विष्णुमेव वा ॥ १२४

(ज्ञात्वा च हरिवत्सर्वान्परिवारान्प्रकल्पयेत् ।
सुन्दरं नाम गोपालं शैविकं स्थानमाश्रितम् ॥ १२५

द्विभुजं पुष्पवहं चैव कुर्यान्निर्माल्यहारिणम्) ।
पौण्डरीके प्रधानाग्नौ हौत्रशंसनमाचरेत् ॥ १२६

'सत्यस्सत्यस्थ' इत्युक्त्वा शतमष्टोत्तरं यजेत् ।
हरेरिव समस्तानि स्थापनादीनि कारयेत् ॥ १२७

चतुर्भुजकृष्णः

कृष्णं चतुर्भुजं केचिदिच्छन्ति मुनिसत्तमाः ।
पूर्ववत्पूर्वहस्तौ तु शङ्खचक्रधरौ परौ ॥ १२८

कृष्णादिमूर्तयः प्रोक्ताः वासुदेवपुरस्सराः ।
सर्वमन्यत्समं प्रोक्तमिति पूर्वजशासनम् ॥ १२९

कल्की

युगान्तसमये विष्णुः कल्किनामा भविष्यति ।
खड्गखेटकहस्तस्तु म्लेच्छादीन् संहनिष्यति ॥ १३०

भिन्नाञ्जननिभं रक्तवाससं सम्प्रकल्पयेत् ।
पौण्डरीके प्रधानाग्नौ हौत्रशंसनमाचरेत् ॥ १३१

'त्वत्तः स' त्येति मन्त्रेण शतमष्टोत्तरं यजेत् ।

अवताराचंने विकल्पाः

अन्तरालेऽथवा विष्णोर्दक्षिणोत्तरपार्श्वयोः ॥ १३२

कल्पयेद्रामकृष्णौ तु मुखमण्डप एव वा ।
अथान्तर्मण्डले वाऽपि तथाऽऽवरणमण्डपे ॥ १३३

संस्थाप्य कौतुकं वेरमर्चयेदिति केचन ।

नारसिंहं वराहञ्च वामनञ्च त्रिविक्रमम् ॥ १३४

ध्रुववेरं विना कृत्वा कौतुकं लक्षणान्वितम् ।
स्थापयित्वा तथा विष्णुं पूजयेदग्रमण्डपे ॥ १३५

पाद्यमाचमनं स्नानमलङ्कारं तथैव च ।
पाद्यमाचमनं पुष्पं गन्धं धूपमतः परम् ॥ १३६

दीपार्घ्याचमनान्येव हविः पानीयमेव च ।
तथैवाचमनं पश्चान्मुखवासमतः परम् ॥ १३७

परप्रधानबिम्बानामेते षोडश विग्रहाः ।
स्वप्रधानावताराणां हरेरिव समाचरेत् ॥ १३८

स्थानं दशावताराणां ध्रुवकौतुकयोस्ततोः ।
अन्तरालेऽपि वा केचिदिच्छन्ति मुनिसत्तमाः ॥ १३९

स्थानाश्रयावताराणां मुखवासान्तमर्चनम् ।
तत्तत्प्रधानमन्त्रान्ते तत्तन्मूर्तिं समुच्चरन् ॥

अर्चनं स्नपनञ्चैव कुर्याद्भक्तिसमन्वितः[1] ।

आविर्भावावताराः

अतः परं प्रवक्ष्यामि ह्याविर्भावांश्च शार्ङ्गिणः ॥

1. अत्र अध्यायसमाप्तिः, ख.

त्रैलोक्यमोहनश्चैव हरिशङ्करमेव च ।
एवमाद्याः पुरा प्रोक्ताः खिले विस्तरतशो मया ॥ १४२

(मत्स्यकूर्मवराहाणां नारसिंहस्य कल्किनः ।
यक्ष श्रवणमेवोक्तं वामनस्य तथैव च ॥ १४३
अन्येषामवताराणां पृथगृक्षमुदीरितम्) ।

लक्ष्मीनारायणः

लक्ष्मीनारायणं वक्ष्ये सर्वसम्पत्करं वरम् ॥ १४४

वीरस्कन्धे समासीनं शङ्खचक्रधरं हरिम् ।
सर्वमासीनवत्कृत्वा तस्योरौ दक्षिणे तथा ॥ १४५

श्रियं प्रकल्पयेद्देवीं सर्वाभरणभूषिताम् ।
प्राञ्जलीकृतहस्तां तां व्रीलोहर्षसमन्विताम् ॥ १४६

देवेशोपगूढां तां दक्षिणापरपाणिना ।
तथा निवेशितेनोरौ वामेनापरपाणिना ॥ १४७

एष एव विशेषस्त्वादन्यत्सर्वं हरेरिव ।
वामोरौ कारयेल्लक्ष्मीमिति केचिद्वदन्ति च ॥ १४८

(वीरस्कन्धं विना केचिदेवमासीनमासने) ।

सभ्यहोमे प्रधानाग्नौ प्रतिष्ठोक्ताहुतीः हुनेत् ॥ १४९

नारायणानुवाकञ्च श्रियः सूक्तं तथैव च ।
यजेदष्टोत्तरशतमन्येष्वग्निषु पूर्ववत् ॥ १५०

'श्रिये जात' इति जपन् पद्माग्नौ पद्महोमकम्[1] ।

लक्ष्मीनारायणाख्यन्तु यजेद्विष्ण्वादिमूर्तिभिः ॥ १५१

1. ततः परं 'शंसानियच्छ' त्वित्युक्त्वा शतमष्टोत्तरं यजेत् । श्रिय [illegible] पवित्रीञ्च लक्ष्मीमित्येव मूर्तिभिः । विशेषात् स्थापने तत्र विष्णुमूर्ति [illegible]येत् । लक्ष्मीशं लक्ष्मीपतिञ्च लक्ष्मीवल्लभमेव च । लक्ष्मीनारायण- [illegible] चतुर्मूर्तिभिरर्चये' दिति अधिकम् आ.

विशेषात्कौतुकं तत्र विष्णुमूर्तिं प्रकल्पयेत् ।
औत्सवं बलिबेरञ्च विष्णुं वा तद्वदेव वा ॥ १५२
पूर्वमष्टोपचारैस्तु ध्रुवमभ्यर्च्य मन्त्रतः ।
द्वात्रिंशद्विग्रहैः पूजां कौतुके तु समाचरेत् ॥ १५३

निष्कलार्चाविचारः

'नारायणपरं ब्रह्म' परमात्मेति कीर्त्यते ।
तद्रूपं परमं सूक्ष्म[1] मक्षरं निष्कलञ्च यत् ॥ १५४
तत्स्थानीयं ध्रुवं प्रोक्तमशक्यं निष्कलार्चनम् ।
पुष्पन्यासान्तमात्रं स्याद्ध्रुववेरार्चनं स्मृतम् ॥ १५५
विष्णोर्यत्सकलं रूपं स्थूलं सर्वस्य कारणम् ।
तत्स्थानीयं कौतुकं स्यात्तत्र पूजां समाचरेत् ॥ १५६
यथोपयोगशक्यत्वात्कर्तुं पुष्पादिपूजनम् ।
सालम्बनत्वाद्विहितं [2]सकलत्वाच्च पूजनम् ॥ १५७
ध्रुवस्य निष्कलत्वाच्च निरालम्बनहेतुतः ।
अशक्यमत्र वै कर्तुं स्नानगन्धादिविग्रहान् ॥ १५८
शास्त्रसिद्धैर्निमित्तैश्च नेष्यन्ते वै ध्रुवार्चने ।
तथापि पूजनं कर्तुं ध्रुववेरे यदीच्छति ॥ १५९
स्नानप्लोतौ विना सर्वैरुपचारैस्समर्चयेत् ।
'ऋतं सत्ये' ति मन्त्रेण पूजयेदिति केचन ॥ १६०
नारायणानुवाकेन दद्यात् पुष्पाञ्जलिं तथा ।
रविमण्डलमध्यस्थं तप्तहाटकसन्निभम् ॥ १६१
चन्द्रमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम् ।
अग्निमण्डलमध्यस्थं पूर्ववत्परिकल्पयेत् ॥ १६२

1. अत्यन्तं ई. 2. सकलार्चनपूजनम् आ.

शङ्खचक्रधरं सौम्यं प्रसन्नेन्दुनिभाननम् ।
अभयं दक्षिणं पाणिं वामं कट्यवलम्बितम् ॥ १६३

चक्रम्

अतः परं प्रवक्ष्यामि महाचक्रस्य लक्षणम् ।
स्वतन्त्रं स्थापयेन्नैव महाचक्रं विशेषतः ॥ १६४
देवस्य दक्षिणे पार्श्वे नैर्ऋते वा प्रकल्पयेत् ।
यमनैर्ऋतयोर्मध्ये स्थापयेदालयाश्रयम् ॥ १६५
उपानत्स्थूपिपर्यन्तं वृत्तमेवास्य मन्दिरम् ।
एकवेरविधानेन स्थापयेत्तद्ध्रुवार्चनम् ॥ १६६
अष्टोत्तरशतज्वालं चक्रं कृत्वाऽस्य मध्यमे ।
अग्निमण्डलयुग्मान्तर्गतं चक्रं प्रकल्पयेत् ॥ १६७
उत्तमे षोडशभुजं मध्यमेऽष्टभुजं तथा ।
अधमे च चतुर्बाहुं कल्पयेत्तु सुदर्शनम् ॥ १६८
चक्रञ्च पट्टसं कुन्तं दण्डाङ्कुशहविर्भुजः ।
क्षुरिकाञ्चैव शक्तिञ्च सव्यैर्दधतमष्टभिः ॥ १६९
शङ्खं शरञ्च चापञ्च पाशं हलमतः परम् ।
वज्रं गदां तोमरञ्च दधद्भामैश्च बाहुभिः ॥ १७०
इत्युक्तषोडशभुजस्त्वष्टबाहुः प्रवक्ष्यते ।
शङ्खचक्रगदापद्ममुसलाङ्कुशपाशिनम् ॥ १७१
चापिनं कल्पयेच्चक्रमष्टबाहुधरं परम् ।
शङ्खचक्रधरश्चैव गदापद्मधरं परम् ॥ १७२
चतुर्बाहुं द्विबाहुं वा यथाशक्ति प्रकल्पयेत् ।
दंष्ट्राकरालवदनं अर्केन्द्वग्निविलोचनम् ॥ १७३

आजङ्घात् स्कन्धपर्यन्तं लसत्किङ्किणिमालया ।
राजमानमुदाराङ्गं सर्वशत्रुविदारणम् ॥ १७
महार्हभूषणोद्भासिवक्षसं भक्तवत्सलम् ।
वह्निज्वालावृतश्चापि किरीटमकुटोज्ज्वलम् ॥ १७
शरोऽङ्गाराग्निसङ्काशं शुक्लपत्रनिभाम्बरम् ।
एवं कृत्वा महाचक्रं स्थापनारम्भमाचरेत् ॥ १७
अक्ष्युन्मेषादिकं कृत्वा चक्रमन्त्रद्वयेन च ।
अधिवास्य यथाशास्त्रं पञ्चगव्यादिषु क्रमात् ॥ १७
कुम्भे ध्यात्वा समावाह्य संस्नाप्य कलशैस्तथा ।
औपासनाग्नौ विधिना हौत्रं सम्यक्प्रशस्य च ॥ १७
वैष्णवं विष्णुसूक्तञ्च पौरुषं सूक्तमेव च ।
चतुरावर्त्य हुत्वा तु चक्रमन्त्रद्वयेन च ॥ १७
अष्टोत्तरशतं हुत्वा जुहुयाच्चक्रमूर्तिभिः ।
प्रातर्मुहूर्ते संस्थाप्य समावाह्य समर्चयेत् ॥ १८
एतद्वैदिकमुद्दिष्टं भुक्तिमुक्तिफलप्रदम् ।
(केवलं भुक्तिकामश्चेत् सरेन्मन्त्रं षडक्षरम् ॥ १
सर्वान्कृत्वा विधानेन होमकाले विशेषतः ।
अष्टोत्तरसहस्रं तन्मन्त्रमावर्त्य हूयताम् ॥ १
एव एव विशेषः स्यादन्यत्सर्वञ्च चक्रवत्) ।

इत्यार्षे श्रीवैखानसे भगवच्छास्त्रे भृगुप्रोक्तायां संहितायां क्रियाधि
दशावतारलक्ष्मीनारायणमहाचक्रस्थापनविधानं
नामैकादशोऽध्यायः[1] ।

1. अत्र १२ अध्यायसमाप्तिः ई. १४ अध्यायसमाप्तिः ख.

द्वादशोऽध्यायः

स्नापनोत्सवयोः पृथक्प्रतिष्ठा

[1] स्नापनोत्सवयोः पश्चात्प्रतिष्ठां प्रवदाम्यहम् ।
कौतुके स्थापिते पूर्वं शक्तौ सत्यां पुनस्तथा ॥ १
औत्सवं स्नापनं कृत्वा स्थापयेद्विभवार्हतः ।
बिम्बं सलक्षणं कृत्वा सङ्घातं विधिना चरेत् ॥ २
अक्ष्युन्मेषाधिवासौ च कृत्वा तस्य यथाविधि ।
सभ्याब्जकुण्डे वा हुत्वा प्रतिष्ठां पूर्ववच्चरेत् ॥ ३
अन्याग्निविहितं होमं सभ्य एव समाचरेत् ।
तत्र प्रणीय नित्याग्निं होमकर्म समाचरेत् ॥ ४
कुर्यान्नित्याग्निविच्छेदे पञ्चकुण्डानि पूर्ववत् ।
तत्रापि गार्हपत्याग्नेः प्रणीयान्येषु हूयताम् ॥ ५
पूर्वेद्युरेव शर्वर्यां रात्रिपूजावसानके ।
देवं विशेषतोऽभ्यर्च्य हविस्सम्यङ्निवेदयेत् ॥ ६
ध्रुववेरे समावाह्य प्रणम्यैवानुमान्य च ।
संसाध्य विधिना कुम्भं तत्रावाह्य ध्रुवात्तथा ॥ ७
कुम्भं बिम्बस्य पार्श्वे तु स्नानश्चभ्रे निवेश्य च ।
स्नापनं शयनारोहं तथा कौतुकबन्धनम् ॥ ८
हौत्रं होमं तथा कृत्वा प्रातस्संस्थाप्य पार्श्वयोः ।
कृत्वा मन्त्राक्षरन्यासौ पूर्वमावाह्य कौतुके ॥ ९
पश्चाच्चैवौत्सवेऽर्चायां समावाह्य तथा ध्रुवात् ।
आसनादिभिरभ्यर्च्य हविस्सम्यङ् निवेदयेत् ॥ १०

1. इत आरभ्य सार्धपञ्चविंशतिश्लोकपर्यन्तं मातृकान्तरेषु न दृश्यते ।

उत्सवं चौत्सवे बिम्बे स्नापनं स्नपनं तथा ।
यथाशक्ति प्रकुर्वीत दद्यादाचार्यदक्षिणाम् ॥ ११

लौकिकस्थापनायान्तु नित्याग्निर्न प्रणीयते ।
आवाहनं तथा कुम्भे कुर्यादादित्यमण्डलात् ॥ १२
कुम्भात्तु लौकिके बिम्बे समावाह्य समर्चयेत् ।
एकबेरविधानञ्चेत् स्थापनं न विधीयते ॥ १३
कारयित्वौत्सवं बिम्बं रात्रिपूजाऽवसानके ।
एकबेरं समभ्यर्च्य कुम्भे शक्तिं निवेश्य च ॥ १४
पूर्ववत्स्थापनादीनि कारयित्वा यथाविधि ।
एकबेरे समावाह्य तस्मादावाह्य चार्चयेत् ॥ १५
एष एव विशेषः स्यादन्यत्सर्वञ्च पूर्ववत् ।

बलिबेरस्य पृथक् प्रतिष्ठा

बलिबेरप्रतिष्ठा चेत्तल्लिङ्गावाह्य कौतुके ॥
समभ्यर्च्य निवेद्यैव बल्युत्सवमथाचरेत् ।

देव्योः पश्चात् प्रतिष्ठा

देव्योः पश्चात्प्रतिष्ठायां विशेषो वक्ष्यतेऽधुना ॥
देव्यौ स्थावरबिम्बस्य न प्रतिष्ठापयेत्पुनः ।
जङ्गमानान्तु बिम्बानां पुनर्देव्यौ च कल्पयेत् ॥
ध्रुवे देवीवियुक्तेऽपि देवीयुक्तञ्च कौतुकम् ।
कुर्यात्सर्वप्रयत्नेन विशेषादौत्सवं तथा ॥
अक्ष्युन्मेषाधिवासौ च कृत्वा तन्मन्त्रमुच्चरन् ।
पार्श्वयोर्यज्ञशालायां कुर्यादौपासनद्वयम् ॥

तयोर्नित्याग्निमाधाय यथोक्तं होममाचरेत् ।
ध्रुवस्य देवीबिम्बाभ्यां शक्तिमावाह्य कुम्भयोः ॥ २१
स्नपनं शयनं कुम्भं होमञ्चैव पृथक् चरेत् ।
सर्वञ्च पूर्ववत्कृत्वा प्रातः स्नात्वा यथाविधि ॥ २२
ध्रुवदेव्योस्समावाह्य ताभ्यामावाहयेत्तयोः ।
तच्छक्तिपूर्वसंस्काराद्विवाहं न प्रकल्पयेत् ॥ २३
देवेनाप्यथवा सार्कं प्रतिष्ठामाचरेत्तयोः ।
निवेश्य कौतुकाच्छक्तिं ध्रुवबेरे यथाविधि ॥ २४
ध्रुवबेरात्तथा कुम्भे शक्तिमावाह्य पूर्ववत् ।
स्नानधिष्ण्ये प्रतिष्ठाप्य देवीं कुम्भञ्च दक्षिणे ॥ २५
पार्श्वयोः श्वश्रयोर्देव्यौ प्रतिष्ठाप्य पृथक्पृथक् ।
[1]स्नापयित्वैकबेरान्तु शाययित्वैव मन्त्रतः ॥ २६
हौत्रादि सकलं कर्म कृत्वा पूर्वोक्तमार्गतः ।
कुम्भाद्ध्रुवे समावाह्य तस्मादावाहयेत्पुनः ॥ २७
विवाहविधिमत्रापि नाचरेदिति शासनम् ।

ध्रुवे देवीवियुक्तेऽपि मथित्वाऽग्निं प्रणीय च ॥ २८
आधारं विधिवत्कुर्यात्तत्रौपासनकुण्डके ।
देव्यौ तु पूर्ववद्ध्यात्वा हृदयाद्वार्कमण्डलात् ॥ २९

---

1. इतः पूर्वं अधोलिखितसार्धश्लोकः मातृकान्तरेषूपलभ्यते । अनेनैव [illegible] तासु मातृकास्वध्यायारम्भश्च । 'ध्रुवस्य कौतुकस्यापि स्नापनस्यौत्स- [illegible] च । बलिबेरस्य देव्योश्च प्रतिष्ठां सहकारयेत् । पृथगेव प्रतिष्ठा [illegible]स्नाप्य च पृथक्पृथक्' इति ।।

स्कन्ददेवत्यमन्त्रैश्च नयनोन्मीलनादिकम् ।
कृत्वा तु कौतुकं बद्ध्वा शतमष्टोत्तरं यजेत् ॥ ४६
तन्मन्त्रेण समावाह्य नित्यं विधिवदर्चयेत् ।
अत्रानुक्तानि सर्वाणि खिलोक्तविधिना चरेत् ॥ ४७
एवं यः कुरुते भक्त्या तस्य पुत्रास्तु नीरुजः ।
आयुष्मन्तः श्रिया युक्ताः वर्धन्ते नात्र संशयः ॥ ४८
इह भुक्त्वा महाभोगान् सोऽन्ते स्वर्गमवाप्नुयात् ।

विनायकार्चनम्

वक्रतुण्डस्य वक्ष्यामि नित्यं वै सम्यगर्चनम् ॥ ४९
'धर्मोधमा' दि मन्त्राभ्यां नयनोन्मीलनं चरेत् ।
अष्टोत्तरशतं ताभ्यां हुत्वाऽऽवाह्य यथाविधि ॥ ५०
संस्थाप्य ताभ्यां मन्त्राभ्यां नित्यं विधिवदर्चयेत् ।
एवं यः कुरुते भक्त्या निर्विघ्नं तस्य कर्म वै ॥ ५१
सर्वं सम्पद्यते शीघ्रं लक्ष्मीश्च विपुला भवेत् ।

श्रीदेव्यर्चनम्

अतः परं प्रवक्ष्यामि गृहे नित्यार्चनं श्रियः ॥ ५२
पद्मकिञ्जल्कसदृशां सर्वाभरणभूषिताम् ।
पद्मासने समासीनां सपद्मोर्ध्वभुजद्वयाम् ॥ ५३
सव्येन पूर्वहस्तेन भक्तानामभयप्रदाम् ।
वामेन पूर्वहस्तेन दधतीं विपुलं धनम् ॥ ५४
कारयित्वा श्रियं देवीं 'श्रिये जात' इति ब्रुवन् ।
'श्रं सा नियच्छ' तीत्युक्त्वा 'भूयाम' इति च क्रमात् ॥ ५५

नयनोन्मीलनं कृत्वा जलादिष्वधिवास्य च ।
कुम्भं संसाध्य संस्नाप्य बद्ध्वा प्रतिसरं तथा ॥ ५६
शाययित्वा समावाह्य हौत्रकर्मावसानकं ।
पौण्डरीकं तु जुहुयात् 'श्रिये जाते' ति मन्त्रतः ॥ ५७
'श्रं सा नियच्छती' त्युक्त्वा 'भूयाम' इति च क्रमात् ।
शतमष्टोत्तरं हुत्वा श्रीसूक्तेन सकृद्यजेत् ॥ ५८
श्रियश्शताष्टकैर्मन्त्रैर्दशकृत्वस्ततः परम् ।
मधुसर्पिस्समायुक्तं पृषदाज्यसमन्वितम् ॥ ५९
पुष्कलामाहुतिं हुत्वा बिल्वपत्रैर्घृताप्लुतैः ।
'श्रिये जाते' ति मन्त्रेण शतमष्टोत्तरं यजेत् ॥ ६०
प्रातस्स्नात्वा प्रतिष्ठाप्य समावाह्य समर्चयेत् ।
तत्सूक्तेनैव तन्मन्त्रैः पूजयेत्सर्वविग्रहैः ॥ ६१
अत्रानुक्तानि सर्वाणि खिलोक्तविधिना चरेत् ।
अचलां श्रियमाप्नोति जन्मजन्मान्तरेषु च ॥ ६२
तद्वंशजाश्च श्रीमन्तो भविष्यन्ति न संशयः ।

दुर्गार्चनम्

अथ वक्ष्यामि दुर्गायाः प्रतिष्ठामर्चनं गृहे ॥ ६३
साक्षात्सा वैष्णवी माया तस्मात्तां नित्यमर्चयेत् ।
नवाधनालमानेन कृत्वा देवीं चतुर्भुजाम् ॥ ६४
शङ्खचक्रधराञ्चैव किरीटमकुटोज्ज्वलाम् ।
पीतवस्त्रधरां देवीं कक्ष्याबद्धघनस्तनीम् ॥ ६५
सन्यश्यामनिभां सौम्यां हारकौस्तुभभूषिताम् ।
अङ्गहोमञ्च हुत्वा तु दुर्गासूक्तं शताष्टकम् ॥ ६६

[1]पाञ्चभौतिकमन्त्रैश्च जुहुयाद्विष्णवैरपि ।
कृत्वाऽक्षिमोचनं पश्चाज्ज्वलादिप्यधिवास्य च ॥ ६७

कुम्भे ध्यात्वा समावाह्य संस्नाप्य कलशैरपि ।
बद्ध्वा प्रतिसरं पश्चात् शाययेच्छयनोपरि ॥ ६८

हौत्रं प्रशंस्य चाऽवाह्य निरुप्याज्याहुतीर्यजेत् ।
दुर्गासूक्तं ततस्सभ्ये शतमष्टोत्तरं यजेत् ॥ ६९

रौद्रञ्च वैष्णवं ब्राह्मं भौतिकं पञ्चवारुणम् ।
जयादिभिश्च कूष्माण्डैस्साविज्या च सहस्रकम् ॥ ७०

सहस्राहुतिपर्यन्तं पूर्ववज्जुहुयाद्बुधः ।
पालाशीभिस्समिद्भिश्च विष्णुसूक्तेन हूयताम् ॥ ७१

स्विष्टाकारञ्च हुत्वा तु रात्रिशेषं व्यपोह्य च ।
प्रातस्स्नात्वा प्रतिष्ठाप्य समावाह्य समर्चयेत् ॥ ७२

'जातवेदस' इत्यादि दुर्गासूक्तेन पूजयेत् ।
एष एव विशेषः स्यादन्यत्सर्वं हरेरिव ॥ ७३

एवं यः कुरुते भक्त्या दुर्गायाः स्थापनार्चने ।
जित्वा शत्रूंश्चिरं भुक्त्वा भूमौ तु विपुलं [2]सुखम् ॥ ७४

विष्णुसायुज्यमाप्नोति दशपूर्वेदशापरैः ।

सरस्वत्यर्चनम्

अतः परं प्रवक्ष्यामि वाग्देव्या अर्चनं गृहे ॥ ७५

1. पाञ्चभौतिकमन्त्रेण अर्घ्यं कुर्यात्समन्त्रकम् । दद्यादन्योपचारां
'उदुत्यं चित्र' मित्यपि । गुरूपदेशसिद्धैः कल्पमन्त्रैरथापि वा । आ
नाद्युपचारैस्तु पूजयेदिति केचन । सावित्र्या वा (भूसावित्र्या) र्चयेन्नि
मिति पूर्वजदर्शनम्, इति आ. कोशेषु पाठः । 2. धनम् आ.

जटामण्डलसंयुक्तां स्वर्णवर्णां चतुर्भुजाम् ।
ऊर्ध्वं दक्षिणहस्तन्तु अक्षमालासमन्वितम् ॥ ७६

मुद्राहस्तमधस्ताद्वै वरदं वाऽपि कल्पयेत् ।
कमण्डलुसमायुक्तं वामहस्तं तथोर्ध्वगम् ॥ ७७

ज्ञानमुद्रासमायुक्तां सर्वाभरणभूषिताम् ।
पद्मासने समासीनां पद्मकाञ्चनशोभिनीम् ॥ ७८

'पावकान' 'महो अर्ण' मन्त्राभ्यां मनसा स्मरन् ।
देवीं कुर्याद्द्विमन्त्राभ्यामक्ष्युन्मेषाधिवासनम् ॥ ७९

बद्ध्वा प्रतिसरञ्चापि स्नपनं शयनादिकम् ।
हौत्रञ्च सम्प्रशंस्यैव मूर्त्यावाहनमाचरेत् ॥ ८०

निरुप्याज्याहुतीर्हुत्वा शतमष्टोत्तरं यजेत् ।
वैष्णवं विष्णुसूक्तञ्च नरसूक्तं यजेत्क्रमात् ॥ ८१

ब्राह्ममैन्द्रं तथाऽऽग्नेयं स्विष्टाकारं जुहोति च ।
एष एव विशेषः स्यादन्यत्सर्वं हरेरिव ॥ ८२

एवं यः कुरुते भक्त्या सर्वा विद्या अवाप्नुयात् ।
[1]इतरं पुस्तकधरं योजयेच्च ततः परम् ॥ ८३

ब्रह्मासनन्तु कर्तव्यं पद्मपीठस्य चोपरि ।
पादं प्रसारितं वाऽपि दक्षिणं तु समाचरेत् ॥ ८४

सर्वाभरणसंयुक्तां श्वेतवस्त्रविभूषिताम् ।
शुक्लपुष्पाङ्गरागां तां कक्ष्यावद्धघनस्तनीम् ॥ ८५

सारस्वतेन सूक्तेन कृत्वाऽक्ष्युन्मेषणादिकम् ।
शयनं तु तथा कृत्वा हौत्रशंसनमाचरेत् ॥ ८६

1. इत आरभ्य आध्यायान्तं ई. कोश एव पाठः

रिचक्षुःश्रोत्रास्यघ्राणादिमार्गेष्वभेद्यं महांगोपांगेष्वभेद्यं नहीनं नाधिकं यथापूर्वं तथैवकल्केन परिकल्पयेत्। अन्यथा तद्धेरेदेवोनवसेत्। चक्षुश्छिद्रे यजमानस्यान्धत्वं कर्णच्छिद्रेबधिरत्वम्,आस्यच्छिद्रेमूकत्वं घ्राणादिमार्गच्छिद्रे प्रमेहकुष्ठादिव्याधयो धान्यादिनाशश्चाचिरादेवभवेयुः महाङ्गोपाऽङ्गप्रत्यङ्गभेदैः स्थानभ्रंशोभवेत्। तस्मात्सर्वपरिहृत्यैवकारयेत्॥

अथवर्णसंस्कारंवक्ष्ये-देवं युगानांक्रमेण श्वेतस्वर्ण श्यामाञ्जनवर्णं सर्वेषुश्यामवर्णमेवकारयेत्। सर्ववर्णान् संगृह्य पृथक्पृथक्पात्रे कपित्थनिर्यासाम्बुनासंपेष्यगृहीत्वा पौण्डरीकाग्निकुण्डंकृत्वा आघारंहुत्वा पूर्ववत्धान्यपीठे नववस्त्रोपरि वर्णान्सन्यस्य 'जीवायनम'इत्यभ्यर्च्य अधिवास्य अग्निंपरिस्तीर्य वैष्णवं विष्णुसूक्तं, पुरुषसूक्तं, पारमात्मिकं पार्षदं, हुत्वा 'जीवायस्वाहे' त्यष्टोत्तरशतं(हुत्वा) जुहोति। 'हिरण्यगर्भ' इतिवर्णमभिमृश्य आत्मसूक्तंजप्त्वा अतोदेवादिना हेमपात्रे वर्णंगृहीत्वा तूर्यघोषणंकारयित्वा विष्णुसूक्तं, पुरुषसूक्तंच जप्त्वा तूलिकाग्रे वर्णमादाय 'सहस्रशीर्ष' मितिदेवस्यललाटेसंलेपयेत्। आचार्यसंपूजयेत्। पुण्याहंवाचयित्वा अग्निंपरिस्तीर्य शांतिहोमंहुत्वा अग्निंविसृज्य पश्चात् शिलिपनंसंपूज्य तेनतत्तद्बिंबवर्णं

संलेपयेत्। अत्यन्तंदृशनीयंयथोक्तविधिनासंलेप(प्य)स्य पश्चादेवमेवसंस्कारंकृत्वा सुवर्णसहितंवर्णंसंलेपयेत। स्माच्छक्तियुतंभवतीति विज्ञायते॥

इति श्रीवैखानसेमरीचिप्रोक्ते विमानार्चनाकल्पे शूलस्थापन (वर्ण) विधिर्नामाष्टादशःपटलः॥ १८

(अथ ध्रुवबेरविधिंवक्ष्ये-तत्त्रिविधं स्थानकमासनं शयनंचेति। पुनस्तदेकैकं चतुर्विधंस्यात्। योगं च भोग मभिचारिकमिति। योगार्थंयोगमार्गे भोगार्थंभवी(रा)र्थंवीरमार्गे शत्रुजयार्थमाभिचारिकंकारयेत्। माद्राह्ये विविक्तेदेशे नदीतीरे तत्संगमे पर्वते वने वा पार्श्वेवा योगस्थानकं,तद्वाह्येवा वीरस्थानकं,वनगिरिदुर्गे राद्यन्ते शत्रुदिङ्मुखेचाऽऽभिचारिकंभवति।

विमानंनलि(न)कंविमलाकृति सर्वतोभद्रं,नन्द्यावर्त श्रीप्रतिष्ठितं स्वस्तिभद्रं,पद्माकारं, वृत्तगेहम , उद्योगप योगकान्त, मित्यादि,समचतुरश्र, मायताश्रं, वृत्तं, वृ यतं, स्थानकस्य।

अष्टाऽङ्गंसर्वतोभद्रं, महापद्मं, वृत्तभद्रं (प चतुर्मुखदिशास्वस्तिकं, महापद्मं, चतुस्फुटं, पर्वता खंडहर्म्य, सुयोगपद्मं, समचतुरश्रं समवृत्तंवाऽऽसनस्य

स्वस्तिकं वृत्तभद्रं वृत्तगेहमवेदिकं प्रेक्षागृहं राजच्छंदं श्रीप्रतिष्ठितं, शैलयोगं, मातृखंडं, गणिक शालमेवमादीन्यायताश्राणिवर्तुलायतानिवा शयनस्य

स्थानकावमान स्थानकवरम् आसनचासनं शयने शयनं सर्वत्रस्थानकमासनंयानकंवा,शयनेशयनं कर्त्तव्यम्, अन्ययोःशयनं नैवकल्पयेत्। शयनागारद्वारविस्तारं-पादयोरंन्तरं तत्तादोदयाष्टांशोनं द्वारोत्सेधम् एवमासनागारेस्थानकेवाकारयेदित्येके।

यानकेसर्वविमानं ध्रुववेरेप्विष्टंमानंविनिश्चित्य सलक्षणंवेरंकृत्वा गर्भागारेकृतेपदे दैविकेस्थानकं यानकंच किंचिन्मानुषमाश्रित्य दैविकेचासनं किंचिद्देव माश्रित्यमानुषांशेशयनं संस्थापयेत्। प्राग्द्वारंसर्व संपत्करं पश्चिमद्वारंकीर्तिदं दक्षिणद्वारंजयदं उत्तर द्वारंज्ञानदं? प्राक्शीर्षकंशांतिकं पश्चिमशीर्षंपौष्टिकं दक्षिणशीर्षंजयदं उत्तरशीर्षमाभिचारिकम्। ग्रामाद्दक्षिणेशयानं उत्तरद्वारंचेत्प्राक्शीर्षं पश्चिमेप्राक्द्वारंचेद्दक्षिणशीर्षम्, उत्तरेदक्षिणद्वारंचेत्पश्चिमशीर्षं प्राच्यांपश्चिमद्वारंचेत् दक्षिणशीर्षमेवकारयेत्। स्थानकासनशयनानिग्रामप्रेक्षाण्येवकारयेत्।

(योगत्रैविध्यम्.)

देवेशं श्यामवर्णं, चतुर्भुजं, शंखचक्रधरम् अभयदक्षिणहस्तं, वरदकट्यवंलवितवामहस्तं, दक्षिणे चैकजानुनासमासीनंभृगुं, तथामार्कंडेयं, तथैवभूमिपुण्यौवा, दक्षिणेभित्तिपार्श्वेहेमाभं चतुर्भुज मक्षमाला

कमण्डलुधराभयकट्यवलंबितहस्तं, स्थितं, ब्रह्मा मुत्तराभिमुखम्, उत्तरेभित्तिमूलेपार्श्वे श्वेताभं च र्भुजं मृगपरशुधरम् अभयंकट्यवलंवितहस्तं श दक्षिणाभिमुखं, स्थितमेवकारयेत्। तदुत्तमंयोगस्थानक ब्रह्मशङ्कराभ्यांहीनंमध्यमं, पूजकमुनिभ्यांहीनमधमम्

(योगत्रैविध्यम्)

देवं चतुर्भुजं श्यामाभं शंखचक्रधर मभयवर दक्षिणहस्तं कट्यवलंबित सिह्मकण्ठ (र्ण) वामहस्तं, त ब्रह्मेशौ दक्षिणे श्रियंदेवीं रुग्माभां सुस्थिरदक्षिणप किंचित्कुंचितवामपादां धृतकमलदक्षिणहस्तां प्रसारि वामकरां देवंकिंचित्समीक्ष्य स्थितां, वामेहरिणीं श्यामा प्रसारितदक्षिणहस्तां धृतोत्पलवामहस्तां संस्थितवामप किंचित्कुंचितदक्षिणपादां देवंकिंचित्समीक्ष्यस्थितां क येत्। देव्योर्हस्तपादौविपरीतौवाकारयेत्। कुडचकोतु योर्मध्ये दक्षिणेभृगुं दक्षिणेनजानुनासीनं वामेनोत्कटि मासीनं सपद्मवामहस्तं दक्षिणोरुनिहितदक्षिणकरं, वा पुराणं वामेनजानुनासीनं दक्षिणेनोत्कटिकमासीनं स दक्षिणहस्तं वामोरुविन्यस्तवामकरंकारयेत्। एवमा थित्वा हस्तौसंपुटौवा कारयेत्। भित्यूर्ध्वभागे माया ह्लादिनीभ्यां व्याजिनीभ्यां तुंबुरुनारदाभ्यां वि लक्ष्मि नाभ्यां यक्षविद्याधराभ्यां सनकसनत्कुमाराभ्यां सूर्य

द्राभ्यां युक्तमुत्तमंभोगस्थानकम्, तुंबुरुनारदाभ्यां यक्ष-विद्याधराभ्यां हीनं मध्यमम् सनकसनत्कुमाराभ्या,मादित्यचंद्राभ्यां पूजकमुनिभ्यां हीनमधमम् ॥

(वीरत्रैविध्यम्)

देवंश्यामाभंचतुर्भुजं शंखचक्रधरंकारयेत् । दक्षिणवामयोःब्रह्मेशानाभ्यां भृगुपुण्याभ्यांकिष्किंधसुंदराभ्यां व्याजकाभ्यां सनकसनत्कुमाराभ्यां सूर्यचंद्राभ्यां युक्तमुत्तमम्, वीरस्थानकम्, किष्किन्धसुंदराभ्यां सनकसनत्कुमाराभ्यां हीनंमध्यमम्, आदित्यचंद्राभ्यां पूजकक्षिति (मुनि)भ्यां हीनमधमम् ॥

(आभिचारिकस्थानकम्)

एवंद्विभुजं चतुर्भुजंवा धूम(म्र)वर्णश्यामाऽधरं (म्वर)शुष्काङ्गंतमोगुणान्वित, मूर्ध्वनेत्रं, ब्रह्मादिदेवैर्विवर्जितं, पैशाचपदस्थम्, आर्द्राद्यनुक्तनक्षत्रे शर्वर्यां चरराशौस्थापितं विमानंच लक्षणहीनं कारयेत् । एतदाभिचारिकस्थानकंख्यात् ॥

(पीठपरिमाणम्)

स्थानकस्यपीठोच्चं, वेरोदयं द्वारोदयंवा अष्टभागं षट्भागंवा कृत्वै कांशंभुवंगसमम् अध्यर्धद्विगुणंवा समवृत्तं पद्माकारं देवपादं परितश्चतुरङ्गुलं षडंगुल मष्टांगुलं वा देहलब्धांगुलेन नीत्वा तद्दू(द्धऊ)र्ध्वषोडशदलै र्युक्तं कारयेत्। तस्मादेकांगुलहीनं देव्योःपीठंकारयेत्। अथवा कौतुकस्यार्चापीठस्य पश्चिमभागं देवमानुषपैशाचपदांत पीठोत्सेधमानेन समस्थलंकृत्वा तदूर्ध्वं देवीभ्यांसह देव यथोक्तदेशे संस्थाप्य तत्स्थलेकौतुकादीन् संस्थापयेत

(योगासनस्योत्तमत्वादिकम्)

अथयोगस्थानंवक्ष्ये — देवं श्वेताभं चतुर्भुजं पीत वाससं जटामौलिं श्वेतपद्मेसमासीनम् ऊर्ध्वस्थदक्षिण पादं अधस्ताद्वामपादम्, अङ्कविन्यस्तवामकरं शंखचक्र हितापरभुजं श्वेतवस्त्रोत्तरीयं सोपवीतं कुण्डलाङ्गदहा राद्याभरणान्वितम् ईषन्निमीलितलोचनंच भित्तिपार्श्वे दक्षिणेब्रह्माणम् उत्तरेशंकरम् ऊर्ध्वभागेचन्द्रादित्यौ सन कसनत्कुमारौ कौतुकादक्षिणवामयोर्भृगुमार्कंडेयौ तथ महिमार्कंडेयौवा कारयेत्, एतदुत्तमंयोगासनम् ॥

चन्द्रादित्याभ्यां सनकसनत्कुमाराभ्यां हीनं मध मम्, भृगुमार्कंडेयाभ्यांहीनमधमम् ॥

(भोगाऽऽसनस्योत्तमत्वादिकम्)

देवं सिंहासनेसमासीनं श्यामाङ्गं चतुर्भुजं शं चक्रधरम् अभयवरदक्षिणहस्तं स्वाङ्गकटिविन्यस्तसिं कर्णवामहस्तं प्रसारितदक्षिणपादं कुञ्चितवामपादं दक्षि णेश्रियं देवीं वामपादमाकुञ्च्य दक्षिणंप्रसार्य सिंहासनेस मासीनां वामपार्श्वेमहींदेवीं दक्षिणंपादंआकुंच्य वा प्रसार्य सिंहासनेसमासीनाम् एतयोर्वामदक्षिणकरौ पद्

त्पलधरो अन्यो सिह्मासनेनिहितो सिह्मकर्णोवा तद्विपरीतो वा देवं देव्यो रन्तरभागं तालं यवद्वयं तत्तुरीयांशाधिकं हीनंवा दक्षिणोत्तरयो ब्रह्मशङ्करौ तथाऽऽसीनौ भृगुमार्क डेयौच एकजानुक्रमेणाऽऽसीना वन्यत्सर्वभोगस्थानक वत्, अपरभित्तिपार्श्वे मायासंङ्गादिनीभ्यां व्याजिनीभ्यां तुंवुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां सन कसनत्कुमाराभ्यां सूर्यचंद्राभ्याम्, एवंक्रमेण समायुक्त मुत्तमम् ॥

भोगासनं तुंवुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्ष विद्याधराभ्यां हीनं मध्यमम्, सनकसनत्कुमाराभ्यां आ दित्यचंद्राभ्यां पूजकमुनिभ्यांहीनमधमम् ॥

(वीरासनस्योत्तमत्वादि)

सिह्मासनोपरिष्टात्पद्मासने वामपादंसमाकुंच्य दक्षिणंकिंचित्प्रसार्य समासीनं चतुर्भुजं शंखचक्रधर मभयदक्षिणहस्तं सिह्मकर्णवामहस्तं प्रवालाभं श्यामांवर धरं पूजकस्थाने दक्षिणेश्रियं देवीं वामेमहींदेवी मेकजा नुक्रमेणासीने दक्षिणेब्रह्माणं मनुंच वामेशंकरंभृगुंच रत्तिंवाणींच चामरधारिण्यौचकारयेत्। सनक सनत्कुमा राभ्यां तुंवुरुनारदाभ्यां सहितम् उत्तमं वीरासनम्।

तुंवुरुनारदाभ्यां सनकसनत्कुमाराभ्यां व्याजिनी भ्यां हीनं मध्यमम्, ब्रह्मशंकराभ्यां सूर्यचंद्राभ्यां पूजक स्थाने देवीभ्यां हीनमधमम्।

(आभिषारिकासनस्योत्तमत्वादि)

देवं वेदिकासनेसमासीनं चतुर्भुजं द्विभुजं नीलाभं श्यामवस्त्रधरं तमोगुणान्वित मूर्ध्वनेत्रं देव्यार्द न्विना लक्षणहीनेविमाने शत्रुदिङ्मुखे कृष्णाष्टम मग्न्याद्यनुक्तनक्षत्रे शर्वर्यां चरराशौ गर्भालये पैशाचप स्थापयेत्, एतदाभिचारिकासनंभवति ॥

सिंहासनोत्सेधं द्वारोत्सेधं वेरोत्सेधं वा द्वादशभा कृत्वा षडंश मुत्तमम्, पञ्चांशंमध्यमम्, चतुरंशमधमम् द्विपञ्चाशदङ्गुलमुत्तमम्, षट्चत्वारिंशदङ्गुलंमध्यमम् चत्वारिंशदङ्गुलमधमम् ॥

(पद्माऽऽसनम्)

सिंहासनस्यतुरीयांशंपद्मासनस्योत्सेधं षडंशंकृ एकांशंतदाधारं कंपं त्र्यंशम्अधोदलंत्र्यंशम् ऊर्ध्वत मूर्ध्वाधः शतपत्रैस्संयुक्तं एवंपद्मासनंख्यात् ॥

(पद्मसिंहासनम्)

सिंहासनस्योत्सेधं त्रयोविंशतिभागंकृत्वा एक पादुकं दळमेकांशं कंपमेकांश चतुरंशाजगती एक पद्मं (धृ) ध्रुगेकांशं एकांशंदळं त्र्यंशंकुमुदम्, अंबुज कांशम् एकांशंकंपं चतुरंशंकंठं सिंहैर्युक्तं तदूर्ध्वेचैक कंपं पद्ममेकांशं दूव्यंशा महापट्टिकाचेत्येतत् पद्मसिं सनंख्यात् ।

देवं श्यामाभं चतुर्भुजं शंखचक्रधरं सव्यहस्तं शिरोपधानंकृत्वा वामहस्तंप्रसार्य शयानं पादपार्श्वेश्री भूमिभ्यां पादमर्दिनीभ्यां मधुकैटभाभ्यां संयुक्तं कौतुका दक्षिणेमार्कण्डेयं वामेभृगुं तदक्षिणेभित्तिपार्श्वेचा (नाभि पद्मेसामा) सीनंब्रह्माणं पञ्चायुधान् गरुडं चंद्रादित्यौ सप्तर्षीन् द्वादशादित्यान् एकादशरुद्रान् जयाद्यप्सरस स्तुंबुरुनारदौ सनकसनत्कुमारौ ब्रह्मेशौच कारयेत्। एत दुत्तमंवीरशयनम्, रुद्रैरादित्यैरप्सरोभिश्चविनामध्यमम्, किंन्नरमिथुनाभ्यांसनकसनत्कुमाराभ्यां पूजकमुनिभ्यां हीनमधमम् ॥

(आभिचारिकम्)

शेषंलक्षणहीनं द्विफणंद्विवलयमनुन्नतशिरः पार्श्वं देवंनीलाभंद्विभुजंचतुर्भुजं वा समशयनंमहानिद्रासमा-युक्तंशुष्कूवक्त्रंशुष्काङ्गं श्यामवस्त्रधरंसर्वदेवैर्विहीनं कार येत्। एतदुत्तममाभिचारिकंशयनम्, एकफणम्, एक-वलयंमध्यमम्, सर्पदेहंविनासमस्थलशयनमधमम् ॥

(अनन्तशयनलक्षणम्)

अनन्तस्योत्सेधं बेरायामं द्वारोत्सेधंवा त्रिधाकृत्वा एकांशंमध्यमम्, तदष्टांशाधिकमुत्तमम्, तदष्टांशोनमध मम्, षट्त्रिंशदंगुलमुत्तमम्, त्रिंशदङ्गुलं मध्यमम्, चतु-

र्विंशत्यङ्गुलमधमम् शिलालये, शिलाभिः मृण्मये इष्ट्र भिः कुर्यात्। तस्योत्सेधमष्टधाकृत्वा द्विभागंशिरोभागे तन्मध्यानतं त्र्यङ्गुल मेवंयोगशयनस्यकारयेत्। उत्से षड्भागंकृत्वा द्विभागंशिरोभागोच्चं तन्मध्यानतंपञ्चांगु मेवंभोगशयनस्य कारयेत्। उत्सेधंसप्तधाकृत्वा द्विभा शिरोभागोच्चं तन्मध्यानतं चतुरङ्गुल मेवंवीरशयनस्यक येत्। त्रिपंचसप्तवलये स्तल्पितंकृतं (तल्पीकृतं) स्यात फणान् सप्त पञ्च नवच हेमाभान् समाहितान् अधस्च्छेतवर्णं मकुटोपरिसं छाद्य स्थितान् व्यालसिंहमुखा शृंगमध्येशिखामणिंच कुर्यात्। तेषामुत्सेधं शयनोत्से मनंतस्यव्यास देवसुभयोः पार्श्वयोः पादेच यथोचितंस्या एवंशयनंपरिकल्पयेत् ॥

(ब्रह्मादीनां स्थानप्रमाण वर्णादि निर्णयः)

नाभिसूत्राद्दक्षिणेचोपरिष्टाध्दस्तमात्रे भित्तिमा श्रित्य नाभ्यंबुजंस्यात्, तद्विस्तारमष्टादशाङ्गुलं तदश शोन मूर्ध्वदल विशालमधोदलनतं चतुरङ्गुलं ऊर्ध्वदळनतं त्रिमात्रं कर्णिकायुतम्, ऊर्ध्वाधः शतपत्रैर्युक्तं नाळमध्य र्धाङ्गुलपरिणाहं नालस्यदक्षिणे तद्दक्षिणेच बालाऽबाल पर्णयुतं बालपर्णस्य विशालं तत्पद्मोर्ध्वदळविशाल समस्, इतरपरपर्णविशालं मधोदळ विस्तृतसमं तयोर्नाळं एकां गुल परिणाहं कुर्यात्। तत्पद्मकर्णिकामध्ये ब्रह्माणं चतु

(द्वितीयावरणेनवग्रहाणां चतुर्नामादिकं)

द्वितीयावरणेप्राग्द्वारादुत्तरे पश्चिमाभिमुखो रक्तवर्णः शुक्लांबरधरो द्विभुजः पद्महस्त स्सप्ताश्ववाहनो हयध्वजो रेणुकासुवर्चलापतिः खकारबीजोऽब्धिघोषणरव स्सहस्रकिरणो मण्डलावृतमौलिः श्रावणेमासिहस्तजः आदित्यः 'आदित्यंभास्करंसूर्यमार्त्तांडंविवस्वंत' मिति।

तद्दिगीशस्यदक्षिणे पश्चिमाभिमुखः श्वेताभो रक्तांबरधरो द्विभुज इक्षुचापभृत् मंडलावृतमौलिः हिरण्मयोऽष्टाश्ववाहनः कुलीरध्वजो हंसरवो रोहिणीशः सकार बीज स्सौम्यज श्चंद्रो 'वसिष्ठंसोमंयज्ञांगंइंदुमतिंचंद्र' मिति।

दक्षिणेच उत्तराभिमुखो बंधूकवर्णो नीलांबरधरः शक्तिपाणिः शरभध्वजः शुकजुष्टापतिः अश्वनीजातः अश्ववाहनः शंखरवो नामाद्यक्षरबीजः अङ्गारक 'अंगारकं वक्रंरक्तंधरासुत' मिति।

तस्यपश्चिमेच उत्तराभिमुखः श्यामवर्णो रक्तांबरधरो द्विभुजो रथवाहनः सिंहध्वज शंखरवो नामाद्यक्षरबीज स्सुशीलापतिः श्रविष्ठाजातोबुधो 'बुधंश्यामंसौम्यं श्रविष्ठाज' मिति॥

(गुरोः)

पश्चिमे दिग्गीशस्यदक्षिणे प्राङ्मुखः पीताभः श्यामांबरधरो दर्भहस्तः पूरितमकुटः कृष्णाजिनधरः कुध्वजो हंसवाहनः तिष्यज स्तारापतिः नामाद्यक्षरबीजः बृहस्पतिः 'पीतवर्णं गुरुंतैष्यंबृहस्पति' मिति॥

(शुक्रस्य)

तस्योत्तरे प्राङ्मुखो रजतवर्णो वल्कलांबरधरः जिनजटाधरो मेघवाहनः स्रुवध्वजो रोहिणीजो नाद्यक्षरबीज स्सुमदापतिः शंखरवः शुक्रः 'शुक्रंभार्गव्यंपरिसर्पण' मिति।

(मंदस्य)

उत्तरे दिग्गीशस्यपश्चिमे दक्षिणामुखः अञ्जनद्विभुजः कुशचीरांबरधरो रेवतीजःकुमुदापतिः वराहवाहनः शंखरवो नामाद्यक्षरबीजो मन्दः 'सूर्यपुत्रो रेवत्यंशनैश्चर' मिति।

(राहोः)

तत्प्राच्यां दक्षिणामुखः श्यामाभो जपाम्बरद्विभुजो नागचूलिकमस्तकः पाशायुधो मण्डलावृतः श्यामसर्पध्वजवाहना आश्लेषाजो जरापतिः नामाद्यक्षरबीजो राहुः 'राहुं दैतेयमुरगेशंग्राहक' मिति॥

(केतोः)

प्राच्यां पश्चिमाभिमुखो धूमवर्णः श्वेतांबरधरो नारीशः अन्यत्सर्वं राहोरिव केतुः 'केतुंकृण्वं रौद्रंप्रकाशिन'मिति। यद्दिग्द्वारं तद्दिग्द्वारपार्श्वे अर्चयेत् ॥

(तृतीयावरणे गङ्गादीनां चतुर्णामादि.)

तृतीयावरणे प्राग्द्वारदक्षिणे पश्चिमाभिमुखा द्विभुजापीतांबरधरा श्वेताभा कृष्णकुंचितमूर्धजा हृदये अञ्जलिसंयुक्ता रेवतीजा गकारबीजा कूर्मध्वजवाहना शंखरवा गङ्गा 'नळिनींजाह्नवीं गङ्गांलोकपावनी' मिति ॥

(यमुनायाः)

दक्षिणेचोत्तरामुखा श्यामवर्णा रक्तवस्त्रधरा पीनस्थनी कृष्णकुञ्चितमूर्धजा द्विभुजा पुष्पहस्ता परपुष्टरवा मत्स्यवाहनकेतुका मूलजा यमाद्यक्षरबीजा यमुना 'यमुनां स्थपिकांनदीवरांपावनी' मिति ॥

(नर्मदायाः.)

पश्चिमे रक्ताभा प्रङ्मुखा श्वेतवस्त्रधरा सुखासीना द्विभुजा पुष्पमालाधरा कूर्मध्वजवाहना जलजकुक्कुटरवा अश्विनीजाता. नद्याद्यक्षरबीजा नर्मदा 'नर्मदांनदीवरां विद्युद्रूपां विशाला' मिति ॥

(सिन्धोः)

उत्तरे दक्षिणामुखा कृष्णश्वेताभा पुष्पवस्त्रधरा पद्महस्ता द्विभुजा उद्बद्धकेशी पौष्णजा जलघोषरवा मक

रध्वजवाहना सिताद्यक्षरबीजा सिन्धुः 'सिन्धुं नदीवं मृद्वङ्गींसाधना' मिति ॥

(दुर्गायाः)

प्राग्द्वारादुत्तरे श्यामवर्णा सिताम्बरधरा अष्टभु चतुर्भुजावा शंखचक्रधरा सर्वाभरणसंयुक्ता कक्ष्याब घनस्तनी कृत्तिकोद्भवा घण्टारवा नामाद्यक्षरबीजा रि ध्वजवाहना दुर्गा 'दुर्गांकात्यायनीं वैष्णवीं विन्ध्यवासि मिति ॥

(सरस्वत्याः)

आग्नेय्यां रक्तवर्णा श्वेतवस्त्रधरा चतुर्भुजा अ माला कमंडलुज्ञानमुद्रापुस्तकयुता हंसवाहना ना द्यक्षरबीजा अश्विनीजाता प्रणवरवा सिद्धिः 'सिद्धिवि भृगुपत्नीं सरस्वती' मिति ॥

(श्रियः)

नैर्ऋत्यां श्रियंपूर्ववत् ॥

(ज्येष्ठायाः)

वायव्यां रक्ताभा पुष्पांबरधरा पीनस्तनी पु निधिभाजनधरा दक्षिणे पीतगदाधरा,रूप(भ)युतावा नीलपरीतांगी मौञ्जलिकाश्रियुता ज्येष्ठानक्षत्रजाता स युक्ता श्यामांबरधरा रथवाहना काकध्वनियुता काकध्व नामाद्यक्षरबीजा ज्येष्ठा 'भूर्ज्येष्ठायिनींभुवर्ज्येष्ठायिनीं ज्येष्ठायिनीं कलिराजायनीं कलिपत्नी' मिति ॥

(धात्र्याः)

ऐशान्यां रक्ताभा श्यामाम्बरधरा उग्रनयना महा रौद्री दंष्ट्राभ्यामलंकृता वालमौल्युत्तरासंगा त्रिशूला षड् भुजा भ्रूभङ्गविकटा कपालपाशहस्ता रक्तकुंचितमूर्धजा अट्टहाससहिता अवग्रपीठसमासीना डमरुकध्वनियुता नामाद्यक्षरबीजा पिशाचध्वजवाहना आर्द्रानक्षत्रजाता धात्री 'धात्रींमहोदरींरौद्रींमहाकाली' मिति ॥

(सुरायाः)

अन्तराले प्राच्यां पश्चिमाभिमुखा रक्तवर्णा जपां वरधरा पुष्पहस्ता ललाटोपरिपुष्पचूडा कृष्णकुंचित-मूर्धजा वीणावेणुरवा स्वात्युद्भवा कपोतध्वजवाहना सुरा द्यक्षरबीजा सुरा 'सुरांसुमुखीं विद्युद्रूपांसुभगा' मिति ॥

(सुन्दर्याः)

तद्दक्षिणे पश्चिमाभिमुखा कनकाभा सितांवरधरा पुष्पहस्ता द्विभुजा कृष्णकुंचितमूर्धजा वीणावेणुरवा स्वात्युद्भवा हंसध्वजवाहना नामाद्यक्षरबीजा सुन्दरी 'सुन्दरीं विशालां पद्माक्षींपद्मवर्णिनी' मिति ॥

(स्वाहायाः)

दक्षिणेचउत्तराभिमुखा रुग्माभा रक्तवस्त्रधरा पुष्पहस्ता द्विभजा कृष्णकुंचितमूर्धजा हंसरवा विशाखा-जाता नामाद्यक्षरबीजा स्वाहा 'स्वाहांशुभाङ्गींमृद्वङ्गीं साधना' मिति ॥

(स्वधायाः)

तत्पश्चिमेच उत्तराभिमुखा सितश्यामा कृष्णा म्बरधरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा शुव ध्वजवाहना नामाद्यक्षरबीजा अग्निरवा याम्येजा स्वध 'स्वधांसमृद्धिं कुलवर्धिनीं सन्नति' मिति ॥

(संहादिन्याः)

पश्चिमे प्राङ्मुखा कनकाभा सिताम्बरधरा पुष्प हस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा वीणावेणुरवा हंसध्व वाहना मूलोद्भवा नामाद्यक्षरबीजा संहादिनी 'संहादिन वरारोहांमायाङ्गींसुदवर्धिनी' मिति ॥

(राकायाः)

उत्तरे दक्षिणाभिमुखा हेममिश्रसिताभा रक्ताम्ब धरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा वीणावेणुर हंसध्वजवाहना मूलोद्भवा नामाद्यक्षरबीजा अभिजिज्ज ता राका 'राकांसुरूप्यां रत्नाङ्गीं वरानना' मिति ॥

(सिनीवाल्याः)

तत्पूर्वे दक्षिणाभिमुखा सितश्यामा शमीपुष्पनि भाम्बरधरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा घ स्तनी पृथुश्रोणी हंसध्वजवाहना शुकस्वररवा अभिजि ज्जता पुण्याद्यक्षरबीजा सिनीवाली 'सिनीवालीं हितग गभस्तिनीं पुण्यदा' मिति ॥

(हवीरक्षकस्य)

पचनालयेच उत्तराभिमुखः कृष्णवर्णः शुक्लाम्बरधरो विकटकक्षू श्शूलपाणिः कुशेशयाक्षो नामाद्यक्षर बीज स्सुरगणेशः शङ्खरवोऽश्ववाहनः सिंहध्वजो रोहिणीजो हवीरक्षको 'हवीरक्षकम् आग्नेयंपचनंशैलूप' मिति ॥

(पुष्परक्षकस्य)

पुष्पसंचयस्थाने पश्चिमाभिमुखः कनकवर्णः श्यामाम्बरधरो गजवाहनः पुष्पध्वजो रेवतीज श्शाङ्खरवः शुद्धाङ्गीशो नामाद्यक्षरबीजः पुष्परक्षकः 'पुष्परक्षकं हरितम् अधिवासं फुल्ल' मिति ॥

(पुरुषस्य)

स्नानोदकसञ्चयस्थाने पुरुषंपूर्ववत् ॥

(स्रोताधिपस्य)

प्लोतवस्त्रोत्तरीयादिसंचयस्थाने हेमाभः शुक्लपिंछांबरधरः चतुर्भुजः कलशाक्षमालापाणिः जटाधरो हंस वाहनो रूपाद्यक्षरबीज स्सावित्रीपतिः अभिजिज्जातः कमण्डलुध्वजो हुङ्काररवः त्वष्टा 'त्वष्टारं रूपजातंनिधिजं स्रोताधिप' मिति ॥

(शयनस्थानेगदायाः)

शयनस्थाने पश्चिमाभिमुखा हेमाभा रक्ताम्बरधरा पद्महस्ता द्विभुजा शिरसिगदाधरा सिंहध्वजवाहना घोररवा श्रविष्ठाजा गकारबीजा गदा 'गदांकौमोदकींपुण्यां प्रबला' मिति ॥

(चामुण्डस्य)

हविर्द्रव्यादिसञ्चयस्थाने पश्चिमाभिमुखो मेघवर्णः श्वेताम्बरधरो विकटदंडपाणिः भूतभावनः शूलध्वजो नामाद्यक्षरबीजः कुंभशब्दरवः रुद्रेशः आर्द्राजातः चामुंडः 'सर्वेश्वरंजगन्नाथं चामुण्डंसर्वतःश्वर' मिति ॥

(बलिरक्षकस्य)

होमस्थाने पश्चिमाभिमुखः श्यामवर्णः पीतांबरधरो द्विभुजो दण्डायुधो रथवाहनः सिंहध्वजो नाद्यक्षरबीजः शंखरवः श्रविष्ठाजः सुमनसापतिः बलिरक्षको 'बलिरक्षकंदण्डं सर्पजंसम'मिति ॥

(तुर्यावरणदेवेषुगविष्ठस्य)

चतुर्थावरणेप्राग्द्वारोत्तरे खड्गसंकाशः पीतवासा दण्डपाणिः खगध्वजो रथवाहनः सत्यलोचनापतिः श्रवणजो नामाद्यक्षरबीजो नाग(द)रवो गविष्ठो 'गविष्ठं त्रैष्टुभंगुह्यमाकाश' मिति ॥

(हरिण्याः)

द्वारदक्षिणे पूर्ववत् हरिणीम् ॥

(तोयस्य)

पश्चिमे प्राङ्मुख उत्पलाभः शुक्लपिंछांबरधरः पाशभृत् गजवाहन सिंहध्वजः पकारबीजो दुर्दुरश्शङ्ख कनकाधिपति स्तोयः 'पवित्रमस्तंतोयंगोवर' मिति ॥

चित्रार्धं, माभासंवा, संकल्प्याऽभिमुखे तत्तत्कौतुकंच संन्यस्याऽर्चयेत्॥

(मत्स्यस्य चतुर्नामादि)

पूर्वद्वारोत्तरे मत्स्यरूपं श्वेताभं रक्ताख्यं रक्तनेत्रं कृष्णपक्षयुतं संकल्प्य अभिमुखे कौतुकं चतुर्भुजं संन्यस्य 'मत्स्य प्रळयसंहारं स्रष्टारं वेदमय' मिति॥

(कूर्मस्य.)

तद्दक्षिणे कूर्मरूपं श्वेताभं पञ्चवर्णयुतं संकल्प्याऽभिमुखे कौतुकं चतुर्भुजंसन्यस्य 'कूर्मरूपं सुधाकारं महाशक्तिं महाबल' मिति॥ मत्स्यकूर्मयोर्वाहन केत्वादीन् आदिमूर्त्तेरिव समाचरेत्॥

(वराहस्य)

दक्षिणेवराहं पूर्ववत्संकल्प्याभिमुखे कौतुकं चतुभुजं विष्णुरूपं समर्चयेत्॥

(नृसिंहस्य)

पश्चिमे नृसिंहः ाङ्मुखः सिंहासनोपरि द्वौपादौ व्यत्यस्य उत्कुटिकमासीनो बद्धयोगपट्टिक श्चतुर्भुजः शङ्खचक्रधरो जानूपरि प्रसारितहस्तः भवेदेषविशेषःअन्यत्सर्वं पूर्ववत् कौतुकंतद्रूपं, चतुर्भुजं विष्णुरूपंवा, संकल्प्यार्चयेत्॥

(वामनस्य)

उत्तरे वामनंपूर्ववत संकल्प्यकौतुकं चतुर्भुजं कृत्वार्चयेत्॥

(परशुरामस्य)

आग्नेयां परशुरामः पश्चिमाभिमुखः उत्तराभिमुखोवा रक्ताभः श्वेतांबरधरो दक्षिणकरेण परशुधरः श्यवामकरो जटामकुटयुतः सोपवीतः कमलशः,अन्यत्सर्वं आदिमूर्तिरिव 'राममृषिसुतं विष्णुं परशुपाणि' मिति।

तद्देव्याः कमलायाः

तद्दक्षिणे कमलांसीतावत्कारयेत्॥

(राघवस्य)

नैर्ऋत्यां राघव उत्तराभिमुखः, प्राङ्मुखोवा, माभो रक्तांबरधरो मकुटादि सर्वाभरणयुक्तः श्रीवत्सवद्विभुजो दक्षिणकरेण शरधरो वामकरेण धनुरालंब्य भङ्ग्यास्थितो माघमासे? पुनर्वसुजातःसीतानाथोऽन्यत्आदिमूर्त्तेरिव 'रामंदाशरथिं वीरंकाकुत्स्थ' मिति॥

(सीतायाः)

तद्दक्षिणे सीता हेमाभा शुक्लांबरधरा धृतवामहस्ता प्रसारित दक्षिणकरा सुस्थितदक्षिणपादा, कुञ्चितपादा उद्वद्धकुन्तळा करंडकामकुटियुतावा ल अक्षरबीजा अन्यत्सर्वं श्रीवत्, 'सीतामयोनिजां ल वैदेही' मिति॥

(लक्ष्मणस्य)

वामे सौमित्रिः कनकाभः श्यामांबरधरो द्विभुजो रामवत् त्रिभङ्गस्थित श्चापधर उद्बद्धकुंतळो वैशाखे? रोहिणीजातो लक्षाद्यक्षरबीजोऽन्यत्सर्वं रामवत्, 'रामानुजं सौमित्रिं लक्ष्मणं लक्ष्मीवर्धन' मिति ॥

(भरतस्य)

दक्षिणभागे भरतः श्यामाभो रक्तांबरधर उद्बद्ध कुंतलः शरचापौ, खड्गखेटकौवा, दधानो द्विभुजः त्रिभङ्ग स्थ श्चैत्रे? स्वात्युद्भवोऽमलेशो भगाद्यक्षरबीजो श्रीवत्स कौस्तुभौ विना अन्यत्सर्वं रामवत् 'भरतं कैकेयं रामानुज धर्मचारिण' मिति ॥

(शत्रुघ्नस्य)

वामे शत्रुघ्नो हेमाभो रक्तांबरधरः उद्बद्धकुंतळो ज्येष्टमासे? धनिष्टाजातो नामाद्यक्षरबीजो निर्मलेशःअन्यत्सर्वं लक्ष्मणवत्, 'रामप्रियं शत्रुघ्नं विजयं भरतानुज' मिति ॥

(हनुमतः)

दक्षिणे पुरतोऽञ्जनाभः श्वेतवस्त्रधरः कपिरूपः सर्वाभरण षितः द्विभुजः दक्षिणहस्तेनाऽऽस्यंपिधाय वामहस्तेनवस्त्रंपिधाय अवनतगात्रस्थितो वार्ताविज्ञापन परो मृ॰वाहनो दण्डध्वजो महानादरवः श्रावणेमासि

श्रवणजातः कल्पाद्यक्षरबीजो हनुमान् 'कपिराजं हनुमन्तं शब्दराशिं महामति' मिति ॥

(शरस्य)

दक्षिणेशरं नपुंसकं श्यामाभं श्वेतांबरधरं त्रिणे(ने)त्रं रौद्रं समुद्रघोषरवं वायुवाहनं पक्षध्वजं शिरसिशरं माघमासे वारुणेजातं शराद्यक्षरबीजं शरं 'शरं महारवं अमोघं तीक्ष्णधार' मिति ॥

(शार्ङ्गस्य)

वामेशार्ङ्गं पूर्ववत् ॥

(सुग्रीवस्य)

दक्षिणे सुग्रीवः श्वेताभो रक्तांबरधरो रक्तवसनो द्विभुजः प्रांजलिः पादावनतयुक्तो मृगध्वजवाहनो वैशाखे आश्लेषाजो मेघनादरवः सुराद्यक्षरबीजः तारेशः सुग्रीवं सुन्दरं महाबल मर्कसूनु' मिति ॥

(विभीषणस्य)

वामे कृष्णवर्णो रक्तांबरधरो रक्तकेश स्सुदंष्ट्रो द्विभुजः शूलधरो हृदयेअञ्जलिसंयुक्तो शूलजो मेघध्वज वाहनो मेघनादरवो विशुद्धेशो विद्याद्यक्षरबीजो विभीषणो 'विभीषणंराक्षसाधिपं सुमनस्कंरामप्रिय' मिति ॥

(अङ्गदस्य)

अभिमुखे श्वेताभोरक्तांबरधरो रक्तवदनो द्विभुजः प्रांजलिः पादावनतास्थितः सिंहध्वजवाहनः सिंहरवो

वोशाखेरोहिणीजोऽङ्गदः 'अङ्गदंवालिपुत्रं रामप्रियंदेवभक्त' मित्यर्चयेत् ॥

(बलभद्रस्य)

वायव्ये बलभद्ररामः श्वेताभः नीलवस्त्रधरोद्विभुजोदक्षिणहस्तेनाऽवलम्बितमुसलो वामेनहलधरः त्रिभंगास्थितउद्बद्धकुंतलः अन्यत्सर्वम् आदिमूर्त्तेरिव 'रामं, यदुवरं, विष्णुं, हलायुध' मिति ॥

(कृष्णस्य)

ऐशान्यां कृष्णः पश्चिमामुखो, दक्षिणामुखोवा, श्यामाभो रक्तांवरधर स्सर्वाभरणभूषितः सौन्दर्ययुक्तः कुन्तलयुक्तः वर्हिबन्धयुतः त्रिनतो द्विभुजो दक्षिणहस्तेन क्रीडायष्टिधरो वामकूर्परेण सत्यभामाङ्करूढंवाऽऽलंब्य सुस्थितः क्रीडारससमाविष्टो रुक्मिणीसत्यभामयोरीशः श्रावणेमासिरोहिणीजातोऽन्यत्सर्वम् आदिमूर्त्तेरिव 'कृष्णं,पुण्यनारायणं,वटपत्रशायिनं, त्रिदशाधिपमिति' ॥

(रुक्मिण्याः)

दक्षिणेरुग्माभा शुक्लांम्बरधरा धम्मिल्लकुन्तला, उद्बद्धकुन्तलावा, नामाद्यक्षरबीजा अन्यत्सर्वश्रीरिव रुक्मिणी 'रुक्मिणीं, सुन्दरीं, प्रकृतिं कृष्णवल्लभा' मिति ॥

(सत्यभामायाः)

वामे सत्यभामा धम्मिल्लकुन्तला उद्बद्धकुन्तलावा, नामाद्यक्षरबीजा अन्यत्सर्वमहीवत् सत्यभामा 'सत्यभामां, सतीं, सन्नतीं, क्षमा' मिति ॥

(गोपीनाथस्य)

दक्षिणे रक्ताभः श्वेतांवरधरो वंशहस्तो माधमासि वारुणेजातो हयध्वजवा नो हंसरवो गोपीनाथो गवाद्यक्षरबीजो गोपालो 'गोपालं, सर्वनाथं, कृष्णं, सर्वाध्यक्ष' मिति ॥

(श्रीदाम्नः)

वामे श्रीदामा श्यामाभः श्वेतांवरधरः द्विभुज अंजलिसंयुक्तः प्रौष्ठपदेपूर्वाषाढाजो नामाद्यक्षरबीजः अश्वध्वजवाहनो वेणुरवो गोपीनाथः 'श्रीदामानं, पुण्यरूपं पुण्यात्मकं, देवसख' मिति ॥

(सुन्दरस्य)

प्रमुखे गरुडांश स्सुन्दरो विहगाद्यक्षरबीजोऽन्यत्सर्वंगरुडवत् 'सुन्दरं, विहंग, पतङ्गं, तार्क्ष्य' मिति समर्चयेत् ॥

(कल्किनः)

पश्चिमेचोत्तरभागे कर्की हयाननः अन्यत्सर्वमादिमूर्त्तेरिव समाचरेत् ॥

(कौतुकस्य)

अभिमुखे कौतुकंचतुर्भुजं संस्थाप्यार्चयेत् ॥

(प्रादुर्भावानां अनुकल्पम्)

प्रादुर्भावानां प्राकाराभ्यन्तरे विस्तीर्णे मनोरमेदेशे विमानं, मण्डपं, कूटंवा, कृत्वा ध्रुवबेरं चित्रं, चित्रार्धं

पूर्वं मत्स्यस्य देहलब्धांऽगुलेन भागाधिकं द्वितालं, नासाग्रात्पुच्छपर्यन्तं,नासाग्रान्नेत्रद्वयान्तं चतुरंगुलं, नेत्रा त्कर्णाद्विमात्रं, तस्मात्पुच्छमूलं त्रिषडंगुलं, तस्मात्पुच्छाग्रं चतुरंगुलं,कुक्षिपुच्छविस्तारकर्म ग्रहवेदांऽगुलं,तत्तत्त्रिगु णपरिणाहंपुच्छमध्यविष्कंभम्,एकांऽगुलमग्रविस्तारं,षडं गुलं, मात्राद्यर्धमात्रं, पक्षायामविस्तारं, तस्यायामं सप्तां शंकृत्वा, द्व्यंशं त्र्यंशंवा पीठोत्तुंगंसप्तांगुलाविस्तारं सम वृत्तं पद्माकारम्। अत्रानुक्तं शिल्पशास्त्रोक्तवत्। एवं ध्रुव बेरं कारयेत्।

कौतुकंविष्णुं चतुर्भुजमेवकारयेत्। तद्रूपं नकारयेत्।

(अथ प्रतिष्ठा)

अथ(अस्य)प्रतिष्ठाविशेषंवक्ष्ये - तदालयाभिमुखे पूर्ववद्यागशालांकृत्वा; तोरणाद्यैरलंकृत्य; पञ्चाग्नीन् पौण्डरीकाग्निंच कारयित्वा ; तस्यप्रधानं पौंडरीकाग्नि स्तस्मिन्नहौत्रशंसनंकृत्वा ; 'मत्स्यं विष्णुं भद्रं क्रीडात्मक' मिति चतुर्भिर्मंत्रैरावाह्य; निरूप्य; आज्याहुतीर्हुत्वा; 'यद्वयंसृष्ट' (वै०म०प्र०) मिति मंत्रेणाऽष्टोत्तरशतंहुत्वा; अन्यत्सर्वंप्रतिष्ठोक्तविधिना कारयेत्।

नित्यार्चनायांध्रुववेरं मूर्तिमंत्रैरष्टोपचारैरभ्यर्च्य, कौतुकंपूर्वोक्तषोडशोपचारमंत्रैः मूर्त्तिमंत्रान् संयोज्य अर्च येत्। स्नपनोत्सवादीनिसर्वाणिपूर्वोक्तविधिना कारयेत्।

अथ कूर्मस्यलक्षणंवक्ष्ये देहलब्धांगुऽलेन एकांगुलं शिरोमानं, द्विमात्रंकण्ठं (कर्णं) एकांऽगुलं, त्र्यंगुलं हृद यान्तं, तत्समं नाभ्यन्तं, त्रिमात्रंपृष्ठान्तं, प्रकोष्ठं पाणि तलं प्रत्येकमेकांऽगुलं, तथैवोरुजंघापादतलं, तस्याऽऽ यामसमं वैपुल्यं, पञ्चवर्णसमायुक्तं, अंतश्चेतनिभं तस्याऽऽयामं षड्भागंकृत्वा ; द्विभागं त्रिभागंवा पीठोत्तुंग वस्त्यंगुलविस्तारं पद्माकारं, शेषं युक्तंचैवकारयेत्॥

(तत्प्रतिष्ठा)

तस्यप्रतिष्ठाविशेषं वक्ष्ये - पूर्वोक्तयागशालामध्ये शय्यावेदिंपरितः पंचाग्नीन् परिकल्प्य ; गार्हपत्यं प्रधानाग्नौ हौत्रशंसनंकृत्वा ; 'अकूपारं कूर्मरूपं विष्ण वसुधाधर'मितिचतुर्भिः मंत्रैरावाह्य ; तथैव जुष्टाक स्वाहाकारौ कृत्वा; रायामीश' (वै०म०प्र०७)इतिमंत्रेण ऽष्टाधिकशतमावर्त्यजुहुयात् । अन्यत्सर्वंविष्णोरिव माचरेत् । कूर्मस्यकौतुकंविष्णुंचतुर्भुजमेव कुर्यात् तद्रूपं नैवकारयेत्।

नित्यार्चनायां तन्मूर्त्तिमंत्रैर्ध्रुववेरमष्टोपचारैरभ्य र्च्य; कौतुकबिंबं यथोक्तषोडशोपचारमंत्रैः तन्मूर्त्ति मंत्र संयोज्याऽर्चयेत् अन्यत्सर्वंसमानमिति विज्ञायते॥

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाक मत्स्यकूर्मविधिर्नाम पंचपंचाशत् तमः पटलः॥ ५५

(अथपञ्चाशत्तमः पटलः)

अथ वराह स्त्रिविधोभवति आदिवाराहःप्रलयवराहो यज्ञवराह इति। एतेषां मुखं वराहस्येव मूर्धादिपादपर्यन्तं मध्यमदशतालेननयेत्। मूर्धनः केशान्तंचतुर्मात्रं, तस्मा दृगंतंभागं गोणातं रुद्रमात्रं कलायुतंकंठं कंठाध्दयांतं हृदयात् नाभ्यंतं नाभेर्मेढ्रमूलान्तंत्रयोदशांगुलम ऊरु त्रयोदशद्वयं जानुवेदांगुलं जंघोरुसमा तलं भागं तदायामंसप्तदशांगुलं नेत्रं त्र्यंगुलं भ्रूनेत्रतत्सृक्कं भूतांगुलं सृक्काद्वेदांगुलं हनु नेत्रांतरं त्रिमात्रं नेत्रायाम द्व्यंगुलं नेत्राच्छ्रोत्रं सप्तांगुलं कर्णतारं द्वियवं त्र्यंगुलं द्विगुणं तदायामम् एकांगुलविस्तारं मुखम् एकांगुलंनेत्र व्यासं नासामूलविस्तारं सप्तांगुलं तन्मध्येशरांगुलं नासा ग्रंतालं भागार्धमात्रं श्रोत्रं तथैकांगुलं पुरव्यासं अधरं त्रिकलांगुलं निर्गमंमूलतारं भागंतदर्धं तत्याग्र विस्तारं, दंष्ट्रायामं द्विमात्रं कंठतारं नवांगुलं तथैव बाहु मूलविस्तारं१) मध्यम दशतालोक्तमार्गेण कारयेत्॥

(आदिवराहस्य)

आदिवराहं चतुर्भुजं शंखचक्रधरं सत्यश्याम निभं नागेंद्रफणामणिस्थापितदक्षिणपदं रसातलादुत्क मणाय कुंचितवामपादं तदूरौमहींदधानं दक्षिणहस्तेन देव्याः पादौ गृण्हन्तं वामहस्तेन तासुपगूहन्तं मुखेन

देवींजिघ्रन्तं कृत्वा; तांमहीं प्रांजलीकृतहस्तां प्रसारित पादां पुष्पांबरधरां श्यामाभां किंचिद्देवंसमीक्ष्य व्रीलाहर्ष संयुक्तां सर्वाभरणसंयुतां देवस्यस्तनांतं नाभ्यंतांवा पंच तालेन मानेन कारयेत्॥

(प्रलयवराहस्य)

अथवक्ष्येप्रलयवराहं वामपादंसमाकुंच्य; दक्षि णंप्रसार्य; सिंहासनेसमासीनं नीलाभं चतुर्भुजं शंखचक्र धर मभयदक्षिणहस्तं ऊरुप्रतिष्ठितवामहस्तं पीतांबरधरं सर्वाभरणभूषितं कारयित्वा; तस्यदक्षिणे देवींमहीं पादंवाम माकुंच्य, दक्षिणं प्रसार्य आसीनां श्यामाभां सर्वाभरणभूषितां उत्पलधरवामकरां आसनेनिहितदक्षि णकरां किंचिद्देवं समीक्ष्य विस्मयोत्फुल्ललोचनां कारयेत्॥

(यज्ञवराहस्य)

अथ यज्ञवराहं श्वेताभं चतुर्भुजं शंखचक्रधरं वाम पादं समाकुंच्य दक्षिणंप्रसार्य सिंहासनेसमासीनं पीतां बरधरं सर्वाभरणभूषितं कारयेत्।

तस्यदक्षिणे देवींश्रियं हेमाभां वामपादं समाकुंच्य दक्षिणंप्रसार्य आसीनां पद्मधरवामहस्तां आसने निहित दक्षिणहस्तां; वामपार्श्वे महीदेवींसत्यश्यामनिभां दक्षिण पादमाकुंच्य वामंप्रसार्यासीनां उत्पलधरदक्षिणहस्त

आसनानाहतवामहस्तां दर्वांकांचित्समीक्ष्य विस्मयोत्फुल्ल लोचनांकारयेत्॥

त्रयाणांवराहाणां तद्रूपंकौतुकंच बिंबं चतुर्भुजंवा कारयेत्॥

(एषांप्रतिष्ठा)

एषांप्रतिष्ठाविशेषंवक्ष्ये-पूर्ववद्यागशालां सर्वालंकार संयुक्तां तन्मध्येशय्यावेदिं चतुर्दिशं तद्भित्तिसमविस्तारां पादहीनविस्तारां अर्धविस्तारांवा तत्तुरीयांशोत्सेधां तत्प रितः पंचाग्नी॰श्चपरिकल्प्य; सभ्ये प्रधानाग्नौ होत्रशंसनं कृत्वा 'वाराहं वरदं महीधरं वज्रदंष्ट्रिण'मित्यादिवराहस्य; 'गांपृथुगामुर्वी'मितिमन्त्राः ; 'प्रलयवराहं प्रलयहरं भूरिशृङ्गं जगत्रायक'मिति प्रलयवराहस्य; देव्याः पूर्व वत्। 'यज्ञवराहं देवमयं यज्ञेशं यज्ञवर्धन'मिति यज्ञवरा हस्य; श्रीम ोः; पूर्ववत्।

एवमावाहनजुष्टाकारस्वाहाकारा॰श्च कृत्वा;आदि वराहस्यप्रधानाग्नौ 'क्ष्मोमक' (वै०म०प्र०८) मितिमंत्रे णाऽष्टोत्तरशतंहुत्वा; प्रलयवराहस्य 'स्वयमादि' (वै०म० प्र०८) रित्यष्टोत्तरशतंहुत्वा ; यज्ञवराहस्य 'यं यज्ञै' (वै०म०प्र८) रितिमंत्रेणाऽष्टोत्तरशतं जुहुयात् । एष विशेषः अन्यत्सर्वंसमानम् ।

त्रयाणांध्रुववेराणि तत्तन्मूर्त्तिमंत्रैरष्टोपचारैरभ्यर्च्य; पश्चात्केतुकानितत्तन्नाम संयोज्य; षोडशोपचारैरभ्यर्चयेत। स्नपनोत्सवादीनि सर्वाणि पूर्वोक्तवत्कारयेत्।

इति श्रीवैखानसे (मरीचिप्रोक्ते विमानार्चनाक॰ल्पे) वराहविधिप्रतिष्ठानाम षट्पंचाशत्तमः पटलः ॥ ५६॥

(अथसप्तपंचाशत्तमः पटलः)

(नरसिंहलक्षणं तद्द्वैविध्यम्)

अथ नारसिंहविधिंवक्ष्ये-नारसिंहोद्विविधो गिरि जो स्थूणजश्चेति । तयोर्मुखंसिंहस्येव अन्यन्नराकारं। तस्य मूर्धादिपादपर्यंतं सविंशतिशतांगुलं, शिरोमात्राद्वयं ततो नेत्रसूत्राऽन्तं षण्मात्रं तस्माद्घ्राणं चतुर्मात्रं तस्मा दास्यं द्विमात्रं अधरंद्व्यंगुलं नेत्रादध॰ मात्राऽऽयता शेषं ललाटान्तं तारं, नवांगुलंदृगंतरम्, अध्यर्धनवांगुल (त्रि) द्विमात्रं नेत्रायामं तस्यार्धविस्तारं कनीनिकाया मविस्तारंयवं पंचद्व्यविस्तारायामं सितमंडलम् मध्येज्यो तिर्यवं दृष्टिरष्टांशतारं पार्श्वयोरुपरिष्टाच्छ्वेतं शेषंयवत्रय मूर्ध्ववर्म तथाधवतारं अधोगतं यवद्वयं ततोभागायते तत्पुच्छानने भ्रुवौ द्वादशांगुलतारं नेत्रात्सूत्रसमं मुखम् आयतारं दशांगुलंविवरं चतुरंगुलविस्तारं शेषंवर्तुलम् उन्नताश्चत्वारः पुरतोदंता अर्धमात्रविस्तृतायता' जिह्वा षडंगुलायामा द्व्यंगुल विस्तृता भागसूक्तात् कपोलांतं

घोणं चतुष्कलं कर्णमूलां तदधस्तात्कपोलं षडंगुलं अपांगात्कर्णमूलांतं पंचांगुलं कलाकर्णमूलं कर्णं त्रिमात्रार्धायामं चतुर्यवं कलातारं सूकरकर्णवत्रौद्रवक्त्रम् सटायुतं तीक्ष्णेक्षणं अन्यांगायामविस्तारं वराहस्योक्तमार्गेणकारयेत् ॥

(गिरिजस्य लक्षणं)

नृसिंहंदेवं सिंहासने पादंदक्षिणंप्रसार्य; वाममाकुंच्य; समासीनं चतुर्भुजं शंखचक्रधरं कुंदेंदुधवलप्रभं रक्तवस्त्रधरं सर्वाभरणभूषितं करण्डिकामकुटयुतं, पूर्वदक्षिणकरमभयंदानंवा, वामंकट्यवलम्बितमूरुस्थंवा, कारयेत् । तद्दक्षिणे देवींश्रियंवामपादंसमाकुञ्च्य, दक्षिणं प्रसार्यआसीनां पद्मधरवामहस्ताम्, आसनेनिहितदक्षिणहस्तां सुवर्णाभां सर्वाभरण भूषिताम्, वामपार्श्वेमहीं देवीं दक्षिणंपादमाकुंच्य वामंप्रसार्याऽऽसीनामुत्पलधरदक्षिणहस्तां आसनेनिहितवामहस्तां सस्यश्यामाभां सर्वाभरणभूषितां कारयेत् । अथवा नृसिंहमासनस्योर्ध्वे वामं पादंप्रसार्यअन्यमाकुंच्य; तज्जानूर्ध्वे दक्षिणहस्तं गजहस्तवत्प्रसार्य; वाममूरौसन्यस्य; आसीनंशंखचक्रधरं देवीभ्यांसहितं रहितंवा कारयेत् ।

केवलंनृसिंहं देवं पद्मपीठोपरिष्ठात् द्वौपादौ व्यत्ययेनन्यस्य; उत्कुटिकासनेन आसयित्वा ऊरुमध्ये व स्त्रेणा

बध्य; सर्वाभरणसंयुक्तं चतुर्भुजं शंखचक्रधरं अन्यहस्तौ जानूपरिष्ठात्प्रसारितौच कारयेत् ।

(स्थूणजस्य लक्षणम्)

अथ स्थूणजं नारसिंहं सोपाने सिंहासने वामंपादमाकुंच्य; अन्यंप्रसार्य; समासीनं चतुर्भुजं शंखचक्रधरं अभयदानदक्षिणकरं ऊरुप्रसारितवामहस्तं ससटस्कन्धसंयुक्तं तीक्ष्णदंष्ट्रेक्षणं भयानकं श्वेताभं रक्तांवरधरं सर्वाभरणसंयुक्तं कारयेत् ॥

तस्यकोपशांत्यर्थं पार्श्वयोर्दक्षिणवामयोः श्रीमत्यौ, प्रह्लादंवंदमानंच कारयेत् । दक्षिणे नारदंवीणाहस्तं भित्तिं पार्श्वे परितःप्रागाद्यैशानान्त मिंद्रादिलोकपालान्वंदमानाँश्च कारयेत् ।

(यानकनरसिंहस्य)

अथ यानकंनारसिंहं वीशस्कंधोपरिष्ठात्, शेषोत्संगेसमासीनं तत्फणैःपञ्चभिः छन्नमौलिं चतुर्भुजं शंखचक्रधरं सर्वाभरणभूषितं कारयेत् ।

अथवा अष्टाभि र्द्विरष्टाभिर्वा भुजैर्युक्तं भयानकं दैत्यवधानुरूपं नृसिंहं स्थौणं कारयेत् ।

(तत्प्रतिष्ठा)

अथ नारसिंहप्रतिष्ठाविशेषंवक्ष्ये-पूर्ववद्यागशालां शय्यावेदिं पंचाग्नींश्च परिकल्प्य; आहवनीये प्रधानाग्नौ

शंसनं 'नारसिंहं तपोनाथं महाविष्णुं महाबल'
। गिरिजस्य, देव्योःपूर्ववत्। 'नारसिंहं तपोनाथं
वत्सलं अनंतबल'मिति स्थूणजस्य, देव्योः लोक-
ना मन्येषांच पूर्ववदाव्हानं 'सामवेदं शौपिकं द्विज
'मिति वाहानस्य; 'प्रह्लादं दैत्यपतिं विष्णुभक्तं महा
मिति प्रह्लादस्य आवाहनजुष्टाकारस्वाहाकारान्-
; 'योवानृसिंह' (वै०म०प्र०७) इति मंत्रेणाऽष्टो
तमाघर्त्य हुत्वा; शेषंसर्वं प्रतिष्ठोक्तविधिना कार-
ध्रुववेरं तन्मूर्त्तिमंत्रैरष्टोपचारैरभ्यर्च्य; कौतुकवेरं
षोडशोपचारमंत्रैः तन्नाम संयोज्य; अर्चयेत्।
ोत्सवादीनि विष्णोरिव समाचरेत्।

(वामनलक्षणम्)

अथ वामनं पञ्चतालमितं द्विभुजं छत्रदंडधरं
वासस्तं शिखापुस्तकमेखलोपवीतकृष्णाजिनसमा-
वित्रपाणिं बालरूपं ब्रह्मवर्चस्विनं कारयेत्।

मूर्ध्नःकेशांत मात्रार्धं केशान्तात्तद्गंतं यवद्वयाधिक
तस्मात्पुटांतं सयवद्व्यंगुलं तत्समंहन्वन्तंगलं द्विय
द्विमात्रं तस्माद्धृदयं द्वियवाधिकषण्मात्रं हृदयान्ना
तत्समंना भेर्मेढ्रमूलान्तं तत्समं तस्माद्दूरुस्सूर्यमात्रो
व्यंगुलं द्वादशांगुलाजंघातलंवलिंद्विमात्रां(त्रं)तला
दशांगुलं सुखस्थतारं दशांगुलंयवोनकलांगुलंनेत्रं

नेत्राद्भ्रूस्तावत् केशांतंशिरोभागं द्वियवद्विविस्तारं पुरो
गुतंदशोस्तारंकारयेत्। पड्भिः षोडशभिः र्यवोनं कोलकं-
नेत्रांतरं श्रोत्रंदशोच्छ्रियवतारं पंचपात्रं श्रोत्रविस्तृतं
कला तत्त्रिगुणायामं नासाग्रंमात्रार्धं विस्तृतानासाग्रविपु-
लंमात्राद्वयमर्धं तदर्धमध्यमूलं त्रियवांगुलमुन्नतनासाग्रंगो
जीमूलाद्वियवोनदव्यंगुलतारमधरं तदर्धतदद्विगुणदीर्घं
दीर्घाद्द्विगुणमास्य मुत्तरोष्ठविशालं यवद्वयं पालीपंचषडव
यमधरोष्ठमधोहनुष्षडवयवाकला कंठाद्धनु पर्यंतं निर्गम
मष्टांगुलविशालं हिक्कातस्मात् द्विसप्तांगुलं दीर्घदोर्दंडां
गुलं प्रकोष्ठंमणिबंधात्तलं भागं तस्मान्मध्यांगुली समा-
धस्तलतीयवाधिकं नखायामं अंगुलमुन्नतं दीर्घं प्रदे
शान्यनामिके कलायतेअंगुष्ठकनिष्ठायामविस्तृते नवाष्ट
सप्तषट्पंचयवंतारकमादंगुष्ठादि कनिष्ठांतांगुलीनां कला
द्वयं तस्यविपुलं तत्त्रबहुलं हव्यवाहनांगुलमग्र
तारं त्रिभागात् द्विभागं नखविस्तृतं खितातृकं
नखायामं त्रिमात्रार्धचतुर्मात्रं षडंगुलं षडवयंभागं
क्रमान्मणिबंधं प्रकोष्ठं कोर्परंबाहुमूलं अष्टादशांगुलं
वक्षस्थलस्य विपुलं मुखं मध्यं कलामुखं श्रोणीतारं
षोडशांगुलं मुखमंगुलोनमूरुमूलं जानुविशालं सप्तां
गुलं जंघातारंपंचार्धांगुलं नलकाविशालं सार्धरुद्रा
क्षांगुलमग्रविस्तारं पंचांगुलं चतुर्यवंकलायतांगुलं तर्ज

तादीर्घार्धविस्तृतांगुष्ठ मंगुलीनां विपुलंशेषं कारयेत्।

(त्रिविक्रमस्य)

त्रेविक्रमस्त्रिधाप्रोक्तः लोकेषु त्रिपादन्यासात् भू - मणार्थं जानुमात्रं; अंतरिक्षलोकाक्रमणार्थं नाभि- मर्गलोकक्रमणार्थंललाटमात्रंच; ऊर्ध्वपादोभवेत्। थेष्टंरुपंनिश्चित्य; पूर्ववच्चतुर्विंशतितालविभागेन बाहुं चतुर्बाहुं, अष्टभुजे दक्षिणहस्तैः चक्रशराऽ वामहस्तैः शंखशार्ङ्ग हलमुसलधरं; चतुर्भुजे चक्रधरं, वामेनशंखंधरं, अभयदानदक्षिणहस्तं, पादेन प्रसारितवामहस्तं, स्थितदक्षिणपादं प्रसा वामपादं श्यामाभं रक्तांवरधरं सर्वाभरणभूषितं रुपद्रुमम्, इन्द्र, छत्रम् उभयोः पार्श्वयोः जवन चामरधारिणो तदूर्ध्वे दक्षिणे दिवाकरम् अदक्षि ाकरं तथासनकसनत्कुमारौच कृत्वा; प्रसारित- र्वभागे ब्रह्माणं तत्पादंप्रगृह्यहस्ताभ्यांप्रक्षालयंतं, त्स्रोतसि गंगां श्वेताभां नाभेरूर्ध्वे शरीरभागां कृतहस्तां च कायेत्।

पादपार्श्वे नमुचिं भ्रममाणं वमापार्श्वे शुक्रं विध्यं मुष्टिनाप्रहरंतंगरुडं, दक्षिणेवामनं, तत्पार्श्वे बलिं र्वाभरणभूषितं सपत्नीकम् हर्षेणकराभ्यांहेमक

लशमुद्धरंतं तस्योर्ध्वेजांववंतं भेरीताडनपरंचकारयेत्। (अत्रानुक्तं)भृगूक्तविधिना त्रैविक्रमस्यकौतुकंचतुर्भुजमेव कारयेत्।

(त्रयोः प्रतिष्ठा)

वामनत्रिविक्रमयोः प्रतिष्ठाविशेषंवक्ष्ये-पूर्वोक्त- यागशालामध्ये शय्यावेदिं परितश्चाग्नीन् पौंडरीकाग्निंच कारयेत्। एकाग्निविधिनाकारयेदितिकेचित्। एककुंभे समावाह्य; एकवेद्यां शाययेत्। अन्वाहार्ये प्रधानाग्नौ हौत्रं शंसनं 'त्रिविक्रमं त्रिलोकेशं' विष्णुं सर्वाधारमिति त्रिविक्रमस्य। 'वामनं वरदं विष्णुं काश्यपम् अदिति- प्रिय'मिति वामनस्य। अन्यदेवानां तत्तन्मूर्त्तिमंत्रैरावाह नादीनि कारयेत्। 'योवात्रिमूर्त्ति' (वै०म०प्र०८) रिति मंत्रेणाऽष्टोत्तरशतंहुत्वा; अन्यत्सर्वंहरेरिवकारयेत्। नि- त्यार्चनायां वामनं त्रिविक्रमं च तत्तन्मूर्त्तिमंत्रैरष्टोपचारै- रभ्यर्च्य; कौतुकंपूर्ववत् षोडशोपचारैर्मंत्रैः मूर्तिं मत्रं सं- योज्य, अर्चयेत्। स्नपनोत्सवादीनिपूर्ववत्कारयेत्।

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे नारसिंह वामन त्रिविक्रमविधिर्नाम सप्तपंचाशत्तमः पटलः ॥५७॥

(अथ-अष्टपंचाशत्तमः पटलः)

(जामदग्न्यस्य लक्षणम्)

जमदग्निरामं मध्यमंदशतालमितं द्विभुजं रक्ताभं श्वेतवस्त्रधरं दक्षिणेनहस्तेन परशुधरम् उद्देश्यवामकरं

जटामकुटधरं सोपवीतं सर्वाभरणभूषितं स्थितमेव कारयेत् । कौतुकं तद्रूपं चतुर्भुजं विष्णुंवा कारयेत् ॥

(तत्प्रतिष्ठा)

अथ प्रतिष्ठाविशेषं वक्ष्ये - पूर्वोक्तयागशालामध्ये शय्यावेदिंपरितः पञ्चाऽग्नीं श्च परिकल्प्य ; आहवनीये प्रधानाग्नौ हौत्रं प्रशंस्य, 'रामं ऋषिसुतं विष्णुं परशुपाणि' मिति आवाह्य आहवनीये आज्याहुतीर्हुत्वा ; 'विष्णुर्वरिष्ठ' (वै०म०प्र०८)इति मंत्रेणाऽष्टोत्तरशतमावर्त्य हुत्वा अन्य त्सर्वंपूर्ववदाचरेत् । नित्यार्चनायां ध्रुववेरं तन्मूर्त्तिमंत्रैरष्टोपचारैरभ्यर्च्य, कौतुकंपूर्ववत् षोडशोपचारमंत्रैःसंयोज्याऽर्चयेत् । स्नपनोत्सवादीनि विष्णोरिव समाचरेत् ॥

(राघवस्य लक्षणम्)

अथ राघवं रामं सविंशतिशतांऽगुलमितं द्विभुजं त्रिनतस्थितं दक्षिणेनहस्तेनशरधरं वामेनचापधरं श्यामाभं रक्तांबरधरं किरीटाद्याभरणाऽन्वितं कारयेत् । अभंगसमभंगमतिभंगमिति त्रिविधं नतमानमाभंगस्य त्रिमात्रं समभंगस्य वेदांगुलमतिभंगस्य शरांगुलं एतेषां गुदांगुष्ठांतरमष्टादशांगुलं विंशत्यंगुलं क्रमेण तत्त्रिभागैक पार्ष्ण्यंतरमापादतलमस्तकं मध्यसूत्रस्य मूर्ध्नः पार्श्वे वाम नेत्रासितमंडले वामनासापुटेऽ धराहनोर्वामपार्श्वे सव्य स्तनस्य दक्षिणपार्श्वे नाभेर्दक्षिणे वामोरुदक्षिणपार्श्वे वाम

घ्रिपार्श्वे प्रलंबयेत् । एतद्भंगसूत्रं समभंगस्य मुखं (थे:)द्योक्तं वामस्तनपीठपार्श्वे नाभिमध्ये ऊरुमध्ये पार्ष्ण्य मध्येतुप्रलंबयेत् एतत्समभंगमात्रं । अतिभंगस्य मुखं पूर्ववन्नाभे र्वामेवामोरुमध्ये पार्ष्ण्यंतरेच लंबयेत् एतदतिभंगसूत्रं । शेषं पूर्ववत् अधिकात् हिक्कासूत्रात् स्तनद्विमात्रं सूत्रा न्नाभि द्विमात्रं सूत्रान्मात्रार्थं जानुन प्रमते (प्रमिति मति) भंगे अन्यसूत्रनिघ्नं युक्तित कारयेत्।

दक्षिणहस्तस्य तलाग्रं नाभिदघ्नं श्रोणीदघ्नं वाम कोर्परांतरं पार्ष्ण्यंतरसमं वामहस्तं सचापम् उष्णीषद्वयस्यो न्नतं तस्य नीत्रं मुखद्वलयं मौलिपार्श्वे धनुस्थितं राघवं कारयेत्।

सीतां देवस्य बाहुसमां देवस्योननवार्धतालेन मानेना भंगवशा द्रुक्माभां शुकपक्षनिभांबरां सर्वाभरण भूषितां धम्मिल्लबंधयुतां करंटिकामकुटयुतां वामहस्ते नोत्फुल्लपद्मधरां प्रसारितदक्षिणहस्तां देवस्य दक्षिणपार्श्वे किंचिद्देवं समीक्ष्य विस्मयोत्फुल्ललोचनां कारयेत् ।

कटकाग्रस्योत्सेधं स्तनाक्षसमं नाभेर्मणिबंधांतरं सार्धत्रयोदशांगुलं पार्श्वसध्यबाह्यन्तरं सप्तांगुलं प्रसारित करतलमध्योर्वंतरं द्विमात्रं तच्छ्रोणीबंधांतरं चतुरंगुलं पार्श्वमध्यं बाह्यन्तरं रसांगुलं कोर्प[illegible]

वामपार्श्वे सौमित्रिं देवस्य कर्णांतं बाह्वंतंवा कनिष्ठदशतालेन समभंगवशान्मुखमध्यर्धांगुलम् एव (मि)मष्टाननं भागचतुष्टय मन्यत्सर्वं पूर्ववदुद्दिष्ट मुद्बंध कुंडलं युवराजभूषणान्वितं द्विभुजं रामवत् शरचापधरं सुवर्णवर्णं श्यामांबरधरं समभंगान्वितं कारयेत्।

हनूमंतं प्रमुखे किंचिद्दक्षिणमाश्रित्यस्थितं देवस्य स्तनांतं नाभ्यंतं ऊरुमूलांतं वा सप्ततालमितं द्विभुजं दक्षिणेन हस्तेन आस्यं वामेन स्ववस्त्रंच पिदधानं किंचिदूर्ध्वाननं कारयेत्। मूर्धनः कला भ्रूअंतं तस्माद्भ्रुवमात्रत्रयं नासिकांतं तथाधरं मात्रं कंठं दशांगुलंहृदयं हृदयान्नाभ्यंतं नाभेर्मेद्रान्तंच तस्मादूर्वंतं विंशतिमात्रं जानुं दन्यंगुलं जंघासप्तदशांगुलं कलातलं तदायामं दशांगुलं बाहुं विंशत्यंगुलं तच्चतुर्थैरहीनं प्रकोष्ठतलं पादायामसमं शेषांगंनरस्योक्तारान्मात्रोनम् ऊरोर्बाह्वोः कटिमध्येश्रोण्यांच कलोनं पादमात्राविहीनं शरार्धांगुलहीन मंगुलिद्वियहीनं अत्रानुक्तं सर्वं युक्त्यैव कारयेत्॥

(राघवस्य प्रतिष्ठा.)

राघवस्य प्रतिष्ठा विशेषं वक्ष्ये-पूर्वोक्तयागशालामध्ये शय्यावेदिं परितः पंचाग्नींश्च परिकल्प्य; सीतालक्ष्मणसंयुक्तं देवं हनुमतासार्धं एककुंभे समावाह्य; एकवेद्यां सौमित्रेः पृथक्शयनं वेद्यधस्ताद्धनुमतः शयनंच

संकल्प्य; अन्वाहार्ये प्रधानाग्नौ होत्रंप्रशंस्य; 'रामं दाशरथिं वीरं काकुत्स्थ' मिति राघवस्य, 'सीता मयोनिजा लक्ष्मीं वैदेही' मितिसीतायाः, 'रामानुजं सौमित्रिं लक्ष्मणवर्धनं लक्ष्मण' मितिलक्ष्मणस्य, 'कपिराजं हनूमंतं शशिराशिं महामति' मिति हनूमतश्चावाहनादीनि कारयेत 'रायामीश' (वे०म०प्र०७)इतिमंत्रेणाऽष्टोत्तरशतं हुत्वा अन्यत्सर्वंपूर्ववत्कारयेत्।

मत्स्याद्यवताराणां रूपभेदएव शक्तिभेदो नैवभवेत्तस्मात्प्रतिष्ठादीनि सर्वाणि विष्णोरिव समाचरेत्।

अवताराणां ध्रुवबेरंकौतुकंच प्रत्येकं कर्मशक्तश्चेत्, पूर्वोक्तएकबेरक्रमेण पण्मानसहितं शिलालोहजं वा कृत्वा; अर्चास्थाने ब्राह्मपदे ध्रुवस्थाने देविके प्रतिष्ठाप्य; षोडशोपचारैरर्चयेदित्येके।

लक्ष्मणस्य पृथक्प्रतिष्ठाचेत् राघवस्योक्तक्रमः सीतायाः श्रीदेव्याइव भरतशत्रुघ्नयोश्च रामलक्ष्मणवरिव सर्वंसमाचरेत्। मूर्तिमंत्रएवविशेषः। तथा हनूमतः वायोरिव प्रतिष्ठामाचरेत्।

नित्यार्चनायां राघवस्य तन्मूर्तिमंत्रैरष्टोपचारैरभ्यर्च्य; कौतुकस्य पूर्वोक्तषोडशोपचारमंत्रैस्तत्तन्मूर्तिमंत्रान् संयोज्याऽर्चयेत्॥

(बलरामस्य)

अथ बलरामं मध्यमंदशतालमितं द्विभुजं त्रिन त स्थितं दक्षिणहस्तेन मुसलधरं वामेनहलधरं श्वेताभं रक्तवस्त्रधरं उद्बंधकुंतलं दक्षिणे रेवतींदेवीं पद्मकिंजल्क वर्णां पुष्पांबरधरां दक्षिणेन हस्तेन पद्मधरां प्रसारितवाम हस्तां कारयेत् । तद्रूपं कौतुकं विष्णुं चतुभुजंवा कारयेत् ॥

(तत्प्रतिष्ठा)

अथ प्रतिष्ठाविशेषंवक्ष्ये - पूर्वोक्तयागशालामध्ये शय्यावेदिं परितःपंचाग्नींश्च परिकल्प्य ; आहवनीये प्रधा नाग्नौ होत्रं प्रशंस्य, 'रामं यदुवरं विष्णुं हलायुध' मिति रामस्य, 'रेवती मिंदिरां लक्ष्मीं रामप्रिया'मिति रेवत्याश्च आवाहनादीनि कृत्वा ; 'रायामीश 'इति मंत्रेणाऽ ष्टोत्तरशतंहुत्वा ; अन्यत्सर्वं पूर्ववत्कारयेत् । नित्यार्चनायां ध्रुववेरं तन्मूर्त्तिमंत्रै रष्टोपचारै रभ्यर्च्य ; कौतुकंषोडशोप चारमंत्रैस्तन्मूर्त्तिमंत्रान् संयोज्याऽर्चयेत् । स्नपनोत्सवा-दीनि पूर्वोक्तवत्कारयेत् ।

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनाकल्पे अयुतग्रंथसंहिताया रामत्रयविधिर्नाम अष्टपंचाश त्तमः पटलः ॥ ५८ ॥

(अथ एकोनषष्टितमः पटलः)

(कृष्णस्य)

अथ कृष्णस्य लक्षणंवक्ष्ये - मध्यमंदशतालमितं द्विभुजं श्यामाभं रक्तवस्त्रधरं सर्वाभरणभूषितं उद्बंधकुं

तलं दक्षिणेनहस्तेन क्रीडायष्टिधरं मुग्धतवामकूर्परं हिक्का सूत्रादधोदशांगुलं दक्षिणकरकटकाग्रं नाभिदघ्नंवा तस्मात् षट्सप्ताऽष्टदशांऽगुलं निम्नं, नासाग्रात् पादतला न्तं हिक्कासूत्राद्वामेंगुलं सूत्रात्तस्यार्धहृदयं नाभेर्दक्षिणे कल गुलं मेढ्रभागं वामेजान्वंतं जगतीयवं सूत्रान्मात्रत्रय पार्ष्ण्यंतरम् एवं समभंगसूत्रमन्यत्सर्वम् राघवस्योक्तवत् ।

दक्षिणे रुक्मिणीदेवीं हेमाभां धम्मिल्लकुंतलयुतां व प्रसारितदक्षिणहस्तां,सपद्मवामहस्तां,वामपार्श्वेसत्यभाम श्यामाभां धम्मिल्लकुंतलयुतां सोत्पलदक्षिणहस्तां प्रस रितवामकरां सर्वाभरणसंयुक्तां कारयेत् । वामपार्श्वे गरुड प्रांजलीकृत्यस्थितं कारयेत् । देवस्यदक्षिणहस्तं लील यष्टियुतं वामंसशंखं वा कारयेत् । तद्रूपंकौतुकं विष्ण चतुर्भुजं वा कारयेत् ॥

नवनीतनटस्य वामपदंसमाकुंच्य स्थितं दक्षिण मुत्तानकुंचितं, दक्षिणहस्तमग्रयं नवनीतयुतंवा वा प्रसार्य अनुत्तानं सर्वाभरण भूषितं अंवरहीनं अंवराधा युतं नवनीतनृत्तरूपं कारयेत् ।

एवमेव कालियाऽहिफणोपरिस्थितं दक्षिणव सपतकं वामकरेणाऽहिपुच्छं संगृह्य नृत्यन्तं कारयेत् कृष्ण रूपाण्यसंख्यानि वक्तुंनशक्यानि तस्माद्यथेष्टरू कारयेत् ॥

(तत्त्वनिष्ठा)

अथ प्रतिष्ठाविशेषंवक्ष्ये - पूर्वोक्तयागशालामध्ये शय्यावेदिं परितःपंचाग्नीन् पौण्डरीकाग्निंच संकल्प्य; पौंडरीकेप्रधानाग्नौ होत्रंप्रशंस्य, 'कृष्णं पुण्यं नारायणं त्रिदशाधिप'मिति कृष्णस्य; 'रुक्मिणीं सुदरीं देवीं रमा'मिति रुक्मिण्याः; 'सत्यभामां सतीं सन्नतीं क्षामा'मिति सत्यभामायाः; गरुडस्य पूर्ववत्, 'नवनीतनट कृष्णं देवकीसुतं बालरूप'मिति नवनीतनटस्य, 'कालियमर्दनं कृष्णं गोपालं वटपत्रशायिन'मिति कालियमर्दनस्य; अन्येषां रूपाणां तत्तत्कर्मनाम संयोज्य; आवाहनादीनि कारयेत् । 'सत्यस्सत्यज्ञ' (वै०म०प्र०७) इति मंत्रेणाऽष्टोत्तरशतमावर्त्य हुत्वा; शेषंपूर्ववदाचरेत् । नित्यार्चनायां ध्रुवबेरमष्टोपचारैः कौतुकंषोडशोपचारमंत्रैः संयोज्याऽर्चयेत् । स्नपनोत्सवादीनि पूर्ववत्कारयेत् ॥

रुक्मिणीसत्यभामयोः पृथक्प्रतिष्ठाचेत् श्रीभूम्योरिव कारयेत् ॥

(कर्किणः)

कर्किणं मध्यमदशतालमितम् अश्वाकारंमुखम् अन्यंनराकारं च चतुर्भुजं शंखचक्रखड्गखेटकधरं उग्ररूपं भयानकं एवंदेवरूपंकृत्वा, तद्रूपं कौतुकं विष्णुरूपं चतुर्भुजं वा, कारयेत् ॥

(तत्त्वनिष्ठा)

अथप्रतिष्ठाविशेषंवक्ष्ये - पूर्वोक्तयागशालामध्ये शय्यावेदिं परितःपंचाग्नीन् पौंडरीकाग्निंच संकल्प्य ; पौंडरीकेप्रधानाग्नौहोत्रंप्रशंस्य;'कर्किणंविष्णुं कामरूपंसंहारात्मक'मित्यावाहनादीनिकृत्वा; 'धूर्नोवहन्ता' (वै०म०प्र०७) मित्यष्टोत्तरशतंहुत्वा ; अन्यत्सर्वंसमानंकुर्यात् । नित्यार्चनायां पूर्वोक्तार्चाक्रमेणमूर्तिमंत्रं संयोज्याऽर्चयेत् । अवतराणां पूर्ववत्त्रेताग्निविधानेन एकाग्निविधानेनवा अग्नीन् संकल्प्य; तत्प्रधानाग्नौ होत्रशंसनादीनि कारये दित्येके

(आदिमूर्तिविधिः)

अथ आदिमूर्त्तिविधिं वक्ष्ये-अनन्तोत्संगे समासीनं दक्षिणंप्रसार्य वाममाकुंच्य दक्षिणहस्त मनंतोत्संगे न्यस्य वामं वामजानूर्ध्वे प्रसार्य चतुर्बाहुं शंखचक्रधरं फणानां सप्तभिःपञ्चभिर्वा छत्रमौलिं, प्रवालाभं सर्वाभरणभूषितं कृत्वा ; तद्दक्षिणे भृगुं वामे मार्कंडेयम् एकजानुक्रमेणाऽसादयित्वा , दक्षिणेब्रह्माणं वामेशंकरंच कृत्वा ; तद्रूपंबेरतुकं च कृत्वा प्रतिष्ठोक्तक्रमेण प्रतिष्ठांकारयेत्। 'आदिमूर्त्तिं ममितमहिमानं अत्यंताद्भुतं सर्वाधार'मित्यादिमूर्त्तेः नागराजस्य पूर्ववदावाहनादीनि कारये अन्यत्सर्वं पूर्ववदाचरेत् ॥

384

(अनन्तशयानस्य)

अनंतभोगशयने प्रतिष्ठाचेत् अनंतशयनादिपञ्च मूर्त्तिमंत्रै रावाहनादीनि कारयेत् । पुष्पन्यासकाले आसीनमेवस्मरेत् । सुप्तंप्रबुद्धंदेवेशं जाग्रद्भावेन संयुक्तं हरिं प्रणवेनोत्थाप्य; पादपार्श्वे पञ्चायुधांश्च तत्तन्मूर्त्तिमंत्रैस्समर्चयेत् । अनन्तस्यफणापार्श्वे 'अनन्तं नागराजं सहस्रशीर्षं शेषं विष्णुसख'मिति मूर्त्तिमंत्रैरर्चनं, पुष्पन्यासं कुर्यात् । कौतुकं विष्वादिपंचमूर्त्तिमंत्रैः पूर्ववदर्चयेत् । उद्वासनकाले मंत्रेणदेवेशं शाययेत्। भोगशयने द्वाराभ्यन्तरे जयां विजयांच समर्चयेत् अन्यत्सर्वं पूर्ववदाचरेदित्याह मरीचिः ।

इति कृष्ण कलक्याविमूर्ति विधिर्नाम एकोनषष्टितमः पटलः ॥५९॥

(अथ षष्टितमः पटलः)

(अथमानुष वासुदेवस्य)

अथ मानुषवासुदेवमायताश्रे विमाने मध्यमदशतालमितं द्विभुजं शंखचक्रधरं, दक्षिणे रुक्मिणींदेवीं, तद्दक्षिणे हलमुसलधरंबलभद्रं, तद्दक्षिणेप्रद्युम्नं द्विभुजं, क्षुरिकाधरदक्षिणहस्तं, कट्यवलंवितवामहस्तं, तद्दक्षिणे विरिंचं चतुर्बाहुंचतुराननं,देवस्यवामपार्श्वेअनिरुद्धं द्विभुजं खड्गखेटकधरं, तद्वामेसांबं द्विभुजं दानदक्षिणकरं, तद्वामे गरुडंच कारयेत् । तेषां वर्णाऽवराऽऽभरणानि भृगूक्त विधानेन कारयेत् । देवान् एतान्स्थितानेव संस्थाप्य,

तद्रूपंकौतुकं कारयेत् । अथवा विष्णुं चतुर्भुजम् संस्थापयेत् ॥

(दैविक वासुदेवस्य)

दैविकंवासुदेवं सिंहासनेसमासीनं चतुर्भुजं शंचक्रधरं श्रीभूमीभ्यांसहितं तथा दक्षिणवामयोः पूर्वोक्तादेवान् बलभद्रस्य दक्षिणेदेवींरेवतीं, प्रद्युम्नस्यरोहिणं अनिरुद्धस्योषां सांबस्यइंदुकरींच सहैव स्थापयेत । एतेषां कौतुकबिंबानि पूर्ववत् कारयेत् ॥

(तत्प्रतिष्ठा)

एतेषां प्रतिष्ठाविशेषं वक्ष्ये-पूर्वोक्तयागशालामध्ये शय्यावेदिं परितःपञ्चाग्नीन् पौण्डरीकाग्निंच कृत्वा; अन्वाहार्यस्य दक्षिणेच आवसथ्यस्योत्तरेचौपासनाग्निकुण्डे कृत्वा वासुदेवयोस्सभ्ये बलभद्रस्याऽऽहवनीये प्रद्युम्नस्यान्वाहार्ये अनिरुद्धस्यगार्हपत्ये सांबस्यआवसथ्ये दक्षिणोत्तरयोः औपासनाऽग्निकुण्डयोश्च होत्रंप्रशंस्य; 'भद्रेशं पुण्यमूर्त्तिं वासुदेवं पुण्यात्मक' मिति वैदिकवासुदेवस्य; देव्यर्मुन्योश्च पूर्ववत्; 'बलिनं हलधरं नागराजं संकर्षणमिति बलभद्रस्य, रोहिणीपतिं प्रद्युम्नं वीरं बलशासनमिति प्रद्युम्नस्य, 'पुरुषं सत्य मच्युत मनिरुद्ध'मिति अनिरुद्धस्य 'सांबं जांबवतीसुतं भद्रं सुंदर' मिति सांबस्य 'पितामहगरुडयोश्च पूर्ववत् मूर्त्तिमंत्रै रावाहनादीनि कृत्व

(अथ एकशततमः पटलः)

अथातो ग्रंथगणनाविधिं व्याख्यास्यामः--- 421

वैखानसमहाशास्त्रं सर्ववेदेषूद्धृतं सर्ववेदार्थसारभूतं अप्रतर्क्यमनिन्दितं वैदिकैरुपसेवितं विष्णोराराधनं सर्व भूतहितार्थाय शाद्धं प्रमाण मवलंब्य विष्णुना विखनसः उक्तम्। विखनसा भृग्वादीनामुक्तम्। भृगुणा काश्यपेन अत्रिणा मयाचैव तंत्राऽधिकारकाण्डसंहिताभेदैः चतुर्लक्षं प्रोक्तम्। तेषां क्रमेण प्रतिमार्गं ग्रंथसंख्यां वक्ष्यामि॥

(अत्रि ग्रन्थसंख्या)

अत्र प्रथमं प्रधानं विखनस्सूत्रं पूर्वतन्त्रम्, आत्रेयतन्त्रं, विष्णुतन्त्रं, उत्तरतन्त्रमित्येतैश्चतुर्भिस्तन्त्रै रत्रिणा अष्टोत्तराशीति सहस्रग्रन्था उक्ताः।

(भृगु ग्रन्थ संख्या)

खिल पुरातन्त्र वासाधिकार चित्राधिकार मानाधिकार क्रियाधिकाराऽर्चाधिकार यज्ञाधिकार वर्णाधिकार प्रकीर्णाधिकार प्रतिगृह्याधिकार निरुक्ताऽधिकार खिलाधिकाररूपेषु त्रयोदशे ष्वधिकारेष्वपि संख्या पूर्ववत्।

अष्टोत्तराशीतिसहस्रं ग्रन्था भृगुणाप्युक्ताः॥

(काश्यप ग्रन्थ संख्या)

सत्यकाण्डं, तर्ककाण्डं, ज्ञानकाण्डमिति त्रिविध काण्डेष्वपि काश्यपेन चतुष्षष्टिसहस्रग्रन्था उक्ताः।

॥ अथ चतुस्त्रिंशोऽध्यायः ॥

पञ्चमूर्तिकल्पः

पुरुषं स्फटिकाभं रक्तास्यनेत्रपाणिपादनखवस्त्रयुतं चतुर्भुजं शङ्खचक्रधरं देवीभ्यामृषिभ्यां जयभद्राभ्यां [1]व्याजकाभ्यां संयुक्तं दक्षिणे अञ्जनाभं [2]पिङ्गाम्बरं धृतिपौष्णीभ्यां युतं सुरसुन्दरीभ्यां वीज्यमानं सत्यं पश्चिमे अच्युतं सुवर्णाभं शुक्लपिच्छाम्बरधरं पविलीक्षोणीयुतं [3]गुहतुष्टिभ्यां व्याजकाभ्यां उत्तरे अनिरुद्धं तरुणादित्यसङ्काशं श्यामाम्बरमनन्ताध्यासीनं फणैः सप्तभिः पञ्चभिर्वा आच्छादितमौलिं कुञ्चिताननं [4]विवृत्तैकपादं [5]वामजानुप्रतिष्ठितोत्तम्भितसव्यकरमनन्तालम्बितान्यं [6]महीप्रमोदायिनीभ्यां वराहनारसिंहाभ्यां स्वाहास्वधाभ्यां व्याजकाभ्यां [7]समन्वितमेवञ्च क्रमेण संस्थाप्य उपरि विष्णुं श्यामलाङ्गं चतुर्भुजं शङ्खचक्रधरं सर्वाभरणसंयुतं श्रीहरिणीभ्यां सुवर्णश्यामवर्णाभ्यां रक्तश्वेताम्बराभ्यां [8]वामदक्षिणकरधृतरक्तपद्मोत्पलाभ्यां प्रसारितान्यहस्ताभ्याञ्च [9]भृगुपुराणाभ्यां [10]प्रवालरजतवर्णाभ्यां श्वेतवस्त्रधराभ्यां किष्कन्धसुन्दराभ्यां व्याजकाभ्यां तदूर्ध्वे अनन्तभोगशयनं स्थापयेत् । चतुर्मूर्तिविधानेनोपरि [11]नारसिंहं वाराहं वा स्थापयेत् ।

परिवारकल्पनफलम्

सर्वज्ञानपायिगणैः सार्धमाचरेत् [12] । देवीहीने पत्न्यपत्यहानिः मुनिहीने धर्मनाशः विष्वक्सेनहीने कुलोत्सादनं वीशहीने [13]रिपुवृद्धिः चक्रहीने [14]संसारचक्रं ? शङ्खहीने मौढ्यं ध्वजहीने कार्पण्यं यूथेशहीने भृत्यहानिर्भवति । तस्मादेतैः [15]द्वारागारपालकैरर्चयेत् । उक्तानां विमानानां भेदालङ्कारमानानि भृगूक्तविधिना ज्ञात्वैवं कारयेदिति विज्ञायते ॥

इति श्रीवैखानसे भगवच्छास्त्रे कश्यपप्रोक्ते ज्ञानकाण्डे
पञ्चमूर्त्यालयविधि र्नाम चतुस्त्रिंशोऽध्यायः ॥

1. A. व्याजनाभ्यां. 2. क. पिङ्गलाम्बरधरं. 3. B. कोशे गुहेति नास्ति. म. कीर्तितुष्टिभ्यां. 4. म. विस्तृतैकपादं. 5. क. B. आजानु. 6. म. असक्थं. 7. क. B. समंचितं. 8. म. हस्तोद्धृत, 9. छ. रक्तश्वेताम्बराभ्यां 10. क. प्रवालरजितवर्णाभ्यां 11. विधानेषु. (तु?) 12. म. सार्धं सर्वमाचरत्. 13. छ. अरि. 14. क. संसारोच्छित्तिः. 15. B. द्वाराद्वारपालैः.

॥ अथ पञ्चत्रिंशोऽध्यायः ॥

ब्रह्मणः स्वरूपनिरूपणम्

अथ विश्वतश्चक्षुर्विश्वतोमुखाङ्घ्रिहस्तं विश्वात्मकं विश्वगर्भं विश्ववेत्तृ[1] विश्वेन्द्रियगुणाभासं विश्वेन्द्रियविवर्जितमनादिनिधनं व्योमाभं यत् [2]ज्ञातृज्ञेयज्ञानविहीनं ज्ञानघनं तदेव जाग्रत्स्वप्नसुषुप्तितुर्यावस्थानगं[3] बहिःप्रज्ञान्तःप्रज्ञ[4]प्राज्ञावस्थया वैश्वानरतैजसहृदयाकाशरूपेण[5] स्थूलं प्रविभक्तमानन्दं भुञ्जानं ब्रह्म [6]तुरीयं चतुष्पादमामनन्ति । तदेव ब्रह्म सत्त्वोत्कर्षनिकर्षाभ्यां प्राणिषु चतुर्धा भिद्यते[7] सत्त्वतः पादतोऽर्धतस्त्रिपादात्केवलाच्च । [8]धर्मज्ञानैश्वर्यवैराग्यविषयाश्चतस्रो मूर्तयस्त्विमाः[9] भवन्ति ।

ब्रह्मणो रूपकल्पनम्

[10]आसु मूर्तिषु कूटस्थः सूक्ष्ममूर्तिः सत्तामात्रः । सोऽत्र परं ब्रह्म विष्वाख्यः । अन्या मूर्तयः पुरुषसत्याच्युतानिरुद्धाख्या अभ्यर्च्या भवन्ति । अतः [11]चतुर्व्यूहात्मनो ब्रह्मणः सर्वगतस्य निरवयवस्य लिपेरिव कल्प्यानि रूपाणि भवन्ति । भक्त्या नियोजितौत्सुक्याद्धृत्पन्नः तत्तदाकृतिः तत्तद्वाञ्छितान् ददाति । ज्ञानगम्यस्याकर्तुरविकारिणः [12]शुद्धस्याहेतुकस्यात्मनः पृथक्त्वं घटाकाशवत् । [13]अग्नेः विस्फुलिङ्गा इव [14]कालान्नमेघा इव ज्ञानांशा [15]देवा भवन्ति । [16]अंशैश्च [17]पालयन्ति लोकान् । तानेव पूजयन्त्येते भृग्वादयः ।

प्रकृतिः श्रीः

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं" [18]इति तत्संश्लेषाल्लोकयात्रामूला देवी । तस्मात् तमनयैव सह देवेशमर्चयन्ति परमर्षयः । सा देवी

1. A. विश्ववेत्तारं. 2. B. यज्ज्ञानयज्ज्ञेयं 3. B. स्थानं 4. छ. प्रज्ञप्राज्ञदस्थायाः. 5. क. विभक्तरूपं. 6. क. तृङ्. क. तुर्यं. 7. B. विरुध्यन्ते इति. 8. म. धर्मैज्ञानवैराग्य. 9. छ. स्वस्तिमाचरन्ति. अत्र षड्नि द्वयं ख कोशे लुप्यते. म. मूर्तयस्त्वस्मिन्मत्यः 10. A. एतासु. 11. भ. व्यूहात्मनः 12. ख. कर्तुरविकारिणः. 13. तस्मादग्नेः इति क. 14. अत्र स्थाने- निमेषकेषु इति B. कोशेषु दृश्यते. क. हरेरावेशांशाः. 15. B. देवांशाः. 16. क. अंशैरेव. 17. पालिनं. 18. A. तत्क्लेशसंश्लेषात्, छ.B. B. छ. लोकयात्रामूला तस्मात्तयैव.

॥ अथ सप्तत्रिंशोऽध्यायः ॥

दशावतारस्वरूपम्

मत्स्य कूर्म वराह नरसिंह वामन जामदग्न्यराम दशरथराम बलभद्र [1]कृष्ण कल्किन इत्येतान् बृहदृवृत्तविमाने गर्भागारं द्वादशधा विभज्य आग्नेय्यां पूर्वभागे तप्तहाटकसन्निभं रक्तपद्मारूढं वितस्तिविस्तृतं मत्स्यरूपं, पश्चिमे अञ्जनाभं [2]षोडशाङ्गुलविस्तृतं तदर्धोच्छ्रयं कच्छपं चतुरश्रपीठसंस्थितं, [3]वराहवदनं श्यामलं चतुर्भुजमुर्व्याश्रितोत्सङ्गं [4] पीताम्बरधरं शङ्खचक्रयुतं नरवराहरूपं, [5]दंष्ट्राकराल-सिंहास्यं सटाऽऽटोपं मुक्ताभकं चतुर्भुजं वीरासने संस्थितं नरसिंहं, वामनं श्यामाङ्गं ब्रह्मचारिव्रते स्थितं, जामदग्न्यं दूर्वाभं रक्तवल्कलसंवृतं [6]टङ्कहस्तं जटाधरं, रामं रम्यविभूषणं चापबाणधरं सीतादेव्या समन्वितं सिंहासनसमारूढं, हलिनं [7]शङ्खाभं नीलाम्बरं सीरिणं बलभद्ररामं, कृष्णं यौवनशालिनं नील-कुञ्चितकुन्तलं लीलायष्टिधरं, कल्किनं रक्तसप्त्यधिरूढं भिन्नाञ्जनाभं कवचो-ज्ज्वलसन्नाहं करवालकरम् एवं आग्नेयादीशानान्तं [8] [9]द्वारपादं विहाय नवभागेषु दशावतारान् संस्थाप्य[10] पश्चिमे भागे अनिरुद्धमादिभूतमनन्ताऽत्मानं स्थापयेत् एतेषां [11]पृथक् पृथग्वा विमानं कल्पयेत्। एकत्र स्थापिते सर्वदानफलं सर्वयज्ञफलं प्राप्य विष्णुलोके महीयत इति विज्ञायते।

अथ पर्वोत्सङ्गे नदीतीरे विष्णुच्छन्दविमाने मत्स्यकूर्मौ सहैव पूर्ववत्। ब्रह्मेशाभ्यामर्चितं सर्वतोभद्रे अञ्जनाकारे सोमच्छन्दे वा अरण्ये वाराहं मह्याश्लिष्टं शयानमासीनं स्थानकं वा वीशवासुकियुतं पुण्यधर्माभ्यां पूजितं पुष्टिकाकुमुद्वती व्याजने कुञ्ज्यद्वारोभयतः ब्रह्मश्रीः राजश्रीः चत्वारो वाहनं वेदाः शैषिकस्तु पुलिन्दाख्यो मुनिः। शेषं युक्त्या कारयेत्।

1. क. ग. हलिकृष्ण. 2. B. अञ्जनाभं. 3. क. वराहवदनास्यं. 4. छ. सितोत्सङ्ग. 5. क. दंष्ट्राकरालमास्यं B. दंष्ट्राकरालस्यं. 6. नगस्थं. 7. B. शङ्खाभेद. 8. क. प्रागन्तं. 9. B. दश 10. A. संस्थाप्य मध्ये पश्चिमे. 11. एतेषां प्रतिमानं.

पर्वताकारे नन्द्यावर्ते सर्वतोभद्रे पौष्टिकोर्जलपल्लस्वस्तिकान्यतमे उपरितले नृसिंहं स्पटिकोपलमध्ये वा उत्कुटिकासने स्वस्तिकासने वा आसीनं जानुप्रसारितोत्तम्भद्विबाहुं शङ्खचक्रधरं वामदक्षिणोत्तम्भजानुस्थैकहस्तं प्रसारितावलम्बितोरुस्थैकहस्तं शङ्खचक्रधरं आसने कुञ्चितैकाङ्घ्रिं प्रसारितान्याङ्घ्रिं ऊहसमवरदैकहस्तं शङ्खचक्रधरं वा सिंहासने चतुर्भुजं ब्रह्मेशाभिष्टुतं वा देवीभ्यामृषिभ्यां यज्ञतीर्थाभ्यां ब्रह्मेशाभ्यां सामभूतीशाभ्यां वाहनशैषिकाभ्यामासीनं, गारुडभौतिकसोमच्छन्द चतुःस्फुटाद्यतया वामनं त्रिविक्रमं श्यामलाङ्गं द्विबाहुं ब्रह्मचारिव्रते स्थितं वामहस्तधृतछत्रमन्यहस्तधृतषाढं कनकशङ्खिलाभ्यां मुनिभ्यां युतं वामनाकारं, त्रिविक्रमं जानुसमं नाभिसमं वा उद्धृतैकपादं स्थितदक्षिणचरणं चतुर्बाहुं द्रुहिणक्षालितालम्बजह्नुकन्यायुतोद्धृतचरणं बलिं वामनयुतं वीशार्दितं भृगुं चन्द्रादित्यनमस्कृतं, श्रीप्रतिष्ठितके महाशङ्खे वा जामदग्न्यं, श्रीप्रतिष्ठितके महाशङ्खे वा रामं सीतासौमित्रियुतं हनुमद्भरताभ्यां, स्वस्तिके चतुःस्फुटे वा बलभद्ररामं, गणिकाविहारकुम्भाकारलिकूटमहाहसान्विते रुक्मिणीवीशाभ्यां वा संयुतं श्रीदाम्ना मायूरके कूर्मे चत्वरे वा, कर्किणं पूर्ववत् स्थापयेत्।

वैराग्ययोगैश्वर्येप्सुः मत्स्यकूर्मौ राजराष्ट्रविवृद्धये वराहं शत्रुदस्युविनाशाय-पराजितत्वकाङ्क्षी नृसिंहं राज्यलाभाय विद्यार्थं वामनं त्रिविक्रमञ्च जामदग्न्यं धर्मवृद्धिसुखाकाङ्क्षी रामं योगार्थी सार्वभौम (त्वं?) कामो बलभद्ररामं भोगैश्वर्य-सुखप्रीत्यै कृष्णं पापौघविघ्नाय कर्किणं पूजयेदिति विज्ञायते ॥

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपप्रोक्ते ज्ञानकाण्डे
दशावतारविधिर्नाम सप्तत्रिंशोऽध्यायः ॥

पाशावचित्रितं [1]नानारत्नानबन्धनं तदधस्तात्पूर्णाणि सूत्राणि कल्पयेत् । एवमन्यत्र विस्तृतं [2]ज्ञात्वा आभरणान्यलङ्कारयुक्तानि कारयेत् ।

शङ्खचक्रायामं चतुर्ज्वालायुतं चक्रास्यविस्तारं कोलकं चतुर्दशारं मध्यग्रन्थियुतं शङ्खमध्यमविस्तारं प्राणायामं ज्वालायामं भागमेवमनुक्तं [3]तत्र ज्ञात्वा लक्षणयुतं रम्यं कारयेदिति विज्ञायते ।

इति श्रीवैखानसे कश्यपप्रोक्ते ज्ञानकाण्डे किरीटादिमानविभागो नाम द्विपञ्चाशोऽध्यायः ।

॥ अथ त्रिपञ्चाशोऽध्यायः ॥

स्थानकासनशयनानि;

स्थानकम् ।

अथ स्थानकासनशयनभेदं [4]वक्ष्यामि । विमाने गर्भगृहे दैविकभागं त्रिधा कृत्वा तदपरे तद्द्विभागे वैकभागे वा स्थानकं स्थाप्यमेतद्योगं भोगं विरहं वीरमिति चतुर्विधं भवति । श्रीभूमिभ्यां रहितं दक्षिणे मुनिना मार्कण्डेयेन अर्चकेन वामे च भृगुणा सहितं दक्षिणे भूम्या वामे मार्कण्डेयेनार्चकेन सहितं वा योगस्थानकं तथा देवीभ्यां रहितं अर्चकेन मार्कण्डेयेन भृगुणा च सहितं दक्षिणे दण्डकेन वामे च गरुडेन युतं योगस्थानकमिति केचित् । [5]तथा देवीभ्यामर्चकमुनिभ्याञ्च संयुतं भोगस्थानकमेतैस्सर्वैश्च विरहितं वीरस्थानकं देवीभ्यां रहितमर्चकमुनिभ्यां सहितं वा [6]शङ्खचक्राभ्यां रहितं वीरस्थानकमिति ।

आसनम् ।

तथा दैविकभागं त्रिधा कृत्वा [7]दैविकभागयुतमानुष्ये स्थाप्यमासनम् । तच्च योगं सुखं भोगं वीरमिति चतुर्विधम् । तथा देवीभ्यां रहितमर्चकमुनिभ्यां

---

1. छ. नवरत्नप्रबन्धनं. 2. ङ. ज्ञात्वाभरणन्य. लंकारयुतानि कारयेत् म. आभरणाद्यैः नित्यमलङ्कारयुक्तानि. 3. छ. तत्र तत्र. 4. M. शयनेषु. 5. छ. अथ. 6. छ. चक्रशङ्खाभ्यां. 7. छ. तदेव भागयुत.

महीमार्कण्डेयाभ्यां मार्कण्डेयपुण्याभ्यां वा युक्तं योगासनम् । देव्यर्चकमुनिभिर्विनाकृतं वा तथा देवीभ्यामर्चकमुनिभ्यां वा[1] संयुक्तं सुखासनम् । [2]तद्देवीभ्यां तन्मुनिभ्याञ्च सहितमपरित्यक्ताश्रये चामरधारिणीभ्यां मायासंह्रादिनीभ्यां किङ्किन्यसुन्दराभ्यां वा युक्तं मूर्ध्नि सन्निहितहस्तेन नमस्कारकृच्चन्द्रादित्याभ्याञ्च सहितं भोगासनम् । देव्यर्चकमुनिभिः सहितं [3]रहितं वा देवस्य पादयोरूरुबद्धवस्त्रेण युतं जानूपरिविन्यस्तप्रसारितहस्तद्वयसहितं वीरासनम् । देवीभ्यां रहितमर्चकमहीमार्कण्डेयसहितं वीरासनमित्येके ।

शयनम् ।

किञ्चिद्दैविकभागयुतं मानुष्ये स्थापनीयं शयनम् । तदपि योगं भोगं वीरमिति त्रिविधम् । उपधाने निहितं दक्षिणहस्तं प्रसारितं वामहस्तं तदुपधाननिहितमकुटमूर्ध्वाननं किञ्चिदुन्मीलितं चक्षुः प्रसारितपादं देवं शयानं कृत्वा तदुपरि भित्त्यूर्ध्वभागे नाभिपद्मे समासीनं ब्रह्माणं [4]तद्भित्त्याश्रयान् पञ्चायुधान् पादपार्श्वे स्थिताभ्यां समुद्रतरङ्गाच्छादितजानुभ्यानुग्रवेग [5]मधुकैटभासुराभ्यां अर्चकमहीमार्कण्डेयाभ्याञ्च सहितं कुर्यादेतद्योगशयनम् । किञ्चिद्द्वारनिरीक्षिताननं दक्षिणहस्तेन धृतमकुटं किञ्चित्कुञ्चितप्रसारितवामहस्तं तदुपधाने योजितदक्षिणकरमनन्तशयने समासीनं पविन्यूरुन्यस्तदक्षिणपादं तथाऽऽसीनमध्वरुन्यस्तवामपदं शयानं देवं तत्पादे निहितद्विहस्तया [6]पादमर्दिन्या श्रिया भूम्या च संयुतं पूर्ववद्ब्रह्माणं पञ्चायुधरूपैश्च सहितं कुर्यादेतद्भोगशयनम् । उपधाने किञ्चिदस्पृष्टमकुटं यथा तथोपधाने निहितदक्षिणहस्तेन धृतमकुटं द्वारं सम्यङ्निरीक्षितलोचनाननं[7] विस्मयोत्फुल्ललोचनं प्रसारितवामहस्तं द्विहस्तयुतं [8]चक्रशङ्खयुतहस्ताभ्यां [9]चतुर्हस्तयुतं वा देवं कुर्यादेतद्वीरशयनम् ।

1. वा इति छ. पाठे नास्ति. 2. ट. मात्रे, तत्. 3. रहितमिति 'छ' कोशे न दृश्यते. 4. B. भित्त्याश्रयपञ्चायुधरूपैः. 5. छ. मधुकैटभाभ्यां 6. ट. पादमर्दनयिकया. 7. छ. लोचनं. 8. छ. चक्रशङ्खधरं. 9. छ. चतुर्हस्तमेव कुर्यात्.

योगादिस्थापनाधिकारिणः ।

योगार्थी योगमार्गं पुत्रार्थी सुखार्थी च सुखमार्गं धनैश्वर्यभोगार्थी भोगमार्गं वीर्यार्थी वीरमार्गं विरहार्थी विरहमार्गमेतेषामभीष्टमार्गेण ध्रुवबेरं कारयेत ।

इति श्रीवैखानसे कश्यपप्रोक्ते ज्ञानकाण्डे स्थानकासनशयनेषु
योगादिभेदो नाम त्रिपञ्चाशोऽध्यायः ।

॥ अथ चतुःपञ्चाशोऽध्यायः ॥

ध्रुवबेरद्वैविध्यम् ।

ध्रुवबेरस्यैवैष भेदो न कौतुकबिम्बस्य । ध्रुवकौतुकसंयुक्तं ध्रुवार्चनमित्यर्चना द्विविधा भवति । [1]ध्रुवबेरं कौतुकबिम्बञ्च प्रतिष्ठाप्यार्चनं ध्रुवकौतुकसंयुक्तं सर्वाङ्गमुक्तप्रमाणैः सम्पूर्णम् । ध्रुवबेरविधानेन शिलयैव कृत्वा ब्राह्मे कौतुकबिम्बस्थाने अर्चनार्थं वर्णविहीनं प्रतिष्ठाप्यार्चनं ध्रुवार्चनम् । एतत्स्थानकासनयोरेव विहितम् । नैव शयने कर्तव्यम् ।

[2]ऐहिकामुष्मिकापेक्षी ध्रुवकौतुकसंयुक्तं केवलामुष्मिकापेक्षी ध्रुवार्चनं कुर्यात । यथैकस्मिन् गृहे त्रेताग्नीन् कल्पयति [3]तथैकस्मिन् विमाने कौतुकमौत्सवमर्चेति त्रीणि बेराणि कल्पयेत् । प्रधानार्चनार्थमुत्सवार्थं स्नपनार्थञ्चैतद्बेराणि[4] ।

कालान्तरे प्रतिष्ठायां विशेषः

प्रथमप्रतिष्ठायां त्रयाणामप्यलाभे कौतुकबिम्बमेकमेव प्रतिष्ठाप्य [5]पश्चादन्ययोर्लाभे प्रतिष्ठापनं कर्तव्यम् । ध्रुवबेरेण कौतुकबिम्बस्यैकस्यैव सम्बन्धो नान्येषाम् । तस्मात्तदेकमेव स्थापयेदित्येके ।

1. छ. ध्रुवबेरैः कौतुकबिम्बस्थाने प्रतिष्ठाप्यार्चनं ध्रुवकौतुकेत्यादि. 2. छ. ऐहिकामुष्मिकापेक्षी M. ऐहिकामुष्मिक. 3. छ. तथैव त्रिषाने. 4. छ. नैव तत्रेराणि. 5. छ. पश्चादपि

तथा बहूपदंशयुतानि यथाविधि पक्वानि शुद्धौदनपायसकृसरगौल्ययावकानि पञ्चविधानि हवींषि तदर्धमर्धयामे च हविः त्रिसन्धिषु वैष्णवमीङ्कारायष्टाशीति-विष्णुसूक्तयुतो मूर्तिहोमः पूर्ववदन्नबलिर्मुखवासश्च देव्योर्मुन्यादीनामिन्द्रादीनां च त्रिकालं हविः पूर्ववत्तथा षष्टिः परिवारदेवाः पञ्चदशार्चकाः षष्टिः परिचारकाः द्वात्रिंशद्भिः पंचाशद्भिर्वा वाद्यघोषणं तथाऽप्सरोभिः नृत्तगेयैश्च पूजनं दशनाडिकाः यामो वा कालः तथैवमेतैर्युक्तमुत्तममध्यमम् । द्वादशतलं विमानं कृत्वा तत्तत्तले देवेशं प्रतिष्ठाप्य नित्यं सप्तकलशैः स्नापयित्वा नववस्त्रैः सुगन्धिभिर्गन्धमाल्यैश्चालङ्कृत्य यथोक्तमर्चनं कारयेत् । पूर्वस्माद्द्विगुणा दीपाः हवींषि च मुखवासमूर्तिहोमान्नबलिप्रभृतानि सर्वाणि पूर्ववदेव । विष्णुपञ्चकायन-विषुवमासक्षेपु नित्यञ्च विशेषपूजनं महाद्विर्निवेदनञ्च नित्योत्सवं विशेषोत्सवञ्च कारयेत् । विष्वक्सेनादिसप्तत्येकोत्तरपरिवारदेवानाञ्च सप्तविंशतिविप्रैरर्चनं नित्यं त्रिसन्ध्यंवाचरेत् । साष्टशतं त्रिशतं पञ्चशतं सहस्रं वा तथा आराधकाः परिवारकाः द्विशतैः वाद्यघोषणं द्विशताभिर्वा अप्सरोभिः नृत्तगेयवद्यैश्च पूजन-मित्येवंयुक्तमुत्तमोत्तमम् । एतत्कर्तुमशक्तानां पञ्चमूर्तिविधानेनार्चनमुत्तमोत्तम-मिति विज्ञायते ।

इति श्रीवैखानसे काश्यपप्रोक्ते ज्ञानकाण्डे
षट्सप्ततितमोऽध्यायः ।

॥ अथ सप्तसप्ततितमोऽध्यायः ॥

अथ पंचमूर्तिविधानं पूर्वं सङ्क्षेपादुक्तम् । तदेव सविशेषं सविस्तरं व्याख्या-स्यामः । विष्णुः पुरुषः सत्योऽच्युतोऽनिरुद्ध इति पञ्च मूर्तयः । तेषामादिः परमो विष्णुः युक्तो धर्मं ज्ञानमैश्वर्यं वैराग्यमिति चतुर्भिर्गुणैः । तस्मादादि-मूर्तेरेव भिन्नाः पुरुषाद्याश्चत्वारो मूर्तयः । धर्मेण गुणेन भिन्नः पुरुषमूर्तिः ज्ञानेन सत्यमूर्तिरैश्वर्येणाच्युतमूर्तिर्वैराग्येणानिरुद्धमूर्तिः । एता मूर्तयश्चतुर्युगाः चतुर्वर्गाः चतुर्वर्णाः चतुर्वेदाः चतुर्वर्णसमृद्धिप्रदा भवन्ति । आदिमूर्तेरेकस्यैव

पंचभेदकल्पनं पंचमूर्तिविधानम् । अभिन्नसंकल्पने चैकमूर्तिविधानेऽपि पंच-मूर्तिनाभिरेवार्चनं विहितं चातुर्वर्ण्यसमृद्ध्यर्थम् । तस्मात्पंचमूर्तिविधानेनार्चनं श्रेष्ठम् । यथैकस्याग्नेः कुण्डदिङ्नाममन्त्रैः क्रियाभेदैः पंचधैवाग्निहोत्राहुतिः तथा देवेशस्यैकस्यैव दिग्गर्भालयमूर्तिनाममन्त्रक्रियाभेदैः पंचधाऽर्चनमेतच्छान्ति-कम् । पौष्टिकं सर्वसुखकरं[1] सर्वलोकप्रदमपत्यवर्धनं धनधान्यादिसर्वसम्पत्प्रदं ज्ञानादिकवैदिककर्माभिवृंहणं ब्रह्मवर्चसकरमायुरारोग्यकरञ्च भवति । नलिन-काष्टाङ्कनन्द्यावर्तचतुर्मुखसर्वतोभद्रश्रीप्रतिष्ठितकविमानानामेकस्मिन् प्राग्द्वारे पंच-मूर्तिविधिना देवेशं प्रतिष्ठाप्यार्चयेत् । सहस्रविप्रावासग्राममध्ये पंचमूर्तिविधिना विष्णोरर्चनं न कारयेत्तद्वास्तु सर्वविनाशायैव भवति । सहस्रन्यूनेऽपि शताधिके च कुर्याच्चेत्तद्वास्तु सर्वसम्पन्नं भवति । एतच्छूद्रोऽनुलोमश्च नैव कारयेत । सद्दशान्यूनग्राममध्ये चैकमूर्तिविधिना वार्चयेदिति केचित् । कर्षणादिकर्म सर्वं[2] पूर्वमेवोक्तम् । विमानं त्रितलं चतुर्दिक्षु चतुर्मुखं मध्ये चतुर्दिक्षु पंचगर्भालयं चतुर्दिक्षु मुखमंडपचर्यासोपानसंयुक्तं कृत्वा मध्यगर्भालयादिभूमिं सिकताभिरापूर्य सम्यक् [3]घट्टनं कुर्यात् । देवानासीनान् स्थितान्वा कारयेत् । प्राच्यां सितवर्णं पुरुषं रक्तनेत्रास्यपाणिपादं दक्षिणवामयोर्देव्यौ सुवर्णाभां श्रियं, रक्ताभां मेदिनीं च [4]वीजयन्तीं सुरां रक्तां सुन्दरीं कनकाभामर्चकं भृगुं प्रवालाभं मार्कण्डेयं श्वेताभं च कृत्वा भित्तौ दक्षिणवामयोः, यथोक्तवर्णौ [5]सावित्रीं गायत्रीं [6]स्वयम्भुवं रुद्रमपि प्रागादि नैर्ऋत्यन्तं सौपर्णाद्यांश्च पश्चिमादीशानान्तं [7]विघ्नं निधिपतिं शंखं पद्मं च विलिखेत् । दक्षिणस्यामञ्जनाभं सत्यमूर्तिं देवीं धृतिं रक्ताभां पौष्णीं श्यामाभां चैव द्वे व्याजिन्यौ जयां श्यामां भद्रां रक्तां मुनिं धातृनाथं कनकाभं चिरायुषं श्यामं कृत्वा विरिंचिं गुहं सिद्धान् ज्ञानरूपान् दक्षिणे सोमं रुद्रं वह्निं धर्मं च वामे विलिखेत् । पश्चिमे कनकाभमच्युतं देवीं पविलां कनकाभां क्षोणीं

1. दुःखहरं. 2. B. सर्वमेवोक्तं. 3. A. घट्टनं. 4. A. बीजयन्तीम् सुरां रक्तां सुन्दरीम् कनकप्रभं. 5. सावित्रीम. 6. म. स्वायंभुवाद्यात्मनान् (?). 7. विघ्नं निद्रानिधिपतीन्.

शुक्लामर्चकं स्यातीशं प्रवालाभं पुराणं रक्तं वीजयन्तीं विजयां रक्तां विन्दां श्यामां कृत्वा नरनारायणौ दक्षिणे कामं रतिं वामे क्षमां लिखेत्। उत्तरे [1]प्रवालाभमनिरुद्धं अनन्तोत्सङ्ग आसीनं वीरासनेनानन्तं तस्य सहस्रफणान् कर्तुमशक्यं, द्वादश सप्त पञ्च वा फणान् कृत्वा देवीं प्रमोदायिनीं प्रवालाभां महीमिन्दीवराभामर्चकं भृगुं दक्षिणे [2]रौहिणेयं सिताभं नारसिंहं वन्दमानमेकजानुनाऽसीनं वामे वराहरूपं च लिखेत। तदूर्ध्वे तले द्वितीये मध्यमगर्भालये विष्णुं श्यामाम्बुदप्रभमादिमूर्तिं देवीभ्यां सहासीनं कृत्वा अर्चकमुनिं मार्कण्डेयं भृगुं वीजयन्त्यौ मायासंह्लादिन्यौ द्वारपालं दक्षिणे बलिन्दं वामे तृहणं च कृत्वा तदूर्ध्वे तले तृतीये अनन्तशयनं देवेशं कारयेत्। अथवा द्वितीयतले नारसिंहं सिंहासने समासीनं शङ्खचक्रधरं कृत्वा [3]तदधस्तात् देवस्याग्नेये ब्रह्माणं ऐशान्ये रुद्रं देवेशमुद्वीक्ष्य विस्मयोत्फुल्ललोचनं प्रवालाभं वन्दमानं ब्रह्माणं श्वेताभं रुद्रं च [4]प्रह्लादं बृहद्वादकं गरुडं च कुर्यात। तृतीये तले विष्णुमादिमूर्तिं पूर्ववत्कारयेदिति केचित। एतद्विमानं त्रिभिः पञ्चभिः सप्तभिर्वा प्राकारैर्युक्तं कृत्वा परिवारदेवांश्च कारयेत्। प्रथमावरणे [5]वैनतेयं पश्चिमोन्मुखं देवमुद्वीक्ष्य स्वस्तिकासनेनाऽसीनं [6]स्थितं वा ईशानरविशक्रान्मीन् [7]प्रत्यङ्मुखान् गुहदुर्गायमानुदङ्मुखान् निर्ऋति[8]बुधवरुणवायून् प्राङ्मुखान् ब्रह्मकुबेरविष्वक्सेनान् दक्षिणमुखान् द्वाराद्वाह्ये दक्षिणतो विघ्नमुत्तराभिमुखं [9]वामतः शेषं दक्षिणाभिमुखं च द्वितीयावरणेऽभिमुखे चक्रं गोपुराद्वाह्ये तथा ध्वजं शङ्खं च रक्षागारात्पुरस्तात् भूतपीठं दक्षिणपश्चिमयोरुद्यानमुत्तरस्यामर्चकानामावासं चाऽचार्यगृहं विष्वक्सेन[10] सूत्रेण कारयेत्। तथैव पञ्चमूर्तीनां प्रतिष्ठां कुर्यात्। पुरुषाद्याश्चतस्रो मूर्तीरेवैवं स्थापयेच्चेत्तच्चतुर्मूर्तिविधानमिति। अनि-

1. म. अग्निसन्निभमनिरुद्धं. 2. A. दक्षिणे रौहिणेयं सिताभं. 3. तदधस्ता देवस्याग्नेये. 4. प्रह्लादं बृहद्वादकं गरुडमिति B. कोशेषु नास्ति. 5. A. पश्चिमाभिमुखं वैनतेयं. 6. स्थितं वेति ग. कोशे नास्ति. 7. A. प्राङ्मुखान्. 8. A. बुधवायून्. 9. A. उत्तरत. 10. A. सूत्रे.

नारसिंहप्रतिष्ठा चेत् 'नारसिंहं तपोनाथं महाविष्णुं महाबलमनन्तबल' मिति नारसिंहं देवेशं, दक्षिणे 'विरिंचिं वरदं ब्रह्माणं पद्मसम्भव' मिति ब्रह्माणं, वामे 'रुद्रं त्र्यम्बकं शर्वं गौरीश' मिति रुद्रं, 'यज्ञं [1]सुतपसं शुद्धं भावितात्मान' मिति पूजकं दक्षिणे, 'तीर्थं वहनं मन्त्रसिद्धं महामति' मिति वामे च, 'विद्वांसं[2] संसृतिजं सुमतिं महाप्रभ' मिति शैविकं, [3]एतैः मन्त्रैः यथोक्तैः विप्रैश्च पूर्ववदभ्यर्च्य बलिदानस्नपनादीनि कारयेत्। [4]बलिदानस्नपनोत्सवान् सर्वमूर्तीनां कर्तुमशक्तो विष्णोरादिमूर्तेरेव कारयेत्[5]। अथवा यस्यां यस्यां मूर्तौ नृणां भक्तिः सञ्जायते तस्या एवादिमूर्तेः सह वा पृथगेव वा पुण्यर्क्षे पूजां विशेषपूजाश्च कारयेत्।

इति श्रीवैखानसे भगवच्छास्त्रे कश्यपप्रोक्ते ज्ञानकाण्डे पञ्चमूर्ति-
प्रतिष्ठार्चनाविधिर्नाम अष्टसप्ततितमोऽध्यायः।

॥ अथ ऐकोनाशीतितमोऽध्यायः ॥

अथ प्रादुर्भावानां पृथिव्यिमाने बेरकल्पनं पूर्वं सङ्क्षेपादुक्तम्। इदानीं विस्तरात्सुव्यक्तं [6]सविशेषमेतेषां पृथक् पृथक् भेदं प्रतिष्ठाञ्च ब्रवीमि। मत्स्यः कूर्मो वराहो नारसिंहो वामनो जामदग्न्यरामो राघवरामो बलरामः कृष्णः कल्किरिति दश प्रादुर्भावान् सर्वेऽप्याहुः। एतेषामेकविमाने [7]सह प्रतिष्ठा चेत् [8]एकयागशालायां मध्ये दक्षिणतो मत्स्यस्य तदुत्तरे कूर्मस्य प्रागाद्यष्टदिक्षु तथा वराहादीनाञ्च तथा शयनवेदिं तत्प्राच्यामेकैकमग्निकुण्डं पृथगेव कुम्भपूजनञ्च कृत्वा तेषां यथोक्तमेकस्मिन्नेवाग्नौ जुहुयात्। पृथक् प्रतिष्ठा चेत् पञ्चस्वग्निषु पूर्ववज्जुहुयात्।

---

1. B. सुतापसं. 2. A. विद्वांस सृतिजं. 3. A. एतैः मूर्तिमन्त्रैः. 4. A. स्नपनोत्सवार्चामूर्तीनां प्रतिष्ठां कर्तुमशक्तो विष्णोरादिमूर्तेः- 5. क. वा. 6. A. बेर कल्पनमेतेषां. 7. A. सहप्रतिष्ठायां. 8. A. एकयगशालां.

मत्स्यः

महाजलैः सर्ववराचरप्रलये सम्भूते जगत् पुनः स्रष्टुं तज्जलोपसंहारार्थं देवेशो महामत्स्योऽभूत्। अस्य नैव भेदः। पूर्ववदेव रूपम्।

कूर्मः

प्रथमो द्वितीयश्चेति द्विविधो भवति कूर्मः। स्वस्थानाच्चलित [1]जगदण्डभरणार्थं प्रथमः। [2]अमृतमन्थने मन्थराचलभरणार्थं द्वितीयः। तयोश्च तु रूपं पूर्ववत्। मत्स्यकूर्मयोः ध्रुववेरमेव। कौतुकं बिम्बं विष्णुं चतुर्भुजमेव कारयेत्। तद्विपरीतमित्येके। तयोः पूजकौ ब्रह्मेशौ। प्रतिष्ठायां विशेषो वक्ष्यते। मत्स्यस्य पौण्डरीके प्रधानाग्नौ हौत्रं प्रशस्य मूर्त्यावाहनजुष्टाकारस्वाहाकारप्रधानहोमांश्चाऽचरेत्। 'मत्स्यं जलजं भद्रं क्रीडात्मक' मिति [3]मत्स्यस्यावाहनादि। पारमात्मिकमन्त्रेषु मन्त्रानन्यान् विना 'यस्स्वयं सृष्ट' मिति मन्त्रेणैकेनैव अष्टाधिकशतमावर्त्य जुहुयात्। कूर्मस्य गार्हपत्ये प्रधानाग्नौ हौत्रप्रशंसनादीनि कुर्यात्। 'अकूपारं जलजं कूर्मं कच्छप' मित्यस्यावाहनादीनि। 'रायामीश' [4]इत्येकेन अष्टाधिकशतमावर्त्य जुहुयात्। अन्यपरिवारदेवानामावाहनादीन्यन्यान्यनुक्तानि सर्वाणि च पूर्ववदेव। एष विशेषः। वैराग्यैश्वर्याभ्युदयप्रतिष्ठाकामः मत्स्यकूर्मौ सहैव कुम्भाकारे त्रिकूटे हस्तिपृष्ठे सोमच्छन्दे नन्द्यावर्ते वा विमाने प्रतिष्ठाप्यार्चयेदिति।

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपोक्ते ज्ञानकाण्डे
मत्स्यकूर्मद्वितयप्रतिष्ठा विधिर्नाम एकोनाशीतितमोऽध्यायः।

1. A. जगदण्डाहरणार्थं. 2. क. अमृतमन्थनमन्थराचलोद्धरणार्थं. 3. A. मत्स्यस्य पारमात्मिकमन्त्रेषु यस्स्वयम. 4. A. इत्येतेन.

अथ अशीतितमोऽध्यायः

वराहः

अथ वराहः त्रिविधो भवति। आदिवराहः प्रलयवराहो यज्ञवराह इति। महाभारनिपीडितां रसातलस्थां महीमादावुद्धर्तुं देवेशो महावराहरूपोऽभूत्। तस्मादादिवराहः। स तां [1]रसातलादुद्धृत्योत्थितः। तस्मादुपललनवराह आसीत्। तस्य मुखं वराहवदन्यद्रूपं नरवत्। वर्णो नीलाम्बुदवत् सस्यनिभो वा। भुजाश्चत्वारः [2]पादौ द्वौ, दक्षिणो भूमौ पीठे स्थितो वामो रसातलादुत्क्रमणायाऽकुञ्चितः [3]। तदूर्ध्वद्वयोः पञ्चतालमानेन महीं श्यामाभां प्राञ्जलीकृतोभयहस्तां प्रसारितोभयपादां पुण्याम्बरधरां देवमुद्वीक्ष्य [4]क्रीडाहर्षयुतां देवीञ्च कारयित्वा, देवस्य दक्षिणहस्तेन देव्याः पादौ गृहीत्वा देवस्य परपार्श्वे बाह्वोरभ्यन्तरात् वामहस्तमाधारवत्कृत्वा [5]महीमुद्धृत्य अन्यहस्ताभ्यां [6]चक्रशङ्खधरं देवीं मूर्ध्नि मुखेन जिघ्रन्तं सर्वाभरणभूषितं देवं, तत्पूजकौ श्यामाभौ पुण्यधर्मौ प्रथमद्वारपालौ, श्वेताभां ब्रह्मश्रियं रक्ताभां राजश्रियञ्च, वाहनं श्वेताभं चतुर्वेदं शैषिकं, श्यामाभं पुलिन्दञ्च कारयेत्। एवमादिवराहं सर्वतोभद्रे अङ्कनाकारे सोमच्छन्दे [7]कुम्भाकारे त्रिकूटे हस्तिपृष्ठे वा विमाने राजराष्ट्रविवृद्धिकामो [8]बहुभूमिधनसस्यादिप्राप्तिकामो वा प्रतिष्ठापयेत्।

[9]अथ अवान्तरे महाजलैः जगत्प्रलये प्राप्ते तज्जलमुपसंहर्तुं महावराहः अभवत्। स प्रलयवराहः। [10]तज्जलं रोमकूपेषूपसंहृत्य जगत्पुनः स्रष्टुं [11]नरवराहः आसीत्। तस्यापि भुजाश्चत्वारो द्वौ शङ्खचक्रधरौ दक्षिणो न्यस्ताभयहस्तो वामः कट्यवलम्बितः पीतवर्णमम्बरं नीलं वा। अन्यानि पूर्ववत्। एवं सुखासनेनासीनं देवं कारयित्वा दक्षिणपार्श्वे देवीं हस्तेन दक्षिणेन पद्मधरां वामेन कट्यवलम्बनकरां आसीनां महीञ्च तस्मिंहासनादधस्तादुत्तरपार्श्वे द्विहस्तं वीणाधरं [12]रक्ताभं नारदं, दक्षिणोत्तरयोः पूजकौ पीताभौ मार्कण्डेयभृगू च कारयेत्। एवं प्रलयवराहमपमृत्युजयकामः [13]स्वबुलवर्धनकामो वा पूर्वोक्तविमाने प्रतिष्ठापयेत्। सर्वयज्ञविघ्नेषणकरं[14] हिरण्याक्षं हत्वा यज्ञस्थापनार्थं तथा [15]नरवराहः। [16]तस्यापि प्रलयवराहवदेव रूपम्। श्वेतवर्णो विशेषः। तथा देवीभ्यां श्रीभूमिभ्यां सह

1. A. रसातलादुद्धृत्य तस्य मुपलालयन्नरवराहरूप आसीत. 2. क. पादः 3. क. उत्क्रमणाय कुञ्चितः. 4. A. लीला. 5. क. महीमुद्धृत्य समुत्थितं. 6. क. शङ्खचक्रधरं. 7. क. कूटाकारे. 8. क. बहुभूमिधनादि. 9. अथान्तरे. 10. म. यस्तज्जल रोमकूपेषु संहृत्य. 11. ख. नरवराहवत. 12. क. रक्तनिभं. 13. म. काम इति न दृश्यते. 14. क. विद्वेषणकरं. 15. क. नरवराहवदासीत् 16. यज्ञवराहस्यापि.

सिंहासने [1]सुखासीनं देवं कारयित्वा, पूजकं कनकाभं यज्ञं श्यामाभं तीर्थञ्च कारयेत् । [2]देवं यज्ञवराहं यज्ञादिब्रह्मवर्चसकामः पूर्वोक्तविमाने प्रतिष्ठापयेत् । एतद्वराहत्रयस्यापि सभ्ये प्रधानाग्नौ हौत्रप्रशंसनादीनि । [3]'वराहं वरदं भूमिसन्धारणं वज्रदंष्ट्र' मित्यादिवराहस्य 'गां पृथुरां 'महीमुर्वी' मिति मह्याः, 'पुण्यदं शुभं सुकृतं धन्य' मिति पुण्यस्य, 'धर्मं परमं वृषं सत्य' मिति धर्मस्य, 'ब्रह्मश्रियं धर्ममयीं विद्यांगीं [5]शुद्धात्मिका' मिति ब्रह्मश्रियः, 'राजश्रियं महाभोगां नीतिमयीं सुदीप्ता' मिति राजश्रियः 'ऋग्भयं यजुर्मयं साममयमथर्वमय' मिति चतुर्वेदस्य, 'पुलिन्दं सुप्रसन्नं तपोमुख्यं पुण्यनिधि' मिति पुलिन्दस्य, 'प्रलयवराहं भूमीशं जगत्त्रायक' मिति प्रलयवराहस्य, देव्याः पूर्ववत् । 'नारदं मुनिवरं वीणाधरं [6]सर्वज्ञ' मिति नारदस्य, 'यज्ञवराहं वेदमयं यज्ञेशं यज्ञवर्धन' मिति यज्ञवराहस्य 'यज्ञं क्रतुवरं यज्ञाङ्गं यज्ञमुख्य' मिति यज्ञस्य, 'तीर्थं पापहरं वरदं [7]कामरूपिण' मिति तीर्थस्य, तथा अन्यपरिवारदेवानामावाहनादीनि । 'क्षमामेका' मित्यादिवराहस्य 'स्वयमा' दिरिति प्रलयवराहस्य 'यं यज्ञै' रिति यज्ञवराहस्य पारमात्मिकमन्त्रेषु [8]एकमेकमेवाष्टाधिकशतमावर्त्य जुहुयादिति विशेषः । अन्यानि पूर्ववदेव । यथेष्टं वराहं प्रतिष्ठाप्यार्चयेत् ।

इति श्रीवैखानसे भगवच्छास्त्रे कश्यपप्रोक्ते ज्ञानकाण्डे वराहत्रयलक्षण-वराहत्रयप्रतिष्ठाविधिर्नाम अशीतितमोऽध्यायः ।

1. क. सुखासनेनासीनं. 2. ग. एवं. 3. क. वराहं. 4. म. उर्वीं महीम्. 5. क. शुद्धाधिकां. 6. म. सर्वैयज्ञं. 7. क. कामरूपमिति. 8. क. एकमेकशतं. 9. छ. नारसिंहस्तु. 10. म. द्विधा भेदो भवति.

॥ अथ एकाशीतितमोऽध्यायः ॥

नारसिंहः

अथ [9]नारसिंहश्च गिरिजः स्थूणजश्चेति [10]द्विविधो भवति । धर्मतपःक्षयकरस्य हिरण्यकशिपोः वधार्थं नारसिंहरूपी गिरेः प्रादुरभूत् । स गिरिजो नारसिंहः । तं [1]दैत्यवधं दृष्ट्वा देवाः देवेशस्य 'अहो बल' मित्यूचुः । तस्मादहोबलमित्येनं [2]प्रशंसन्ति । तद्देवस्य मुखं सिंहस्येव केसरसटामण्डलसहितं चतुर्दंष्ट्रं करालं विवृतास्यं सिंहस्येव कण्ठञ्च नरस्येवान्यद्रूपम् । भुजाः चत्वारो द्वौ शङ्खचक्रधरौ [3]दक्षिणोऽन्यो दानकरो वामोऽपि तदूरौ न्यस्तश्च । एवं 'देवेशं शङ्खकुन्देन्दुधवलं किरीटमकुटाद्याभरणयुतं सिंहासने [5]सुखासनेन वीरासनेन वा समासीनं देवीभ्यां [6]सहितं रहितं वा कारयित्वा तत्पृष्ठपार्श्वे अनन्तस्य सप्तभिः पञ्चभिर्वा फणैः छादितमौलिं चतुर्भुजं द्वाभ्यां चक्रशङ्खधरं अन्याभ्यां स्वकर्णौ स्पृशन्तं अनिरुद्धं अथवा विना तथैवानन्तफणैश्च छादितमौलिं नारसिंहदेवं कारयित्वा, सिंहासनादधस्तात् दक्षिणतः तथा वन्दमानं नवतालमानेन ब्रह्माणं चतुर्भुजं द्वाभ्यामक्षमालाकुण्डिकाधरमन्याभ्यां प्राञ्जलीकृतं अभयकट्यवलम्बनकृतं वा जटामकुटयुतं, वामे च तथा वन्दमानमीशं [7]चतुर्भुजं द्वाभ्यामक्षमालापरशुधरमन्याभ्यां प्राञ्जलीकृतं वा अभयकट्यवलम्बनकृतं[8] जटामकुटयुतं, पूजकौ यज्ञतीर्थौ च पूर्ववत् । [9]एवं मार्कण्डेयभृगू वाहनं सामवेदं श्यामवर्णं शैषिकं रक्ताभं भूतीशञ्च तत् स्थाने कारयेत् । एवं गिरिजं नारसिंहं शत्रुदस्युविजयार्थी [10]पराजितत्वसर्वोपद्रवनाशकामो वा पर्वताकृतिके श्रीप्रतिष्ठितके नन्द्यावर्तके सर्वतोभद्रके स्वस्तिके वा विमाने तदुपरितले प्रतिष्ठाप्यार्चयेत् ।

[11]जगतामिन्द्रादिदेवानाञ्च पीडाकरहिरण्यवधार्थं[12] भक्तरक्षणार्थञ्च [13]स्थूणादाविरभूत् स्थूणजो नारसिंहः । तत्काले च [14]हिरण्यवधं दृष्ट्वा देवा देवेशस्य 'महाबल'मित्यूचुः । तस्मान्महाबलमित्येनं प्रशंसन्ति । उपधानरहिते सिंहा-

1. क. दैत्यवधिनम्. 2. क. गिरिं प्रशंसन्ति. 3. क. दक्षिणोऽप्यादानकरो वामोऽप्यूरुन्यस्तश्च. 4. क. देवं कुन्देन्दुशङ्खधवलं. 5. सुखासनेनेति म. कोशे न दृश्यते. 6. ख. सहितम् वा. 7. क. शङ्करं. 8. अभयकट्यवलम्बनकृतमिति क. कोशे नास्ति. 9. क. अथ मार्कण्डेयं भृगुं. 10. क. पराजित. 11. ग.जगदादिदेवानां. 12. क. हिरण्यकशिपुवधार्थं. 13. क. च तथा. 14. क. हिरण्यकशिपुवधं.

सने [1]समासीनस्य अतितीक्ष्णनखयुतदीर्घपाणियुताः भुजाश्चत्वारः द्वौ चक्रशङ्ख-धरौ विना वाऽपि तथोद्धृतो दक्षिणोऽन्यो दानकरः [2]वामः प्रबद्धः तदूरौ न्यस्तः। मुखमन्यद्रूपञ्च पूर्ववत्। महाकोपयुतं देवं तन्मकुटोपरि छलं रक्तवर्णं भित्तिपार्श्वे पूर्ववच्चामरधरौ किष्किन्धकुन्दरौ च कारयित्वा सिंहासनाधस्तात् दक्षिणवामयोश्च [3]'प्रभो! कोपमुपसंह' रेति देवेशमुद्वीक्ष्य वन्दमानौ [4]ब्रह्मेशौ च पूर्वत्कारयित्वा दक्षिणे प्राञ्जलीकृतां [5]श्रियं देवीं, वन्दमानं द्विहस्तं प्रह्लादञ्च वामे, पूर्ववत् तत्तत् स्थाने अन्यपरिवारांश्च कारयेत्। अथवा श्रीदेवीं प्रह्लादनारदलोकपालान् भित्तौ समुल्लिखेत्। एवं स्थूणजं नारसिंहमाधिव्याधिभीतिविनाशार्थी [6]जयकीर्त्यायुष्यकामो वा महापद्मे स्वस्तिके [7]पद्मभद्रके वा [8]विमाने तदुपरितले प्रतिष्ठाप्यार्चयेत्। [9]एतयोर्नारसिंहयोः आहवनीये प्रधानाग्नौ हौत्रासनं आवाहनादीनि च कुर्यात्। 'अहोबलं सर्वबलं बलातिबलमनन्तबल' मिति गिरिजं पुरा ब्रह्मा समर्चयत्। 'सुधृतिं सर्वाधारं कामबलममोघजेतार' मित्येनं रुद्रः। 'कर्मबलं [10]अनाथबलमनन्तबलमचिन्त्यबलमर्दन' मितीन्द्रः, अन्ये मुनयोऽप्यपूजयन्। तस्मादेतैः द्वादशनामभिः गिरिजनारसिंहस्यावाहनादीनि। 'नारसिंहं तपोनाथं महाविष्णुं महाबलमनन्तबल' मिति स्थूणजं सर्वेऽप्यपूजयन्। तस्मादेतैः पञ्चनामभिरेवं स्थूणजनारसिंहस्यावाहनादीनि। ब्रह्मेशानिरुद्धश्रीनारदयज्ञतीर्थलोकपालाद्यन्यपरिवारदेवानां पूर्ववत्। 'प्रह्लादं दैत्यपतिं विष्णुभक्तं महामति' [11]मिति प्रह्लादस्य 'सामवेदं [12]शान्तिसुखं गुरुपूर्वमुदरधिय' मिति सामवेदस्य, 'भूतीशं दिव्यराशिं सर्वलोकसुखावहं सर्वविघ्नविनाशन' मिति भूतीशस्यावाहनादीनि। पारमात्मिकमन्त्रेषु 'यो वा नृसिंह' इत्य-

1. क. सुखासीन. 2. क. वामतः प्रबद्धः 3. क. प्रभूतं कोपमुपसंहरन्तौ. 4. क. ब्रह्मेशौ. 5. क. श्रीदेवीं वन्दमानां द्विहस्तां. 6. क. विनाशार्थं. 7. छ. पद्मभर्तृके, म. भर्तृके. 8. विमान इति क कोशे नास्ति. 9. म. एतयोरिति नास्ति. 10. ख. नाथबलमचिन्त्यबलमरिमर्दनम्. 11. म. महाबलं. 12. ख. शान्तमुखं गुरुपर्वं.

ष्टाधिकशतमावर्त्य [1]जुहुयात्। अन्यानि पूर्ववत्। [2]हविर्निवेदने बलिदाने च पायसं श्रेष्ठमिति विशेषः।

इति श्रीवैखानसे भगवच्छास्त्रे कश्यपप्रोक्ते ज्ञानकाण्डे
नारसिंहद्वयविधिप्रतिष्ठाकमलक्षणं नाम
एकाशीतितमोऽध्यायः॥

॥ अथ द्व्यशीतितमोऽध्यायः॥

वामनः

त्रैलोक्याधिपान्महाबलेः देवार्थं त्रैलोक्यं छलेनाऽदातुं वामनोऽभवत्[3]। देवस्तदादाय महारूपी त्रिविक्रमणेन त्रिलोकमानं कर्तुं त्रिविक्रमोऽप्यासीत्। तौ सहैव स्थापयेत्। वामनं पृथगेवेति केचित्। त्रिविक्रममष्टभुजं चतुर्भुजं द्विभुजं वा कारयेत। भुजेषु दक्षिणेषु चक्रासिगदाशक्तिधरं वामेषु [4]शङ्खशरशार्ङ्गखेटकधरं अन्यवामहस्तमुद्धृतपादेन[5] प्रसार्य [6]तथैव स्थितं वामपादमुद्धृतदक्षिणेन सुस्थितं महावेगयुतं किरीटाद्याभरणभूषितमेवमष्टभुजं, अथवा द्विहस्ताभ्यां चक्रशङ्खधरमन्येन दक्षिणेन जलदानपरं वाममुद्धृतपादेन प्रसार्य तथैव स्थितं महाहर्षयुतमेवं चतुर्भुजं, अथवा दक्षिणेन जलदानपरं [7]वामहस्तमुद्धृतपादेन सह प्रसार्य स्थितमेवं द्विभुजम। त्रिविक्रमं केचिद्द्विभुजं नेच्छन्ति। क्रमात्पादोद्धरणात् त्रयोऽपि त्रिविधा भवन्ति। प्रथमो द्वितीयस्तृतीय इति। भूलोकमानाय वामपादे जानुमात्रमुद्धृते प्रथमः। अन्तरिक्षलोकमानाय नाभिमात्रमुद्धृते द्वितीयः। स्वर्गलोकमानाय [8]ललाटमात्रमुद्धृते तृतीयः। तिविक्रममेवं कारयित्वा तदुद्धृतपादतलं प्रगृह्य प्रक्षालनपरं पद्मस्थं ब्रह्माणं ततः [9]संस्रवद्रूपां स्वर्गान्तरिक्षगामूर्ध्वावलम्बिनीं नाभेरूर्ध्वं [10]शरी-

1. क. शतमाज्येन. 2. क. हविरिति नास्ति. 3. क. बभूव. स एव तदादाय त्रिविक्रमेण. 4. क. शङ्खमुसलशार्ङ्ग. 5. क. उद्धृत्य पादेन. 6. तथैवेत्यादि सहप्रसार्येत्यन्तं म. कोशे न दृश्यते. 7. म. वामनुद्धृत. 8. क. ललाटान्तं. 9. A. सहस्रप्रभामिव. 10. क. शरीरं.

रिणीमधः स्रोतोरूपां प्राञ्जलीकृतद्विहस्तां श्वेताभां गङ्गामुद्धृतपादपार्श्वे भ्रममाणं दैत्यं श्यामाभं नमुचिं [1]भेरीताडनपरं कपिमुखं नररूपं नीलाभं जाम्बवन्तं अपरभित्त्यूर्ध्वभागे छत्रधरमाकाशस्थमिन्द्रं[2] पार्श्वयोः चामरधरौ यमवरुणौ च स्थितपादाद्वामे [3]अतिशयेन प्रह्वायमानं शुक्रं तदूर्ध्वे मुष्ट्या प्रहरन्तं गरुडं त्रिविक्रमस्य दक्षिणे श्यामवर्णं वटुरूपं द्विभुजं दक्षिणेनोदकादानपरं वामेन छत्राषाढधरं कौपीनवाससं वामनं दक्षिणे [4]जलदानाय पाणिभ्यां कलशमुद्धृत्य स्थितं सुमुखं सर्वाभरणभूषितं सुवर्णवर्णं महाबलिं पूजकं कनकाभं कनकं शङ्खाभं शङ्खिलञ्च [5]मार्कण्डेयभृगू वा कारयेत् ।

विद्यार्थी वामनं भूलोकविजयार्थी त्रिविक्रमं प्रथममन्तरिक्षजयार्थी, द्वितीयं स्वर्गलोकजयकामः, सर्वलोकजयकामः तृतीयं, अष्टभुजं सार्वभौत्वकामी, चतुर्भुजं राज्यार्थी, ब्रह्मवर्चसकामः द्विभुजमेवं, त्रिविक्रमं सोमच्छन्दे दीर्घशालायां त्रिकूटे [6]गोपुराकारे छत्राकारे चतुःष्फुटे वा विमाने सहैव स्थापयेत् । त्रिविक्रमस्य कौतुकं [7]बिम्बं विष्णुमेव कारयेत् । पृथक् चेत् वामनं हस्तेन दक्षिणेन दण्डधरं वामेन छत्रधरं देवं कारयित्वा पूजकौ कनकशंकिलावेव कारयेत् । द्वयोः प्रतिष्ठायामन्वाहार्ये प्रधानाग्नौ हौत्रशंसनादीनि 'त्रिविक्रमं त्रिलोकेशं सर्वाधारं वैकुण्ठ' मिति त्रिविक्रमस्य, 'वामनं वरदं काश्यपमदितिप्रिय' मिति वामनस्य, 'कनकं मुनिमुख्यं सुतपसं दयापर' मिति कनकस्य 'शङ्खिलं [8]महामुनिवरं धर्मं तपोधिक' मिति शङ्खिलस्य 'असुरेन्द्रं महाबलिं सुखदं वैरभोजन' मिति महाबलेः 'जाम्बवन्तं [9]नीलाभं [10]चिरञ्जं [11]त्रिलोकपर' मिति जाम्बवतः पूर्ववदन्यदेवानां चावाहनादीनि । पारमात्मिकेषु मन्त्रेषु 'यो वा त्रिमूर्ति' रित्येकमष्टाधिकशतमावर्त्य जुहुयात् । विष्णुसूक्तेन

1. अत्र भेरीताडन-पर अनयोः पदयोर्मध्ये सर्वेषु मातृकाकोशेषु ग्रन्थपातः सूचितः निमित्तं न दृश्यते. 2. क. आकाशे इन्द्रं. 3. म. शायनं प्रह्वायमानं. 4. क. जलदानायेव राज्ञीभ्यां. 5. क. मार्कण्डेयं भृगुं च. 6. क. गोपुराकारे चतुःस्फट इत्येव. 7. क. बिम्बं चतुर्भुजं 8. ख. महामतिं वरधर्मं. 9. क. नीलनिभं. 10. क. त्रिकालज्ञं B. चरञ्जं. 11. म. त्रिलोकवरं.

प्रतिष्ठामाचरेत् । आकाशस्थदेवानां [1]तानुद्दिश्य अधस्तात् पीठेऽर्चनमिति विशेषः । अन्यानि पूर्ववदिति ।

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपोक्ते ज्ञानकाण्डे
वामनत्रिविक्रमप्रतिष्ठाविधिर्नाम द्व्यशीतितमोऽध्यायः ।

॥ अथ द्व्यशीतितमोऽध्यायः ॥

जामदग्न्यरामः

महाबलबहुक्षत्रियवधात् भूमिभारनिर्हरणार्थं जमदग्नेरुद्भूतो [2]जामदग्न्यरामः । तं देवं द्विभुजं [3]दक्षिणेन परशुधरं वामेनोद्देशकरं नीलाम्बरधरं वीरमार्गेण स्थितमासीनं वा कारयेत् । [4]देवं जमदग्निरामं फेलाकारे अङ्गनाकारे श्रीप्रतिष्ठनके महाशंखे वा विमाने तपोज्ञानजयार्थी स्थापयेत् । अस्यावसंस्थ्ये हौत्रप्रशंसनादीनि । 'रामं जमदग्निसुतं भद्रं परशुपाणि' मिति परशुरामस्य । परिवारदेवनां पूर्ववत् । पारमात्मिकेषु मन्त्रेषु, ''विष्णुर्वरिष्ठ' इत्येकमष्टाधिकसप्तशतं [5] जुहुयादेष विशेषः । अनुक्तं पूर्ववदिति ।

राघवरामः

इन्द्रादिदेवानामृषीणां हिंसनकरं रावणं हन्तुं रघोरन्वये राघवरामः अभूत् । एष सायुधो निरायुधश्चेति द्विविधो भवति । सार्धनवतालेन मानेन राघवरामं [6]श्यामाभं द्विभुजं दक्षिणेन पाणिना तीक्ष्णशरधरं वामेन धनुर्धरं किरीटमकुटादिसर्वाभरणभूषितं [7]त्रिभंगं सीतां [8]दक्षिणे अष्टतालमानेन देवीं द्विभुजां वामेन पद्मधरां दक्षिणमधः प्रसार्य [9]तथैव स्थितां, देवस्य वामे लक्ष्मणं पीताभं रामवत्तथा शरधनुर्धरं किञ्चिद्वामे [10]स्थितं, प्रमुखे वार्ताविज्ञापनपरं कपिरूपं द्विभुजं दक्षिणेन पिहितास्यं वामेन स्वाम्बरावकुण्ठनपरं हनूमन्तञ्च कारयेत्। एवं सायुधं

1. ख. तत्तदुद्दिश्य. 2. क. जामदग्न्यः. 3. छ. दक्षिणं परशुधरं वामं. 4. क. परम्. 5. म. इत्येकं सप्तभिः जुहुयात्. 6. ग. श्यामं. 7. ख. त्रिभङ्गस्थितं. 8. क. तद्दक्षिणे. 9. A. तथैवं. 10. ख. वामाश्रिते स्थितम्.

रामं [1]सार्वभौमत्वकामः श्रीकामो वा फेलाकारे अञ्जनाकारे हिकूटे स्वस्तिके चतुःष्फुटे विमाने मण्डपे वा प्रतिष्ठाप्यार्चयेत् । सिंहासने [2]वामं पादमाकुञ्चितं दक्षिणं प्रसार्य हस्तं दक्षिणमभयं वामं कट्यवलम्बनपरमासीनं देवं तद्दक्षिणे पार्श्वे देवीं द्विभुजां वामेन पद्मधरां दक्षिणं कट्यां न्यस्य पादं वाममाकुञ्च्य दक्षिणं प्रसार्य देवं किञ्चिदुदीक्ष्य सहर्षमासीनां सीताञ्च तत्सिंहासनादधस्ताद्भामतः प्राञ्जलीकृत्य स्थितं लक्ष्मणं दक्षिणे तथा हनूमन्तमेवं निरायुधम् । भरतशत्रुघ्नाभ्यां [3]श्यामपीताभ्यां तथैव स्थितं लक्ष्मणं सिंहासनादधस्तादासीनं वेति केचित् । एवं निरायुधं राघवं देवं सत्पुत्रदयासत्यतपःश्रीकामः स्थापयेत् । रामस्यान्वाहार्थे प्रधानाग्नौ हौत्र[4]शंसनावाहनादीनि । रामं दाशरथिं वीरं काकुत्स्थ'मिति रामस्य 'सीतामयोनिजां लक्ष्मीं वैदेही' मिति सीतायाः 'रामानुजं सौमित्रिं लक्ष्मणं लक्ष्मिवर्धन' मिति लक्ष्मणस्य 'भरतं रामप्रियं कैकेयीसुतं सद्वृत्त' मिति भरतस्य 'शत्रुघ्नं सुमनस्कं लक्ष्मणानुजं दशरथोद्भव' मिति शत्रुघ्नस्य 'कपिराजं हनूमन्तं शङ्करांशं महामति' मिति हनूमतः । परिवारदेवानां पूर्ववत् । पारमात्मिकेषु मन्त्रेषु 'स्वौजसा सर्व' मित्येकाधिक[5]सप्तभिर्जुहुयात् । एष विशेषः । अनुक्तं पूर्ववदिति विज्ञायते ।

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपोक्ते ज्ञानकाण्डे
जामदग्न्यरामराघवराम प्रतिष्ठाविधिर्नाम
त्र्यशीतितमोऽध्यायः ॥

॥ अथ चतुरशीतितमोऽध्यायः ॥

बलरामकृष्णौ

बलात् दुराचारदैतेयवधार्थं वसुदेवाद्बलरामः, नरकाद्यसुरान् शिशुपालादिनृपान् हन्तुं कृष्णोऽप्यभवत् । तावपि सायुधौ निरायुधौ चेति द्विविधौ भवतः ।

1. क. सार्वभौकामीः त्रिवर्गकामो वा. 2. क. पादं वामं. 3. क. श्यामरक्ताभ्यां, ज. सिताभ्यां. 4. क. प्रशंसन. 5. क. एकाधिकं सप्ततिं.

दशतालमानेन बलरामं शङ्खाभं नीलाम्बरधरं द्विभुजं दक्षिणेन मुसलधरं वामेन हलधरमेवं सर्वाभरणभूषितं बलभद्रं सायुधमेकवेरविधिना महाबलकामः सोमच्छन्दे हस्तिपृष्ठे वा विमाने स्थापयेत् । तथा सिंहासने राघवरामवदासीनं बलभद्रं सीतावदासीनां रेवतीमज्जनाभां, अथवा तत्सिंहासनस्यार्धे सह समासीनं कृष्णं वा कारयेत् । एवं निरायुधं बलभद्रं कामभोगशुभार्थी स्थापयेत् । एतस्याहवनीये प्रधानाग्नौ हौत्रशंसनादीनि । 'बलरामं वीरं यदुवरं हलायुध' मिति बलरामस्य, 'रेवतीमिन्दिरां लक्ष्मीं रामप्रिया' मिति रेवत्याश्चावाहनादीनि । पारमात्मिकेषु 'रायामीश' [1]इत्येकविंशतिमावर्त्य जुहुयात् । अन्यानि पूर्ववदिति । नवतालमानेन कृष्णं श्यामलाङ्ग[2] पीतवाससं द्विभुजं दक्षिणेन क्रीडायष्टिधरं वामेनोत्क्रीडनकरं त्रिभङ्गस्थितं कुन्तलमकुटं सर्वाभरणभूषितं दक्षिणे सीतावत् स्थितां रुक्मिणीं कृष्णाभां वामे सत्यभामां पीताभां दक्षिणेन हस्तेन पद्मधरां प्रसारितवामहस्ताञ्च कारयेत् । अथवा वामपार्श्वे देवहस्ताभारदक्षिणस्कन्धं द्विभुजं प्राञ्जलीकृतं गरुडं कारयेत् । एवं सायुधं कृष्णमैश्वर्यभोगार्थी गणिकाविहारे कुम्भाकारे गोपुराकारे विमाने वा स्थापयेत् । तथा सिंहासने राघवरामवदासीनं कृष्णं दक्षिणे सीतावदासीनां रुक्मिणीं वामे दक्षिणपादमाकुञ्च्य वामं प्रसार्य तथाऽऽसीनां सत्यभामाञ्च कारयेत् । एवं निरायुधं कृष्णं महाभोगसुखप्रीतिकामः स्थापयेत् । यद्यद्रूपेण देवो यद्यत्कर्म कृतवान् तत्तद्रूपं [3]यथाभक्ति कारयेत् । पीठे पादेन वामेन कुञ्चितेन स्थित्वा समाकुञ्चितं दक्षिणमुद्धृत्य हस्तं दक्षिणं नवनीतयुतमभयदं[4] वा [5]अन्यमुत्तानं प्रसारितं कृत्वा बहुग्रन्थियुताम्बराधारयुतमम्बरहीनं नवनीतनटं देवमथवा सप्तभिः पञ्चभिर्वा फणैर्युक्तस्य कालीयनागस्य फणोपरि पूर्ववत् नृत्यन्तं प्रसारितवामहस्तेन गृहीतकालीयनागपुच्छमेवं कालीयमर्दनं कारयेत् । कृष्णरूपाण्यनेकानि तेषु यथेष्टरूपं कारयित्वा स्थापयेत् । एतस्य पौण्डरीकाग्नौ[6] हौत्रप्रशंसनादीनि । 'कृष्णं पुण्यं नारायणं वटपत्रशायिनं त्रिदशाधिप' मिति[7] कृष्णस्य 'रुक्मिणीं

1. म. एकविंशतिः. 2. क. श्यामलाभं. 3. B. यथाशक्ति. 4. म. अभयं. 5. म. उत्तानप्रसारितं. 6. अग्निकुण्डे. 7. A. त्रिदशाधिपतिं.

सुन्दरीं देवीं पद्मा'मिति रुक्मिण्याः 'शतरूपां सतीं [1]सन्नतिं क्षमा'मिति सत्यभामायाश्च, अन्यपरिवारदेवानामावाहनादीनि पूर्ववत् । पारमात्मिकेषु मन्त्रेषु 'यं त्वां सर्वं पालना'येत्येतेनैवाष्टाधिकशतमावर्त्य जुहुयादिति विशेषः ।

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपप्रोक्ते ज्ञानकाण्डे
बलरामकृष्णप्रतिष्ठाविधिर्नाम
चतुरशीतितमोऽध्यायः ॥

॥ अथ पञ्चाशीतितमोऽध्यायः ॥

कल्की

युगान्ते सर्वदुष्टसंहारार्थं [2]कल्की च भविष्यति । तस्य नैव भेदः । पूर्ववदेव रूपं [3]कारयित्वा स्थापयेत् । तस्यापि पौण्डरीकाग्नौ हौत्रशंसनादीनि । 'कल्किनं 'कामरूपं सर्वेशं सर्वसंहार'मिति कल्किनश्चाऽवाहनादीनि । पारमात्मिकमन्त्रेषु 'धूर्नो वहन्ता'मित्येकविंशतिकृत्वो जुहुयात् । एवमवमानना शार्थी कल्किनं मयूराकारे कूर्माकारे भूताकारे वा विमाने प्रतिष्ठाप्यार्चयेत् ।

अथवा देवेशस्य विष्णोः पार्श्वे दक्षिणतो मुखमण्डपे [5]तदावरणे [6]विनैव परिवारैः सायुधं रामं सीतालक्ष्मणाभ्यां हनूमता च सार्धं वामतः कृष्णञ्च सायुधं देवीभ्यां गरुडेन च युक्तं अन्यप्रादुर्भावरूपं वा यथेष्टमेव स्थापयेदिति ।

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपप्रोक्ते ज्ञानकाण्डे
कल्किप्रतिष्ठाविधिर्नाम पञ्चाशीतितमोऽध्यायः ॥

1. ख. सन्नतीं. 2. B. संहारार्थं. 3. रूपमिति क. कोशे नास्ति. 4. कामरूपिणं. 5. क. अन्तराऽरणे 6. क. विमाने परिवारैः

॥ अथ षडशीतितमोऽध्यायः ॥

वासुदेवः

अथ वसुदेवादुद्भूतो वासुदेवः । स मनुष्यरूपधारणात्[1] मानुषवासुदेवः, देवरूपधारणात् दैविकवासुदेवश्चेति द्विविधो भवति । मनुष्यवद्द्विभुजं [2]शङ्ख-चक्रधरं श्यामलाङ्गं किरीटमकुटादिसर्वाभरणभूषितं तस्य दक्षिणे पूर्ववत् रुक्मिणीं तद्दक्षिणे हलमुसलधरं तथा बलभद्रं तद्दक्षिणे प्रद्युम्नं रक्ताभं पीतकौशेय-वस्त्रं द्विभुजं दक्षिणेन क्षुरिकाधरं वामेन कट्यवलम्बनकरं तद्दक्षिणे ब्रह्माणञ्च यथोक्तं वासुदेवस्य वामेऽप्यनिरुद्धं द्विभुजं खड्गखेटकधरं पुष्पाम्बरधरं तस्य वामे नीलाभं श्वेताम्बरधरं [3]द्विभुजं दक्षिणेनोत्तानकरमन्येन दण्डधरं [4]साम्बं तस्य वामे तथा गरुडञ्च कारयित्वा तेषाञ्च पृथक् पृथक् [5]कौतुकबिम्बानि कारयेत् । अथवा ब्रह्मपदमध्ये चतुर्भुजं विष्णुमेकमेव कौतुकबिम्बं स्थापयेत् । एवं मानुषवासुदेवं दीर्घशालायां गोपुराकारे वा विमाने श्रीकीर्तिशौर्यवीर्यादिकामः[6] प्रतिष्ठाप्यार्चयेत् । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धसाम्बाः पञ्चवीरा इति विज्ञायते ।

अथ वासुदेवं दैविकं चतुर्भुजं तथा श्रीभूमिभ्यां सहितं मध्ये, तद्दक्षिणवामयोः बलभद्राद्यांश्च देवान् सायुधान् निरायुधान्वा पूर्ववत्कारयित्वा बलभद्रदेवीं रक्ताभां रेवतीं प्रद्युम्नदेवीं नीलाभां रोहिणीमनिरुद्धदेवीं श्यामाभां रमां साम्बस्य देवीं पीताभामिन्दुकरीञ्च पद्मधरैकहस्ताः तत्तद्देवीः तत्तत्पार्श्वे च कारयेत । एवं दैविकवासुदेवं स्वदारपुत्रपौत्रभ्रातृपूर्वस्वकुलवर्धनायुरारोग्यैश्वर्य-सुखभोगश्रीकीर्त्यादिकामः सोमच्छन्दे बृहद्वृत्ते वा विमाने प्रतिष्ठाप्यार्चयेत् । द्विविधवासुदेवस्यापि सभ्याग्नौ हौत्रशंसनादीनि कुर्यात् । 'वासुदेवं यदुवरं [7]भूमिहितं पुरुषोत्तम'मिति मानुषवासुदेवस्य । रुक्मिण्याः पूर्ववत् । [8]पूर्व-वद्विष्वादिपञ्चमूर्तिनामभिरेव दैविकवासुदेवस्य तथा देव्योः श्रीभूम्योश्च ।

1. म. धरणाच्च. 2. ख. चक्रधरं. 3. क. द्विहस्तं दक्षिणेनैकेनोद्धृतदण्डधरं. 4. साम्बशब्दस्थाने सर्वत्र साम्बवमिति क. कोशेषु पाठः 5. क. कौतुकबिम्बादीनि कारयेत्. 6. क. मतिवीर्यशौर्यादि. 7. म. भूमिसहितं. 8. म. पूर्ववदिति नास्ति.

बलभद्रस्य रेवत्याश्च पूर्ववत् । 'प्रद्युम्नं [1]सुरूपाक्षं [2]मदनांशं महाबल' मिति प्रद्युम्नस्य । 'रोहिणीमिन्दुमुखीं प्रद्युम्नप्रियां पद्मा'मिति रोहिण्याः । ब्रह्मानिरुद्धयोश्च पूर्ववदेव । [3]'रमामनिरुद्धप्रियां 'सुरूपाममृतोद्भवा' मिति रमायाः । 'साम्बं [5]सर्वसुखं समृद्धं [6]सामग' मिति साम्बस्य । 'वराङ्गीमिन्दुकरीं साम्बप्रियां पुण्या' मितीन्दुकरीदेव्याः । गरुडस्यान्यपरिदेवानाञ्च पूर्ववदावाहनादीनि । सभ्याग्नौ महाप्रतिष्ठोक्तवत् सर्वं होमं जुहुयात् । आहवनीये पुरुषसूक्तमन्वाहार्ये विष्णुसूक्तं गार्हपत्यावसथ्ययोः विष्णुगायत्रीमेकविंशतिकृत्वो हुत्वा तथौपासने ब्रह्मणो ब्राह्मं गरुडस्य गारुडञ्चैकविंशतिकृत्वः [7]तत्तद्धोमे तत्तन्मन्त्रैः जुहुयात् । स्नपनकुम्भपूजनशयनानि च पृथगेव कुर्यादेष विशेषः । अन्यानि सर्वाणि पूर्ववदेवेति काश्यपः ।

इति श्रीवैखानसे भगवच्छास्त्रे काश्यपप्रोक्ते ज्ञानकाण्डे उभयवासुदेव-प्रतिष्ठाविधिर्नाम षडशीतितमोऽध्यायः ।

॥ अथ सप्ताशीतितमोऽध्यायः ॥

महास्नपनम्–तत्र निमित्तम्

अथ [8]स्नपनं व्याख्यास्यामः । [9]प्रतिष्ठान्तोत्सवान्तविषुवायनेषु सूर्यस्य चन्द्रस्य वा [10]राहुग्रहणे च यत्नतो देवेशं संस्नापयेत् । विभवे सति श्रवणद्वादशीमासनक्षत्रादौ अन्यसंक्रमणेषु च दुर्निमित्तदुःस्वप्नावग्रहदुर्भिक्षव्याध्यादिसर्वोपद्रवशान्त्यर्थं च राज्ञो यजमानस्य वा जन्मनक्षत्रेऽपि [11] देवस्य स्नपनं कारयेत् ।

स्नपनसम्भाराः–प्राग्द्रव्याणि

यथोक्तमङ्कुरानर्पयित्वा स्नपनद्रव्याणि सम्भरति । नदीसस्यक्षेत्रतटाकदर्भमूल [12]गजदन्तोद्धृत [13]गोशृङ्गोद्धृतकुलीरवासवल्मीकेषु शुद्धां मृदं गृह्णाति ।

---

1. क. खरूपाक्षं 2. ग. अदर्शनांशं. 3. A. परमां. 4. म. खरूपां. 5. क. सर्वमुखं. 6. म. सोमगं. 7. क. तत्तद्धोमे तत्तद्देवोनाञ्च. 8. ख. स्नपनविधिं 9. क. प्रतिष्ठान्त उत्सवान्ते 10. म. राहोः 11. म. जन्मर्क्षेऽपि. 12. क. गजश्रृङ्गोद्धृत. 13. B. गोश्रृङ्गोत्करतः.

ICONOGRAPHY

AS REVEALED FROM THE VAIKHĀNASA ĀGAMA

A Dissertation submitted to

THE UNIVERSITY OF MADRAS
FOR THE DEGREE OF M.PHIL.

By

K.K.C.S. BADHRI NARAYANAN

Under the Guidance of

Dr. **R. THIAGARAJAN** M.A., Ph.D.,
Reader & Head
Department of Sanskrit

POST GRADUATE & RESEARCH DEPARTMENT OF SANSKRIT
PRESIDENCY COLLEGE
(AUTONOMOUS)
CHENNAI - 600 005.

NOVEMBER 1999

CONCLUSION

It is well known that Gṛhya and Śrauta sutras of sags Vikhanasa (1100 - 600 B.C.) were elaborately developed and popularised by his disciples like Bhṛgu, Marīci, Atri, Kāśyapa and others. Generally the sūtrās of all sages are concerned with the perfomence of Vedic rituals alone whereas the sage Vikhanasa is the first person to include typhical iconic worship. Benargia explaining the change of fire workship to iconic worship, "Fire was specially sacred to the vedic priests, because it was the carrer of sacrificers' oblation to their respective gods; in the case of sectory, the image or icon or any such visible symble of his deity was the handy medium through which he could tansfer his one - souled devotion (ekātmika bhakti) to his god"[1]. Thus it is observed that the iconic worship had played an important role in the society.

The sūtrās of Pāṇinī confirm the ful-fledged iconic representation of gods in the 6th century B.C. itself. The references in Rāmāyaṇa and Mahābhārata also strengthen this view. The pillar errected in homage to Vāsudeva by the Greek ambossoder Heleoderas highlights the iconic worship in 2nd centuary B.C. It is observed that the Vaikhānasa sūtrās belong to the early christian era. The some works on Vaikhānasa āgamā are later whcih included also the contemporary icons of the deities.

A survey of the special features of Vaikhānasa iconography reveals only 36 varities of icons of Dhruvabera. The position of Lord Viṣṇu in four types viz. Yoga, Bhoga, Vīra and Ābhicārika are classified into three attitude viz. Sthānaka, Āsana and Śayana which are totally classified in to three as Uttama, Madhyama and Adhama depending

---

1. Benarjia, Op. Cit. p.78

on the images cluster around. The purpose of these classification is meant for the individuals desiring various benefits. Ābhicārika type of image, a special features of Vaikhānasa āgama which deals with the infliction upon the enemies, is not available in any iconographic texts.

Addition of Vṛsṇi heros viz. Saṅkarṣaṇa, Vāsudeva, Pradyumna,Aniruddha and Sāmba, the deities originally human by nature, reveals that the Vaikhānasa agamic treatises adopt the deities of the contemporary society. Above five, iconographic terms are Mānusa and Daivika Vāsudeva group. The presence of the saivite deities like Skanda, Vakratuṇḍa and Śiva in the temple precincts show how the vaikhānasa treatises are in harmony with the other sects. Jyeṣṭha, considered to be an inauspicious deity in the latter times by the society and other treatises is also accomadated in the temple premises. This indicates the Viakhānasa agama accomadates even the local customs.

Undoubtedly the Vaikhānsa texts should have influenced the pallava rulers to adopt the Vaikhanasa system and this is evidenced by the sculptures found in the pallava region and also the adjacent pandia domains. Mr. Rao also confirms this view. Pañcabera or five variety of images viz. Dhruvabera, Arcābera, Utsavabera, Snapanabera and Balibera present in many temples have promote the art of sculputre. This helped the artisans to earn their livelyhood.

Unlike other agamic systems, Vaikhānasa āgama alone employ all the images right from the time of sage Vikhanas. The Vaikhānasa agama have developed various types of icons and vimānās for installation.

Thus, Vaikhānasa āgamās have played on important role to promote the social welfare with the development of iconography and architecture.